ISSN: 2320-740X

# शारदा

## वार्षिकपत्रिका



**प्रधानसम्पादकः**

आचार्यः ए. पि. सच्चिदानन्दः

**सम्पादकौ**

डा. गणेश ईश्वर भट्टः

डा. सूर्यनारायणभट्टः

योऽनूचानः स नो महान्।
राष्ट्रियसंस्कृतसंस्थानम्

## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्

## राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७ १३९

२०१५–१६

# शारदा

## वार्षिकपत्रिका

**प्रधानसम्पादकः**

आचार्यः ए. पि. सच्चिदानन्दः

**सम्पादकौ**

डा. गणेश ईश्वर भट्टः

डा. सूर्यनारायणभट्टः


## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्

## राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७ १३९

# शारदा

ISSN: 2320-740X

प्रधानसम्पादकः आचार्यः ए. पि. सच्चिदानन्दः

सम्पादनसमितिः

डा. गणेश ईश्वर भट्टः
डा. सूर्यनारायणभट्टः
डा. राजेशकुमारशुक्लः
डा. कविता एस्.
श्री विनय् एम्. एस्
श्री रवीशः एन्.
आयुष्मान् गणेशकृष्णभट्टः
आयुष्मती उमा वि. भट्
आयुष्मान् नागपतिहेगडे
आयुष्मान् सूर्यहेब्बारः ए.
आयुष्मान् गोपालकृष्णहङ्गारि
आयुष्मती सरयूः पि.
आयुष्मान् अरुणभट्टः
आयुष्मान् पद्मनाभ अडिगः टि.
आयुष्मती कौसल्या वि. भट्

प्रकाशनवर्षम् : 2016

© राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577139
कर्णाटकराज्यम्

प्रतिः 500

प्रकाशकः

प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी –577139
कर्णाटकराज्यम्

पृष्ठविन्यासः रवीशः एन्

मुद्रणम्
श्री सिरी एण्टर् प्रैसस्, शृङ्गेरी

© All rights are reserved for Publisher,
Provided that contributors are responsible for their respective writing.

श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम् दक्षिणाम्नायश्रीशारदापीठम्,शृङ्गेरी



# श्रीश्रीजगद्गुरु शङ्कराचार्या महासंस्थानम्
# दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी – ५७७१३९

The Administrator
To His Holiness Sri Jagadguru -
Shankaracharya Dakshinamnaya -
Sri Sri Sharada Peetham,
Sringeri – 577139 (Karnataka).

पवित्रक्षेत्रे शृङ्गगिरौ विद्यमानं श्री राजीवगान्धीसंस्कृतविद्यापीठं संस्कृतप्रचारं विदधद् वरीवर्ति। विद्यापीठेऽस्मिन् परुदिव ऐषमोऽपि शारदानाम्नी पत्रिका प्रकाश्यत इति विदित्वा दक्षिणाम्नायशृङ्गगिरिशारदापीठाधीश्वराः जगद्गुरुश्रीभारतीतीर्थमहास्वामिचरणाः नितरां प्रमुदितस्वान्ता अभवन् ।

इयं च पत्रिका अत्रत्यानां छात्राणां प्रज्ञायाः प्रतिभायाश्च दर्पणायते । श्रीशारदाशशिकलावतंसयोरकम्पानुकम्पया पत्रिकेयं हृद्यैः लेखनैर्विभूषिता सहृदयानां चेतांसि रञ्जयतु , विद्यापीठमिदमुत्तरोत्तरमभिवर्धताम् । अत्रत्याः छात्राः सम्यग्विद्यामधीत्य श्रेयोभाजनानि भूयासुरिति श्रीचरणा आशासते ।

इति निवेदयिता

डा. वे. रा. गौरीशङ्करः

**प्रो. पि. एन्. शास्त्री**
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

**Prof. P. N. Shastry**
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



# शुभं संदिशाम

RSKS/VC/MSG/2015-16/428 Date – 11 - 03 – 2016

संस्कृतसुधारसस्याविर्भावः भारतभूमण्डलेऽभूदिति सौभाग्यन्नो भारतीयानाम्। अनेन संवर्धितास्माकं संस्कृतिरपि। तदेवं विद्यमाना संस्कृतिरक्षारूपाध्ययनवल्लरीप्रतिदिनम् उत्तरोत्तरं विकसन्ती, ज्ञानमञ्जरीं प्रकटयन्ती, पूर्णं फलमवश्यं प्रदास्यतीति विश्वासः। सुरभारतीसमुपासकानामस्माकं साम्प्रतिकेऽपि काले युवानस्तेजस्विनश्च शास्त्रमतल्लिकाः सम्भवन्तीत्यतः कारणात् अस्ति पुनर्नवत्वस्यावसरः संस्कृतस्य शास्त्राणां चाध्ययनाध्यापने। राष्ट्रियसंस्कृतसंस्थानस्य स्थापनमपि अनेनैव सार्थक्यं गच्छति। शृङ्गेरीस्थेन राजीवगान्धीपरिसरेण प्रतिहायनमिवास्मिन्नपि हायने वाग्वर्धिनीपरिषत्पक्षतः प्रकाश्यमानायाः पत्रिकायाः शारदायाः प्रकाशनं क्रियत इति श्रुत्वा प्रमोदमनुभवामि। विदुषां परिसरप्राध्यापकानां परिसरच्छात्राणां च चिन्तनमन्थनोद्भूतेन ज्ञाननवनीतेन परिपूता शारदा जिज्ञासून् आनन्दयतीति विषये नास्ति सन्देहः। एतत्कार्ये प्रधानतामावहद्भ्यः परिसरप्राचार्येभ्यः, तत्सहकारिभ्यः वाग्वर्धिनीपरिषदः अध्वदर्शिभ्यः, परिषत्सदस्येभ्यश्च साधुवादान् व्याहरामि। छात्राणां लेखनपाटवमितोऽपि वर्धतामिति भगवतीं शारदाम्बां श्रीश्रीजगद्गुरुचरणांश्च सम्प्रार्थये।

**11–03–2016**
**फाल्गुन–शुक्ल–द्वितीया, शुक्रवासरः**

(प. ना. शास्त्री)
कुलपतिः

56-57, Institutional Area, Janakapuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995, E-Mail: rskspvc@yahoo.com

**प्रो. सुब्रह्मण्यशर्मा**
कुलसचिव
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

**Prof. Subrahmanya Sharma**
The Registrar
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



# शुभाशंसनम्

सनातनसंस्कृतिसंरक्षणे संस्कृतसंरक्षणमपि निहितमिति समैरपि विदित एव विषयः। संस्कृतसंरक्षणेन सनातनधर्ममूलस्य विश्वशान्तेः सर्वधर्माणां च आकरस्य वेदस्य संरक्षणमभिहितमभिज्ञायते। तस्मादेव सार्थकमिदं वचनं 'वेदोऽखिलो धर्ममूलम्'। तदिदं ध्यायं ध्यायं राष्ट्रियसंस्कृतसंस्थानं संस्कृतशास्त्रवाङ्मयस्य अध्ययनाध्यापनानुसन्धानव्यवस्थां प्रकल्पयति। तद्दिशि नितरां सार्थकं नाम दधानः राजीवगान्धीपरिसरः निरन्तरं नवोत्साहेन विविधान् कार्यकलापानायोजयन् प्रतिवर्षमिवास्मिन्नपि हायने शारदाख्यां वार्षिकपत्रिकां प्रकाशयतीति मोदाय कल्पते।

सन्दर्भेऽस्मिन् अस्मत्कुलपतिवर्यान् आचार्य प. ना. शास्त्रिमहाभागान् विदितवेदितव्यान् नमामो वयम्। परिसरप्राचार्यान् अस्मन्मित्रमणीन् आचार्यसच्चिदानन्दवर्यान् अत्र नमामोऽभिनन्दामश्च।

वाग्वर्धिनीपरिषदध्वदर्शिभ्यां गणेशईश्वरसूर्यनारायणभट्टाभ्यां 'राजतां शारदपत्रिकेते' साधुवादेन सह शुभाशिषो वितरामः। श्रीशारदायाः दिव्यानुग्रहेण श्रीचरणानामनुकम्पया च समेधतां परिसरपरिवार इत्याशास्महे।

11-03-2016

(एस्. एस्. शर्मा)

मन्मथ-फाल्गुन-शुक्ल-द्वितीया, शुक्रवासरः

56-57, Institutional Area, Janakapuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995, E-Mail: rskspvc@yahoo.com

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139



# प्राग्भणितिः

## धीनामवित्र्यवतु

अपौरुषेयस्य भगवतो वेदस्य यथावदर्थावगमाय कुम्भीधाना अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण सर्वविद्यायाः पारङ्गता ऋषयो मन्त्रद्रष्टारो लोकानुग्रहपरिपूर्णान्तरङ्गाः शास्त्रविद्यां निरमिमत । पूर्वजानां तपसा श्रमेण च साधितेयं वरयति सततपरिश्रमशीलान् श्रद्धावतस्तत्त्वजिज्ञासूनुपासकान् । आत्मज्ञानावतारार्थं सर्वशास्त्रसमुद्यमः इति वचनेन सर्वाण्यपि शास्त्राणि आत्मज्ञानैकलक्ष्याणीति न तिरोहितं शेमुषीमताम् । तदिदं शास्त्रोद्देश्यं सम्यगाकलय्य 'योऽनूचानः स नो महान्' इति ध्येयवाक्यं बिभ्रत् स्वोद्देश्यं विष्वङ्निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानं शास्त्रमयीं वाचं त्रातुकामं स्वाध्यायप्रवचनप्रवर्तनाय भरतवर्षस्य नानाऽशासु स्वीयान् नैकान् परिसरान् प्रतिष्ठाप्य गैर्वाण्या वाण्याः वरिवस्यां विदधद्विलसति ।

राष्ट्रियसंस्कृतसंस्थानस्य द्वादशसु परिसरेषु श्रीशङ्करभगवत्पादाध्युषितायां तपोभूमौ शृङ्गेर्यां कर्णाटदेशस्थायां विराजमानो राजीवगान्धीपरिसरो विविधशास्त्रविशारदैरध्यापकैर्मण्डितो जिज्ञासुभिर्विनीतैश्छात्रैर्विभूषितः सर्वाङ्गीणविकाससम्पादकनानाविधकलापैर्विशिष्टं स्थानमावहति । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् इत्याम्नायगिरं सश्रद्धं परिपालयद्भिराचार्यैः परिसरीयेषु सर्वेष्वपि कलापेषु अहमहमिकया भागभाग्भिरन्तेवासिभिश्च अक्षरैर्विन्यस्तैः प्रतिभाप्रसूतैर्लेखनैर्गुणवतीयं शारदा नाम्नी पत्रिका प्रतिवर्षमिव अस्मिन्नपि हायने प्राकाश्यन्नीयत इति नितरां मोदामहे । अस्याञ्च पत्रिकायां परिसरस्य प्रेक्षावतां प्राध्यापकानां वैदुष्यपूर्णा नानाशास्त्रीयाः, छात्राणामपि भावगभीरा रुचिराश्च लेखा न्यबन्धिषत । उपाध्यायाद्गृहीतस्य ज्ञानस्य अक्षरविन्यासे च्छात्राणां लेखनकौशलसंवर्धनं स्वीयबुद्धिवैशद्यमन्येषां जिज्ञासूनामुपकारश्च भवतीत्याशयं लक्ष्यीकृत्य प्रवृत्तेयं शारदापत्रिका नूनं पठितॄणां स्वान्तमाह्लादयतीति विश्वसिमः ।

पत्रिकामेनामामूलमवेक्ष्य रुचिरां शुभाशंसां प्रेषितवद्भ्यो सुरभारतीसमाराधनतत्परेभ्यःपरिसरस्य सर्वाङ्गीणविकासाय सततं दत्तावधानेभ्योऽस्मत्कुलपतिभ्यः आचार्य प. ना. शास्त्रिवर्येभ्यः मदीया हार्दी कृतज्ञता साञ्जलिभरं समर्प्यते । अस्माकं संस्थानस्य कुलसचिवेभ्यः अस्मद्विकासे बद्धादरेभ्यो बहुविद्याविशारदेभ्यो आचार्य सुब्रह्मण्यशर्मभ्यः प्रणतिततीः समर्पयामः ।

शारदापत्रिकेयं यथाकालं समाविष्कारणीयेति सङ्कल्पं विधाय सत्रादितः परिश्रान्तवद्भ्यां वाग्वर्धिनीपरिषदोऽध्वदर्शिभ्यां गणेशईश्वरभट्ट–सूर्यनारायणभट्टाभ्यां धन्यवादान् आचक्ष्महे। परिश्रमसाध्येऽस्मिन् कर्मणि सहकृतवद्भ्यः पत्रिकासम्पादनसमितिसदस्येभ्य आचार्येभ्यः छात्रेभ्यश्च मङ्गलं कामयामहे।

अस्मत्परिसरस्य सर्वविधश्रेयसे सफलतायै च निदानं वागधिष्ठात्र्याः जगदम्बायाः शारदामातुः अशेषकृपाविशेषः तथैव ज्ञानतपोमूर्तीनां जगद्गुरूणां अनन्तश्रीविभूषितानां श्रीश्रीभारतीतीर्थ–महास्वामिनां, तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीमहास्वामिनां च परिपूर्णानुग्रहविशेषश्चेति श्रीशारदागुरुचरणान् सभक्तिश्रद्धं वन्दामहे।

इत्थं विद्वज्जनविधेयः।

ए.पी. सच्चिदानन्दः

(ए.पी. सच्चिदानन्दः)



डा. गणेश ईश्वर भट्टः



डा. सूर्यनारयणभट्टः

# सम्पादकीयम्

श्रुतिशास्त्रार्थविज्ञानभारतिं मनुजाकृतिम् ।
भारतीं भारतीतीर्थसंज्ञितां हृदि भावये ॥
विधूतपापं वेदान्तविद्याम्बोधिविधुं गुरुम् ।
विरागभूषणं वन्दे विधुशेखरभारतीम् ॥

प्रेक्षावत्प्रतिभाप्रसूतशास्त्रार्थविचारप्रफुल्लप्रसूनमाला ऐषमः शारदा तत्त्वदर्शनासक्तदृष्टीनां जनानां दृष्टिपथाभ्यर्णमवतीर्णा इति मानसमिदानीं मोमुद्यते । प्राचीनाः परमर्षयो हि शास्त्रार्थज्ञानपूर्वककर्मानुष्ठानेन विशुद्धसत्त्वाः साक्षात्कृतधर्माणः शास्त्ररक्षैकदीक्षाः तत्वज्ञानसाधनं शास्त्रमेव परमं प्रमाणं मेनिरे । तच्च ऋग्वेदादि अनेकविद्यास्थनोपबृंहितं महत् शास्त्रं प्रत्यक्षानुमानानवगतेष्टानिष्टप्राप्तिपरिहारोपायप्रकाशकं प्राणिनाम् अभ्युदयनिःश्रेयससाधकं सर्वेषाम् उपादेयम् । वेदार्थज्ञानोत्पत्तौ उपकरणभावेन व्याकरणादिशास्त्राण्यपि अध्ययनसरणौ स्थानमलङ्कुर्वन्ति । एतेषां सर्वेषां याथार्थ्येन अवगमनेन अनुष्ठानेन च मनुष्यः ऐहिकीं पारलौकिकीं च श्रेयःपरम्पराम् आसादयति । यथा कश्चित् पुरुषः चक्षुषी विना पदार्थान् द्रष्टुं न प्रभवति, तथैव शास्त्राणि विना अलौकिकान् विषयान् नावगच्छति । अत एवोक्तम् –

अनेकसंशयोच्छेदि सर्वस्यार्थस्य दर्शकम्
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ इति ।

शास्त्रीयार्थप्रतिपादिका मनोहारिणी अमरा अमरवाणी अलौकिकविषयैः सह लौकिकानपि भूयसोऽर्थान् प्रत्याययति । दर्शनकाव्यनाटकेतिहासपुराणसंबद्धा असङ्ख्याकाः विषयाः संस्कृतभाषया निबद्धाः ये अद्यावधि मनीषिणां मनसि अभिनवान् विचारान् आविर्भावयन्ति । यदा इमां भाषां समुपासीनाः विद्वांसः विद्यार्जनरताश्च आर्षविद्यापरिरक्षितान् न्यायपरीक्षितान् विषयान् ग्रन्थरूपेण निबध्नन्ति, तदा बहवो हि विविदिषवः वैविध्योपेतान् विषयान् अधिगच्छन्ति । नवनवोन्मेषशालिनीं प्रज्ञाम् उपयुज्य अभिज्ञैः लिखिताः लेखाः पाठकानामिव लेखकानामपि प्रज्ञां विशदयतीति विद्वांसः विदन्त्येव । संस्कृतभाषया निबद्धं ग्रन्थं दृष्ट्वा न केवलं संस्कृतज्ञाः ज्ञानपिपासवो भवन्ति, अपि तु असंस्कृतज्ञा अपि अस्याः भाषायाः सांप्रतिकं यशोवैभवं ज्ञातुं प्रभवन्ति ।

इममर्थं मनसि समाकलय्य राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरः नैकेभ्यः वर्षेभ्यः शारदानाम्नीं वार्षिकीं पत्रिकां प्रकाशयन् वरीवर्ति । अत्र न केवलं सुरगिरा, अपि तु कन्नड–आङ्ग्ल–हिन्दीभाषाभिरपि विविधाः लेखाः निबद्धाः । परिसरस्य यशोवैभवद्योतकानि चितानि चित्राण्यपि अत्र निवेशितानि । अस्य पुस्तकस्य प्रकाशने अनुमतिं प्रदाय शुभसन्देशं च वितीर्य आवां समुदबोधयन् राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः आचार्याः परमेश्वर नारायण शास्त्रिवर्याः, कुलसचिवाः आचार्याः सुब्रह्मण्यशर्ममहाभागाः तथा परिसरप्राचार्याः आचार्याः ए.पि. सच्चिदानन्दमहोदयाश्च । तेभ्यः सप्रश्रयं प्रणामान् निवेदयावः । लेखान् प्रदाय उपकृतवद्भ्यः परिसरस्य प्राध्यापकेभ्यः वन्दनानि, छात्रेभ्यः साधुवादांश्च वितन्वः । पत्रिकायाः पृष्ठविन्यासादिकार्येषु कृतसाहाय्येभ्यः सङ्गणकविभागस्य प्राध्यापकेभ्यः श्री एन्. रवीशवर्येभ्यः हार्दान् धन्यवादान् प्रकटयावः । लेखानां टङ्कनादिकार्येषु सहकृतवद्भ्यः अरुणभट्ट–पद्मनाभअडिग–गोपालकृष्णहङ्गारि–रवीन्द्रकोमार–सरयू–कौसल्या–योगिता–महेश्वरी–प्रदीपभट्ट प्रभृतिभ्यः परिसरच्छात्रेभ्यः श्रीमत्यै सौम्यायै च धन्यतामाविष्कुर्वः । येषां दिव्यानुग्रहः सर्वात्मना परिसरमिमं संरक्षति, तेषां ज्ञानविरागतपोधनानां जगद्गुरूणां दक्षिणाम्नायशृङ्गेरीशारदापीठाधीश्वराणां श्रीश्रीभारतीतीर्थमहास्वामिनां तथा तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीमहास्वामिनां च चरणनलिनयोः नमसां साहस्रं समर्पयावः ।

**सम्पादकौ**
**डा. गणेश ईश्वर भट्टः**
**डा. सूर्यनारायणभट्टश्च ।**

# सम्पादनसमितिः


डा. गणेश ईश्वर भट्टः


डा. सूर्यनारयणभट्टः


डा. राजेशकुमारशुक्लः


डा. कविता एस्.


श्री विनय् एम्. एस्.


श्री रवीशः एन्.


कु. गणेशकृष्णभट्टः


कु. उमा वि. भट्


कु. नागपतिहेगडे


कु. सूर्यहेब्बारः ए.


कु. अरुणभट्टः


कु. गोपालकृष्णहङ्गारी


कु. पद्मनाभ अडिगः टि.


कु. सरयूः पि.


कु. कौसल्या वि. भट्

# ज्यौतिषविभागः






प्रो. ए. पि. सच्चिदानन्दः
विभागाध्यक्षः

डा. रामकृष्णपेजत्तायः
संविदध्यापकः

डा. मुरलिकृष्णः टि
संविदध्यापकः

श्री अनिरुद्धनारायणशुक्लः
अतिथ्यध्यापकः

# अद्वैतवेदान्तविभागः






प्रो. महाबलेश्वर पि. भट्टः
विभागाध्यक्षः

डा. गणेश ईश्वर भट्टः
सहायकाचार्यः

डा. श्रीकरः जि. एन्.
संविदध्यापकः

डा. गणपति वि. हेगडे
संविदध्यापकः

# मीमांसाविभागः





प्रो. सुब्राय वि. भट्टः
विभागाध्यक्षः

डा. सूर्यनारायणभट्टः
सहायकाचार्यः

डा. वेङ्कटेशताताचार्यः
सहायकाचार्यः

# साहित्यविभागः



**प्रो. इन्दिरा पि.**
विभागाध्यक्षा



**डा. राघवेन्द्रभट्टः**
सहायकाचार्यः



**डा. चन्द्रकला आर्. कोण्डि**
सहायकाचार्या



**डा. विनय् कुमार् कोम्पेल्ली**
संविदध्यापकः



**डा. श्रीनिवासमूर्तिः**
अतिथ्यध्यापकः

# नव्यन्यायविभागः



**प्रो. के. ई. मधुसूदनन्**
विभागाध्यक्षः



**डा. वि. नवीनहोळळः**
सहायकाचार्यः



**श्री श्यामसुन्दरः ए.**
संविदध्यापकः



**श्री आर्. नवीन्**
संविदध्यापकः

# नव्यव्याकरणविभागः



**डा. सि. एस्. एस्. नरसिंहमूर्तिः**
विभागाध्यक्षः



**डा. चन्द्रशेखरभट्टः**
सहायकाचार्यः



**डा. कृष्णानन्तपद्मनाभम्**
सहायकाचार्यः



**डा. प्रमोदभट्टः**
अतिथ्यध्यापकः



**विदुषी सविता आर्या**
अतिथ्यध्यापिका

# शिक्षाशास्त्रविभागः



**डा. चन्द्रकान्तः**
विभागाध्यक्षः



**डा. रामचन्द्रुल बालाजी**
सहायकाचार्यः



**डा. हरिप्रसादः के.**
सहायकाचार्यः



**डा. गणेश टि. पण्डितः**
सहायकाचार्यः

# शिक्षाशास्त्रविभागः



डा. वेङ्कटरमण एस्. भट्टः
सहायकाचार्यः



डा. नारायणवैद्यः
अतिथ्यध्यापकः



डा. प्रमोदकुमारबुटोलिया
अतिथ्यध्यापकः

# आधुनिकविषयविभागः



डा. राजेशकुमारशुक्लः
संविदध्यापकः (हिन्दीभाषा )



डा. कविता एस्
संविदध्यापिका (कन्नडभाषा)



डा. प्रभाकरः एम्. ए.
संविदध्यापकः (इतिहासः)



श्री. विनय् एम्. एस्.
संविदध्यापकः (आङ्ग्लभाषा)



श्री रामचन्द्रः एच्. डी.
अतिथ्यध्यापकः (क्रीडा)



श्री शशिधरः के. वि.
अतिथ्यध्यापकः (सङ्गणकम्)



श्री रवीशः एन्.
अतिथ्यध्यापकः (सङ्गणकम्)

# मुक्तस्वाध्यायपीठम्







| डा. चन्द्रकान्तः | पृथ्विराजः के. | सन्दीपः |
|---|---|---|
| अध्वदर्शी | डि. ई. ओ. | एम्. टी. एस्. |

## विविधपरिषदाम् अध्वदर्शिनः





### वाक्यार्थपरिषत्

आचार्यः महाबलेश्वर पि. भट्टः
डा. रामचन्द्रुल बालाजी

### स्पर्धिष्णुपरिषत्

आचार्यः सि. एस्. एस्. नरसिंहमूर्तिः
डा. वेङ्कटेशताताचार्यः









### श्रीशारदाविशिष्टव्याख्यानमाला

डा. चन्द्रशेखरभट्टः
डा. हरिप्रसादः के.

### क्रीडाविभागः

डा. चन्द्रकान्तः
श्री एच्. डि. रामचन्द्रः





# वाग्वर्धिनीपरिषत्





डा. गणेश ईश्वर भट्टः
अध्वदर्शी

डा. सूर्यनारायणभट्टः
अध्वदर्शी

## परिषत्सदस्याः








| | | | | | |
|---|---|---|---|---|---|
| गणेशकृष्णभट्टः<br>कार्यदर्शी | उमा वि. भट्<br>कार्यदर्शिनी | मञ्जुनाथभट्टः<br>सांस्कृतिककार्यदर्शी | अहल्या ए. भट्<br>सांस्कृतिककार्यदर्शिनी | नागपति हेगडे<br>स्पर्धिष्णुपरिषत्कार्यदर्शी | सूर्यहेब्बारः<br>स्पर्धिष्णुपरिषत्कार्यदर्शी |








| | | | | | |
|---|---|---|---|---|---|
| गोपालकृष्णहङ्गारि<br>अन्तर्जालनिर्वाहकः | सरयूः पि.<br>अन्तर्जालनिर्वाहिका | अरुणभट्टः<br>पत्रिकाकार्यदर्शी | पद्मनाभ अडिगः टि.<br>पत्रिकाकार्यदर्शी | कौसल्या वि. भट्<br>पत्रिकाकार्यदर्शिनी | ध्रुवः के.<br>क्रीडाकार्यदर्शी |








| | | | | | |
|---|---|---|---|---|---|
| तुषार् रञ्जन् चौहान्<br>क्रीडाकार्यदर्शी | निखिता नायक्<br>क्रीडाकार्यदर्शिनी | अजितसिंहः<br>पर्यावरणकार्यदर्शी | नागहर्षिणी आर्.<br>पर्यावरणकार्यदर्शिनी | रवीन्द्रकोमारः<br>शारदाप्रसादव्यवस्थापकः | कार्तिकेशः के.<br>शारदाप्रसादव्यवस्थापकः |

# कक्ष्याप्रतिनिधयः



**शशाङ्क भट्टः**
प्राक्शास्त्रिप्रथमवर्षम्



**दुर्गा श्रीवत्सा**
प्राक्शास्त्रिप्रथमवर्षम्



**श्रीशसमीरः के. एस्.**
प्राक्शास्त्रिद्वितीयवर्षम्



**क्षमा कामत् के.**
प्राक्शास्त्रिद्वितीयवर्षम्



**शरण्यः पि.**
शास्त्रिप्रथमवर्षम्



**ऐश्वर्या**
शास्त्रिप्रथमवर्षम्



**गणेशभट्टः**
शास्त्रिद्वितीयवर्षम्



**श्रीलता एच्. एस्.**
शास्त्रिद्वितीयवर्षम्



**प्रमोदः जि. के.**
शास्त्रितृतीयवर्षम्



**महेश्वरी**
शास्त्रितृतीयवर्षम्



**राजेशभट्टः**
शिक्षाशास्त्रिप्रथमवर्षम् (अ)



**सुजाता नायक्**
शिक्षाशास्त्रिप्रथमवर्षम् (अ)



**मोहित् जोशी**
शिक्षाशास्त्रिप्रथमवर्षम् (ब)



**स्वर्णलता मुदुली**
शिक्षाशास्त्रिप्रथमवर्षम् (ब)



**गणेशप्रसाद के. एस्.**
आचार्यप्रथमवर्षम्



**वाणी एम्. हेगडे**
आचार्यप्रथमवर्षम्



**गोविन्द जि. हेगडे**
आचार्यद्वितीयवर्षम्



**जिशा आर्.**
आचार्यद्वितीयवर्षम्

# कार्यालयीया: सदस्या:


**श्री नवीन् कुमार गुप्ता**
अनुभागाधिकारी


**श्री एस्. के. महापात्रः**
कार्यालयसहायकः


**श्री घनानन्दत्रिपाठी**
सहायकग्रन्थपालः


**श्री गुरुराजभट्टः**
यू. डि. सि.


**श्री एस्. आर्. चन्द्रशेखरः**
एल्. डि. सि.


**श्रीमती मञ्जुळा**
एल्. डि. सि.


**श्री बेनुधरमोहापात्रः**
निवृत्तसहायकग्रन्थपालः


**श्रीमती शृतिश्रीः**
डि. ई. ओ.


**श्रीमती सौम्या**
डि. ई. ओ.


**श्री दिनेशः**
एम्. टि. एस्.


**श्री कुमारः**
एम्. टि. एस्.


**श्रीमती सिद्दम्मा**
एम्. टि. एस्.


**श्री शिवण्णः**
एम्. टि. एस्.


**श्री एम्. रफीकः**
एम्. टि. एस्.


**श्रीमती जयम्मा**
स्वच्छताकर्मचारिणी


**श्रीमती तिम्मम्मा**
स्वच्छताकर्मचारिणी


**श्री उमेशः**
छात्रावाससहायकः

## संस्कृतविभागः


| लेखः | लेखकः | पृष्ठसङ्ख्या |
|---|---|---|
| 1. लीलाकैवल्यम् | प्रो. महाबलेश्वर पि. भट्टः | 03 |
| 2. पूर्वमीमांसायामीश्वरः | प्रो. सुब्राय वि. भट्टः | 06 |
| 3. शृङ्गारसुन्दरभाणस्य परिचयः | प्रो. इन्दिरा. पि | 10 |
| 4. चाटुधाराचमत्कारः | डा.सी.एस्.एस्.नरसिंहमूर्तिः | 16 |
| 5. समूहगतिशास्य परिचयः | डा. चन्द्रकान्तः | 19 |
| 6. वेदस्वरूपविमर्शः | डा. रामचन्द्रुलबालाजी | 23 |
| 7. तत्त्वान्वेषणे साधनसरणिः | डा. नवीनहोळ्ळः | 27 |
| 8. अथ कथम् एकापूपि इति? | डा. चन्द्रशेखरभट्टः | 34 |
| 9. पदोपस्थापकपरिभाषान्तरम् अचश्च | डा. सि. हेच्. कृष्णानन्तपद्मनाभम् | 37 |
| 10. सङ्गीतरत्नाकरे वेदान्तार्थनिरूपणम् | डा. गणेश ईश्वर भट्टः | 41 |
| 11. समस्यासन्देशीयम् | डा. राघवेन्द्रभट्टः | 47 |
| 12. रामराज्यार्थं भरतोपदेशः | डा. हरिप्रसादः के. | 55 |
| 13. अर्थान्तरस्य विन्यासे कालिदासो विशिष्यते | डा. चन्द्रकला आर्. कोण्डि | 60 |
| 14. तन्त्रानुष्ठानविचारः | डा. सूर्यनारायणभट्टः | 68 |
| 15. कृत्स्नप्रसक्त्यधिकरणम् | डा. श्रीकरः जी. एन्. | 72 |
| 16. विधिविचारः | डा. गणपति वि. हेगडे | 74 |
| 17. महिमभट्टकाव्यलक्षणम् | डा. कोम्पल्लि विनयकुमार् | 77 |
| 18. विनापदसमभिव्याहृतद्वितीयाविभक्त्यर्थविचारः | डा. नवीनः आर्. | 81 |
| 19. वृत्तिपदार्थविमर्शः | श्री. श्यामसुन्दरभट्टः | 83 |
| 20. श्रीपतेः प्रस्तुतिमाधुर्यम् | डा. रामकृष्णपेजत्तायः | 88 |
| 21. हस्तलेखग्रन्थेषूपयुक्ताः लिपयः | डा. मुरलिकृष्ण टि. | 96 |
| 22. स्त्रीयाः पुंवदित्यादिसूत्रार्थविचारः | डा. प्रमोद भट्टः | 102 |
| 23. रसाभासः | डा. श्रीनिवासमूर्ति | 105 |
| 24. दार्शनिमप्रत्यक्षाधिगमः | डा. प्रमोदकुमार् बुटोलिया | 108 |
| 25. ज्योतिषशात्रे रोगनिर्णयः | श्री. अनिरुद्ध शुक्ल | 113 |
| 26. पाणिनीयं सुभाषितम् | विदुषी एल्. सविता आर्या | 119 |
| 27. देवताधिकरणम् | अभिनन्दन भट्टः | 123 |




ISSN : 2320-740X

| | | |
|---|---|---|
| 28. लघुपाणिनिये शिक्षाकाण्डस्य विवेचनम् | आनन्द पण्ड्या | 125 |
| 29. पद्मभूषण मीमांसा-केसरी महामहोपाध्याय-श्रीपट्टाभिरामशास्त्रिविरचितमीमांसानय-मञ्चर्यनुसारेण शब्दान्तरात् कर्मभेद विवेकः | भरत हर्डिकरः | 127 |
| 30. आत्यन्तिकीदुःखनिवृत्तिः अपवर्गः | नारायण रायकरः | 129 |
| 31. मुहूर्तदोषाः | पवनः | 132 |
| 32. मीमांसादर्शने मोक्षविचारः | प्रशान्त गाँवकरः | 136 |
| 33. आनन्दमयाधिकरणम् | पुष्पा हेगडे | 138 |
| 34. शास्त्रमालावृत्यनुसारं कर्मभेदनिरूपणम् | राजेन्द्रभट्टः | 140 |
| 35. वैशेषिकदृष्ट्या आधुनिकरासायनिकशास्त्रे द्रव्यविवेचनम् | राकेशः पि. | 143 |
| 36. शरनिरूपणम् | रमानन्दभट्टः | 147 |
| 37. हल्ङ्याबिति सूत्रे अपृक्तग्रहणविचारः | शशाङ्क ति. भट्टः | 150 |
| 38. नष्टजातकम् | श्रीपतिः | 152 |
| 39. अष्टकवर्गः | सुब्रह्मण्यभट्टः | 154 |
| 40. संयोगस्य अव्याप्यवृत्तित्वम् | सुनिता भट् | 156 |
| 41. हैन्दवीयजयघोषः | उमामहेश्वरः एन्. | 159 |
| 42. शेषलक्षणाधिकरणम् | विद्याशेखरः | 160 |
| 43. शुल्बसूत्रबीजगणितयोः करणीस्वरूपम् | यज्ञदत्तः | 161 |
| 44. प्रत्यक्षप्रमाणम् | वराज घिमिरे | 166 |
| 45. संस्कृतवर्णमालायां वर्णाः | अरुणभट्टः | 170 |
| 46. अयनांशविचारः | गणेशकृष्ण भट्टः | 173 |
| 47. अन्यथाख्यातिः | नागहर्षिणी | 175 |
| 48. युवजनेभ्यः स्वामीविवेकानन्दानां सन्देशः | नागपतिः हेगडे | 177 |
| 49. जीवानां विकासक्रमः | राजेश हेगडे | 179 |
| 50. स्नानपदार्थ विचारः | टि. के. नरसिंहन् | 180 |
| 51. भगवद्गीता एवं कोरान्सरिफयोः केचन समधर्माः | अमिर् बाग् | 182 |
| 52. एकवाक्यत्वम् | वाणी हेगडे | 183 |
| 53. विभिन्नाचार्याणां मते काव्यलक्षणानि | मोहित् जोशी | 186 |




ISSN : 2320-740X

54. संस्कृतभाषायाः महत्वम् | श्रीवल्ली बी. | 187
55. शरीरमाद्यं खलु धर्मसाधनम् | महेशः | 189
56. सुभाषितम् | मनोजः | 192

## हिन्दी विभाग

1. हिन्दी कि विश्वव्यापकता | डा. राजेश कुमार शुक्ल | 197
2. विशिष्टाद्वैतदर्शन | युवराज घिमिरे | 201
3. "पैसों की खातिर ईमान बेच देना" | अजीत सिंह | 205
4. प्राचीन-आधुनिक दृष्टिकोन से भारतीय लोकतंत्र | अभिषेक परगाँई | 206
5. वक्त मिला तो सोचेंगें | मुनीषगौतम | 208
6. भ्रूणहत्या | सुमित कुमार झा | 209
7. तुम करना मुझको माफ, तुम्हें मैं प्यार नहि दे पाऊँगा | घनश्याम दहाल | 210
8. पंछी | शुभम शर्मा | 211

## ENGLISH SECTION

1. Pearl Buck`s The Good as a Feministic Text | Sri. Vinay M.S. | 215
2. Facebook Etiquettes | Sri. Raveesha N. | 219
3. Yogasana | Sri. Ramachandra H.D | 224
4. Women Education in Kenya | Rajat Suyal | 225
5. Oh My Dear Friend! | Maheshwari | 228
6. Beautiful Quotes | Venkatesh | 229
7. A Page of My Diary | Yogita D. Chhatre | 230
8. Concept of Universal Tolerence in Indian Culture | Kausalya Vittal Bhat | 232
9. The Laughter | Sharanya P. | 233
10. The Black Tuesday : A Day of Terror | Sowjanya | 234
11. My Childhood Days | Kshama Kamath K. | 236
12. Achieving Goal | Ch. Durga | 237



ISSN : 2320-740X

| | | | |
|---|---|---|---|
| 13. | Challenges in National Integration | Sudarshan M.S. | 239 |


## ಕನ್ನಡ ವಿಭಾಗ

| | | | |
|---|---|---|---|
| 1. | ಅಳಿವರರು | ಡಾ. ರಾಘವೇಂದ್ರ ಭಟ್ | 243 |
| 2. | ಸ್ರ್ತೀ ಮತ್ತು ಆಧುನಿಕ ಜಗತ್ತು | ಡಾ. ಕವಿತಾ ಎಸ್ | 245 |
| 3. | ಮಧ್ಯಮಲೆನಾಡಿನಲ್ಲಿ ಅಗ್ರಹಾರಗಳ ಬೆಳವಣಿಗೆ | ಡಾ. ಎಂ. ಎ. ಪ್ರಭಾಕರ | 249 |
| 4. | ವಾತ್ಸಲ್ಯ | ನರಸಿಂಹಶಾಸ್ತ್ರೀ | 251 |
| 5. | ವಾತ್ಸಲ್ಯ | ಕೀರ್ತಿ ಎನ್. ಹೆಗಡೆ | 252 |
| 6. | "ವಾತ್ಸಲ್ಯ" | ಅಕ್ಷಯ ಭಟ್ಟ | 253 |
| 7. | ಜಯಂತಿ ಆಚರಣೆಯ ಔಚಿತ್ಯ | ರಾಘವೇಂದ್ರ ದಾನಗೇರಿ | 255 |
| 8. | ಜಯಂತಿ ಆಚರಣೆಯ ಔಚಿತ್ಯ | ಗಣೇಶ ಕೃಷ್ಣ | 258 |
| 9. | ಜಯಂತಿ ಆಚರಣೆಯ ಔಚಿತ್ಯ | ಚಂದನಾ ದೀಕ್ಷಿತ್ | 260 |
| 10. | ಬಿಂಬ-ಪ್ರತಿಬಿಂಬ | ಅರುಣ ಭಟ್ಟ. ಭರಣಿ | 262 |
| 11. | ಬಣ್ಣದ ಬದುಕಿನ ಪರದೆ ಸರಿದಾಗ | ಸುನೀಲ ಭಟ್ಟ. ಕಕ್ಕಳ್ಳಿ | 263 |
| 12. | ಬದುಕು | ಪದ್ಮನಾಭ ಅಡಿಗ ಟಿ. | 264 |
| 13. | ಅರಿಷಡ್ವರ್ಗಗಳ ಪಳಗಿಸುವಿಕೆ | ಅಶ್ವಿನ್. ಗ. ಭಟ್ಟ | 265 |
| 14. | ಎರಡಕ್ಷರದ "ನರ"ನ ಕತೆ | ಚರಣ್ ರಾಜ್ ಟಿ. ಎಸ್ | 266 |
| 15. | ವರ್ಣಕ್ಕೆ ಜಾತಿತರವಲ್ಲ | ಮಹೇಂದ್ರ ಭಟ್ಟ | 267 |
| 16. | ಕಾಲನ ಮಾಯೆ.!? | ನವನೀತ ಕೃಷ್ಣ | 268 |
| 17. | ಅಂತರಿಕ್ಷಯುಗದಲ್ಲಿ ಚಂದ್ರನ ಅನ್ವೇಷಣೆ | ಸೌಜನ್ಯ | 269 |
| 18. | ಉದಿಸುವನು ಸೂರ್ಯ ನಮ್ಮ ಮನದಂಗಳದಿ | ಶ್ರೀಶ ಸಮೀರ ಕೆ. ಎಸ್. | 270 |
| 19. | ಮಮತೆಯ ಮಾತೆ-ತಾಯಿ | ಯಶಸ್ವಿನೀ | 271 |




ISSN : 2320-740X

# संस्कृतविभागः



[redacted]

ISSN : 2320-740X

# लीलाकैवल्यम्

✍आचार्यः पि. महाबलेश्वरभट्टः
अद्वैतवेदान्तविभागाध्यक्षः

**यदविद्याविलासेन भूतभौतिकसृष्टयः ।**
**तन्नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥**

तत्र तावत् "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति खलु न्यायवित्समयः । किमपि लौकिकं वैदिकं वा कार्यं कर्तुं प्रवृत्तेः प्राक् प्रयोजनं विचारयन्ति प्रेक्षावन्तो जनाः । सति प्रयोजने प्रवर्तन्ते असति न प्रवर्तन्ते । अत एव शास्त्रारम्भे अनुबन्धचतुष्टयं निर्दिशन्ति, यत्र प्रयोजनमन्यतमं, प्रधानञ्च समस्ति । अधिकारिविषयप्रयोजनसंबन्धाख्यम् अनुबन्धचतुष्टयं सुविदितचरं शास्त्रविदां प्रपञ्चे ।

अथ चतुर्लक्ष्ण्यां शारीरकमीमांसायां समन्वयाख्ये प्रथमलक्षणे ब्रह्मकारणवादः सयुक्तिकं सप्रमाणं सूत्रभाष्यकृद्भ्यां प्रत्यपादि । चेतनं ब्रह्मैव सर्वज्ञं सर्वशक्तिमहामायं परिदृश्यमानस्य नामरूपात्मकस्योच्चावचप्रपञ्चस्य उपादानं निमित्तकारणं चेति अद्वैतवादः औपनिषत् सिद्धान्तः । शुद्धान्तस्यास्य नैकधा स्मृतियुक्तिविरोधे निराकृतेऽपि अन्यथा पुनः तेन कारणवादः समाक्षिप्यते । "न प्रयोजनवत्वात्" (ब्र.सू. २-१-३२) इति बादरायणसूत्रं पूर्वपक्षी विचारमित्थं प्रस्तौति – लोके प्रेक्षावतां चेतननां प्रवृत्तिः प्रयोजनपूर्विका । अविद्यमाने प्रयोजने अल्पायाससाध्यां कृतिमपि न करोति विवेकी । किमुत गुरुतरसंरम्भाम् । "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति खलु न्यायः । तथा च नित्यतृप्तः सर्वज्ञः सर्वशक्तः किमर्थं बहुलायाससाध्यां जगत्सृष्टिं विधत्ते । ईश्वरस्य प्रवृत्तौ प्रयोजनविचारे क्रियमाणे सुखप्राप्तिर्वा दुःखनिवृत्तिर्वा प्रयोजनं भवेत् । नित्यतृप्तस्य देवस्यैष स्वभावोऽयम् । उभयमपि न घटते । "आप्तकामस्य का स्पृहा?" इति सत्संप्रदायविदां वचनात् । नित्यनिरतिशयानन्दस्वरूपस्य प्रयोजनचिन्ता न प्रयोजनकरी । संसारिणामिव परमेश्वरस्यापि प्रवृत्तिः प्रयोजनपूर्विका यत् ईश्वरत्वं तस्य । अपैति संसारित्वं बलादायाति । अतः सृष्टौ प्रयोजनं न पश्यामः ।

"न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यम्" इति गीतासु स्मर्यते । (भ. गी.)"

अथ प्रयोजनमन्तरेण सर्वज्ञस्य ईश्वरस्य सृष्टिकर्मणि प्रवृत्तिः पूर्वोक्तन्यायविरुद्धा । तर्हि सर्वज्ञत्वं परिहासास्पदं भजते । उन्मत्तप्रवृत्तितुल्या स्यात् । सर्वज्ञत्वबोधिकाः 'यः सर्वज्ञः स सर्ववित्' इत्येवं जातीयकाः श्रुतयः कुप्येरन् । अतः चेतन कारणावादः लौकिकन्यायविरोधात् उपेक्षणीयः । अचेतनकारणवादोपेक्षणीया इति सृष्टेः प्राक् जीवानामभावात् परप्रयोजनकल्पनापि काशकुशावलम्बनकल्पा । अत्रोच्यते समाधिः – "लोकवत्तु लीलाकैवल्यम्" (ब्र. सू. २-१-३३) इति पारमर्षसूत्रम् । भगवता



ISSN : 2320-740X

[redacted]

बादरायणेन प्राणायि । लोकवत् – तु लीलाकैवल्यम् इति पदविभक्तिः । तु शब्दः प्रयोजनाभावशङ्कनिरासकः । लौकिकन्यायविरोधाक्षेपप्रक्षेपकः । यत्र यत्र प्रेक्षावती प्रवृत्तिः तत्र सर्वत्र नियतप्रयोजनपूर्वकत्वं नास्ति । लोककवत्– इति सौत्रं पदं दृष्टान्तम् उपस्थापयति । यथा कश्चन चक्रवर्ती भूपालः तत् प्रधानमात्यो वा सर्वसुखसाधनसम्पन्नः प्रयोजनानन्तरम् अनपेक्षैव क्रीडाविहारादिषु प्रवर्तमानो दृश्यते । न च राजप्रभृतयः विवेकवर्जिताः उन्मत्ताः मन्दमतयो वा भवन्ति । अशिक्षिताः न स्युः । लीला एव क्रीडामात्रं तेषां प्रवृत्तिः । न सुखप्राप्त्यर्था दुःखनिवृत्त्यर्था वा । किञ्च श्वाशोच्छवास प्रवृत्तयः विना बाह्यं प्रयोजनं स्वभावतः प्रवर्तन्ते । किञ्चित् च क्वचित् सन्दर्भे हसन्ति, क्वचित् च रुदन्ति लोके प्रज्ञावन्तोऽपि जनाः । न च हसनरोदनादीनां प्रयोजनं विचारयन्ति विवेकिनः । कारणं पृच्छेयुः । एवं जगद्बिम्बविरचनायामपि प्रयोजनं विना स्वभावादेव प्रवृत्तिः सिध्यति । लीलाकैवल्यम् – लीला मात्रम् । अल्पमतीनाम् अल्पशक्तीनाम् अस्माकं मानवानां प्रपञ्चपरिचिन्तनागुरुतरसंरम्भेवाभाति । सर्वज्ञस्य सर्वशक्तस्य लीलामात्रमिदं तदुक्तं गौडपादाचार्यैः माण्डूक्यकारिकासु ।

“ क्रीडार्थं सृष्टिरित्यन्ये भोगार्थमिति चापरे ।
देवस्यैव स्वभावोऽयमाप्रकारमस्य का स्पृहा ॥” इति ।

अपि च श्वेताश्वेतरोपनिषदि - स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः ।
देवस्यैव महिमातु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ॥ इति । (श्वे. उ. ६-१)

“न कुर्वीत वृथा चेष्टाम्” इति । धर्मसूत्रम् प्रतिषेधशास्त्रमपि निष्प्रयोजनाप्रवृत्तिसद्भावे अर्थापत्तिं रूपं प्रमाणं प्रस्तौति । अतः परमेश्वरस्य जगत्सृष्टिः प्रयोजनशून्या, लीलामात्रं स्वभावो वा ।

तदुक्तं कल्पतरौ - प्रतिबिम्बगताः पश्यन् ऋजुवक्रादिविक्रियाः ।
पुमान् क्रीडेद्यथा ब्रह्म तथा जीवस्य विक्रियाः ॥ (कल्पतरु २-१-३३)

किञ्चान्यद्रहस्यमिदं यत् जगद्रचनाविचारे नातीवाभिनिवेश कार्यः । प्रयोजनाभावत् । निष्प्रपञ्चम् आत्मैक्यं ब्रह्मैव तात्पर्यतो विवक्षितं शास्त्रेण । तदेव च अनधिगतम् अबाधितं सुखरूपं च । जगन्निर्माणम् अप्रधानम्, कारणान्वयत्वन्यायेन निष्प्रपञ्चत्वं बोधनाय । देवस्य स्वभावसिद्धा । अनाद्यनिर्वचनीया या अविद्या तत्प्रयुक्तोऽयं नामरूपात्मकः प्रपञ्चः । यदि नामलोके लीलासु किञ्चित् उत्प्रेक्ष्येत प्रयोजनं तथापि ईश्वरस्य लीलासु तिलमात्रमपि प्रयोजनम् उत्प्रेक्षितुं न शक्यते । सर्वज्ञत्वश्रुतेः आप्तकामत्वश्रुतेश्च । अप्रवृत्तिः उन्मत्तप्रवृत्तिर्वा न कल्पयितुं शक्या । “यतो वा इमानि भूतानि जायन्ते” इत्यादिं सृष्टिश्रुतेः जागरुकत्वात् गीतापि लोकस्य उन्मार्गप्रवृत्तिं वारयितुं भगवतो व्यवहारं दर्शयति । “उत्सीदेयुरिमेलोकाः” लोकसङ्ग्रहमेवापि संपश्यन् इति वचनात् ।

भगवतः कथाश्रवणेन दिव्यरूपदर्शनेन उपासनेन वा आनन्दानुभवाय सृष्टि चेष्टा इति नारायणभट्टपादः नारायणीये प्रस्तौति यथा – कष्टा ते सृष्टिचेष्टा बहुतरभवखेदावहा जीवभाजाम्



ISSN : 2320-740X

[redacted]

इत्येवं पूर्वमालोचितमजित मया नैवमद्याभिजाने ।
नोचेज्जीवाः कथं वा मधुरतरमिदं त्वद्वपुश्चित्रसार्द्रं
नेत्रैश्श्रोत्रैश्च पीत्वा परमरससुधाम्भोधिपूरे रमेरन् ॥

प्रपञ्चरूपेण परमात्मानं भावयन्तो वयं जनसेवां जनार्दनसेवां मन्यमानाः जीवामः, जीवनसाफ्यल्यं जीवदेवैक्येन अनुभवामः ।

*****



ISSN : 2320-740X

## पूर्वमीमांसायामीश्वरः

✍आचार्यः सुब्राय वि. भट्टः
मीमांसाविभागाध्यक्षः

“धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम्”, इत्यादिवेदवाक्यैः धर्मस्य पापनाशकत्वं जगदुत्पत्तिस्थितिकारणत्वं च प्रतिपादितम् । तादृश धर्मविवेचनार्थं प्रवृत्तमिदं “मीमांसाशास्त्रम्” । मीमांसासूत्रकारः भगवान् जैमिनिरपि पूर्वमीमांसाशास्त्रारम्भे “अथातो धर्मजिज्ञासा” इत्यनेन धर्मजिज्ञासां प्रतिज्ञाय द्वितीयेन सूत्रेण धर्मलक्षणमाह– “चोदनालक्षणोऽर्थो धर्मः” इति। एवञ्च वेदबोधितश्रेयस्साधनताको धर्मः इति धर्मलक्षणं परिष्कृत्य तल्लक्ष्यत्वेन यागादिरेव धर्मः इत्याह।

बहूनां क्वचित् चिन्तनं भवति मीमांसकाः ईश्वरं नाङ्गीकुर्वन्ति। इमे भगवद्द्विद्वेषिणः इति । स चाभिप्रायः न प्रामाणिकः। यतो हि – ईश्वरोऽपि कश्चन देवताविशेषः इत्यत्र न कस्यापि विप्रतिपत्तिः। किन्तु मीमांसाशास्त्रे ईश्वरस्य ईश्वरत्वेन वा जगत्कर्तृत्वेन वा करचरणादिविशिष्टशरीरित्वेन वा अङ्गीकारः नोपलभ्यते। अथवा अन्यैः अनुमानप्रमाणादिना यः ईश्वरः अङ्गीकृतः तादृशः नाङ्गीकृतः। स च सर्वज्ञः सर्वशक्तः स एव जगतः कर्ता इत्यादिविषये विप्रतिपत्तिरस्ति।

मानमेयोदये – अनुमानप्रमाणसिद्धः ईश्वरः निराकृतः । “ नापि ईश्वरारब्धं जगत्,वेदव्यतिरेकेण ईश्वरसद्भावे प्रमाणाभावात् । अस्तु वेदादेव ईश्वरसिद्धिरिति चेन्न, वेदानामपि ईश्वरकर्तृकत्वं साधयतां वेदप्रामण्यादीश्वरसिद्धिः ईश्वरप्रमाण्याच्च वेदसिद्धिः इति अन्योन्याश्रयचक्रकयोः प्रसङ्गात् ” इत्युक्तम् । एवमत्र अनुमानप्रमाणासिद्धमीश्वरं निराचक्रुः । अनन्तरञ्च – इत्थं निरस्ते परमते स्वपक्षस्थापनार्थमनुमानमुच्यते – क्षित्यादयः कर्तृशून्याः शरीरिजन्यत्वाभावात्, आत्मवत् ” इत्यादिना स्वपक्षे प्रमाणानि प्रतिपादितानि।

“अपि च सिद्धेऽपीश्वरे कर्तरि कथं भवन्मते सकलकालदेशेषु तुल्यतया प्रवृत्तयोर्विद्वेषादिकारणरहितयोरीश्वरेच्छाप्रयत्नयोः कदाचित्कार्योत्पत्तिविघटनहेतुतया तत्कारणानां परस्परोपसर्पणहेतुत्वम् ? तत्तद्भोगाधिकृतततत्तच्चेतनगत तत्तददृष्टपरिपाकवशादिति चेत्, तर्हि तेनैव कारणानां परस्परोपसर्पणादिसिद्धेः किमीश्वरपरिकल्पनाव्यसनेनेति सिद्धस्तार्किकेश्वरनिरासः । वैदिकेश्वरः परमकारुणिकः पुनरस्माकमनुगुण एव” इत्युपसंहृतम्। अत्र तु वैदिकेश्वरः परमकारुणिकः इति कथितेऽपि सः कः इति न निर्दिष्टः । किन्तु तत्तद्भोगाधिकृतततत्तच्चेतनगतततत्तददृश्टपरिपाकवशात् कारणानां परस्परोपसर्पणादिसिद्धेः” इति कथनेन यागादिकर्मजन्य तत्तदात्मनिष्ठ अपूर्वस्यैव फलजनकत्वमथवा कार्यजनकत्वमिति गम्यते।



ISSN : 2320-740X

तेन इश्वरस्य फलजनकत्वं वा जगत्कर्तृकत्वं वा असिद्धं भवति। कर्मणामेव फलजनकत्वम्। तत्र अङ्गत्वमस्त्येव। देवतायाः कर्मशेषत्वात्।

एवमेव सर्वज्ञवादोऽपि मीमांसकानां न सम्मतः। श्लोकवार्तिके सर्वज्ञनिराकरणम् एवं दृश्यते। "अशक्यं हि तत् पुरुषेण ज्ञातुमृते वचनात्" इत्यस्य भाष्यवाक्यस्य विवरणावसरे अयमंशः विमृष्टः।

**"यदि षड्भिः प्रमाणैः स्यात् सर्वज्ञः केन वार्यते"।**

यो हि षड्भिःप्रमाणैः सर्वं जानाति सः धर्माधर्मावपि वेदेन जानन् न चोदनैवेत्यवधारणं विरुणद्धीति न निराकर्तव्य इति। यस्तु एकेनैव सर्वं जानातीति कैश्चित्कल्पितः सोऽति तुच्छत्वादेव न निराकार्यः इत्याह

**"एकेन तु प्रमाणेन सर्वज्ञो येन कल्प्यते।**
**नूनं स चक्षुषा सर्वान् रसादीन् प्रतिपद्यते"॥** इति

यो हि एवं विधं सर्वज्ञं कल्पयति स स्वयं तावच्चक्षुषा रसादीन् जानाति। इतरथा कथं स्वभाव नियमं जानन् अविषये सर्वार्थे प्रत्यक्षस्य अन्यस्य वा प्रवृत्तिमध्यवस्येदिति। ततः -

**यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम्।**
**भवेदिदानीं लोकस्य तथा कालांतरेऽप्यभूत्॥** इति

अद्यत्ववदेव कालांतरेऽपि प्रमाणस्वभावो नान्यादृशः इति।

"सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः" इति सर्वज्ञनिराकरणं कृतम्।

यदि आगमेन सर्वज्ञः सिद्ध्यति इति कथ्यते येनैव आगमेन सर्वज्ञत्वं प्रतिपाद्यं तेन धर्म एव प्रतिपाद्यतां, किमन्तर्गडुना सर्वज्ञेन इति सर्वज्ञनिराकरणम् कृतम्।

मीमांसकमते - धर्म एव जगदुत्पत्तिस्थित्यादिरूपेण सर्वस्यापि कारणं भवति। "धर्मे सर्वं प्रतिष्ठितम्" इत्यादिश्रुत्या सूचितम्। स च धर्मः मीमांसकमते यागादिरेव। देवतोद्देशेन द्रव्यत्यागो यागः। तत्र देवतायाः यागस्वरूपनिरूपकत्वेन यागाङ्गत्वम्। तदुक्तं – यागस्य द्वे रूपे – द्रव्यं देवता चेति। एवञ्च ईश्वरस्य देवतारूपत्वेन कर्मशेषत्वं सिध्यति। कर्मणः स्वर्गादिफलजनकत्वम्। कर्मणः क्षणिकत्वात् कथं कालान्तरभावि फलजनकत्वमित्युक्तौ तदन्यथानुपपत्या अवान्तरव्यापारत्वेन अपूर्वं परिकल्प्य निर्वाहः कृतः। कथं तर्हि कर्मणः फलजनकत्वं, जडत्वात् कर्मणः इति चेत् – वचनबलात् अङ्गीक्रियते। यथा – "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिवेदवाक्यैः यागस्वर्गयोः साध्यसाधनभावः श्रुतः। तेन यागदिकर्मण एव स्वर्गादिफलकारणत्वं गम्यते। " तृप्त एव एनमिन्द्रः प्रजया पशुभिश्च तर्पयति " इत्याद्यर्थवादबलात् यगाराधिता देवता फलं प्रयच्छति। ईश्वर एव कर्माध्यक्षः, फलदाता इति चेत् – अयमर्थवादः ऐन्द्रदधियागसन्निधौ श्रूयमाणः। अर्थवादानां स्वार्थे प्रामण्यं नास्ति। विधेयप्राशस्त्यादिबोधकत्वेन प्रामण्यमिति निर्णीतम्। अतः इदं प्रमाणभूतं न भवति।



ISSN : 2320-740X

यदि यागाराधिता देवता अथवा ईश्वरपदवाच्यः शक्तिविशेषः फलदाता इत्यङ्गीकारे कलञ्जभक्षणब्राह्मणहननादौ कर्मणामेव निषेधः श्रूयते। न कलञ्चं भक्षयेत्, ब्राह्मणो न हन्तव्यः इत्यादिना। तत्र तादृश निषिद्धकर्मणामेव नरकजनकत्वं श्रूयते। तत्र च देवतासंबन्धः अङ्गतयाऽपि नास्ति। यदि स्वर्गादि इष्टफलदाता ईश्वरः स्यात्, तथैव नरकाद्यनिष्टफलदातृत्वमपि तस्यैव वक्तव्यम्। तच्चानिष्टम्। यागादौ तु शेषतया देवतासम्बन्धः श्रूयते चेदपि निषिद्धे कर्मणि देवतासम्बन्धः नास्त्यैव। साक्षात्कर्मणः एव फलजनकत्वम्। तत्र च श्रुतिवचनमेव प्रमाणम्। स च वैदिकः शब्दः चेतनः एवम् अन्यत्र ईश्वरशब्देन व्यवह्रियमाणेन परमात्मना अधिष्ठितः।

अयं विचारः भट्टपादैः तन्त्रवार्तिके – ग्रहैकत्वाधिकरणे प्रासङ्गिकरूपेण विमृष्टः। तथाहि - ग्रहं सम्मार्ष्टीत्यत्र एकत्वं विवक्षितं न वा इति प्रश्ने-कस्य विवक्षा ? पुरुषस्य उत वेदस्य ? इति चेत् वेदस्य इति वक्तव्यम्। शब्दरुपस्य वेदस्य विवक्षा इति कथं सङ्गच्छते इति विचारसन्दर्भे - भट्टपादैः अभिहितम् –

ऋग्वेदादिसमूहेषु क्षेत्रज्ञा ये प्रतिष्ठिताः।
तेषां वाऽयमभिप्रायः स्याद्विवक्षाऽविवक्षयोः॥
महाभौतिकदेहस्था यथात्मानः सचेतनाः।
कञ्चिदर्थं विवक्षन्ति न विवक्षन्ति चापरम्॥
तेषामन्तर्गतापीच्छा तद्वाक्यार्थविचारिभिः।
ज्ञायते शब्दशक्त्यैव स्फुरन्तीव बहिः स्थिता॥
देहभेदप्रकारश्च कर्मशक्तिवशानुगाः।
प्रकृत्यारम्भवैचित्र्यात् दृश्यन्ते परमात्मनाम्॥
तथा व्योमशरीरोऽपि परमात्मा श्रुतौ श्रुतः।
इज्यते वारिणा नित्यं यः खं ब्रह्मेति चोदितः॥
रूपस्पर्शादयो येऽपि महाभूतगणाः स्थिताः।
प्रत्येकमात्मनां तेऽपि देहाः संभोगहेतवः॥
शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते।
तदप्यधिष्ठितं सर्वमेकेन परमात्मना॥
तथार्ग्वेदादयो देहाः प्रोक्ता येऽपि पृथक् पृथक्।
भोग्यत्वेनात्मनां तेऽपि चैतन्यानुगताः सदा॥
तेषां चान्तर्गतेच्छानां वाक्यार्थप्रतिपादने।
विवक्षा वाऽविवक्षा वा ज्ञायते शब्दशक्तितः॥
विधिशक्त्या गृहीतं यत्तत्सर्वं हि विवक्षितम्।



ISSN : 2320-740X

तथैव तु परित्यक्तं व्याख्येयमविवक्षितम् ॥

शब्दब्रह्मात्मनोप्येवं सर्ववेदानुसारिणः ।

विवक्षा वाऽविवक्षा वा वक्तव्या विधिशक्तितः ॥

अनादिनिधनेऽप्येवं वेदे वेदार्थगोचरे ॥

इत्यादिना ईश्वरस्य अथवा भगवदस्थित्वस्य प्रकारान्तरेणाङ्गीकारः दृश्यते ।

अर्थवादाधिकरणे तु – वार्तिके

" माभूत्तन्महावाक्यम्" इति आक्षिप्य उक्तं – "सत्यं विनापि तेनेति । यो नाम वेदस्य कर्ता स्यात्स एवं पर्यनुयुज्येत लघुनोपायेन सिद्धे किं महावाक्यमाश्रयसीति । तदभावान्न पर्युनुयोगः" इत्युक्तम् । तेन ईश्वरकर्तृकः वेदः इति मीमांसकानाम् असम्मत इति सूचितं भवति । नवमाध्याये देवताधिकरणे देवतायाः विग्रहवत्वं निराकृत्य आनुपूर्वीविशिष्टशब्दरूपा देवता इति सिद्धान्तितम्।

तथा च मीमांसकमते ईश्वरः इति अतिरिक्तः नास्ति । ईश्वरस्थानीयः यज्ञ एव । ईश्वरकार्यकारित्वात् । श्रौतस्मार्तादि अनुष्ठानेऽपि पठ्यते –

" काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे । स्वर्गापवर्गदात्रे च यज्ञेशाय नमो नमः"

इति तेन यज्ञाख्यः ईश्वरः एव सम्मत इति प्रतीयते ।

जडत्वात् कर्मणां कथं फलसाधनत्वमिति न चिन्तनीयम् । परमात्माधिष्टितवेदबोधितत्वात् तत्रापि कश्चन शक्तिविशेषः वर्तते । कर्मजन्येन शक्तिरूपापूर्वेण कालान्तरभावि फलं प्रति यागः कारणं भवतीति वेदप्रामाण्यवशात् अङ्गीकर्तव्यम् । यथा – अनेन औषधपानेन अयं ज्वराख्यरोगविशेषः नश्यति इति आयुर्वेदवचनानुसारेण तस्य औषधपानेन तस्य निर्दिष्टस्य रोगस्य नाशे प्रत्यक्षानुभूते सति तस्मिन् औषधविशेषे कश्चन शक्तिविशेषः वर्तते इति निर्णीयते । तत्र औषधस्य चेतनत्वं वा जडत्वं वा इति विचारो नास्ति । तस्मिन् शक्तिर्नस्ति इति वक्तुं न शक्यते, अनुभवविरोधात् । तद्वत् वेदबोधितकर्मणामपि फलजनकत्वशक्तिः वर्तते इति अङ्गीकर्तव्यम् । ततश्च सृष्टिस्थित्यादि कर्तृत्वेन सकलप्रपञ्चस्य अध्यक्षः ईश्वररूपी यज्ञ एव इति न मीमांसकमते पूर्वापरविरोधः ।एवं शब्दमात्रेण भेद इति शास्त्रान्तराविरोधश्च ।

*****



ISSN : 2320-740X

[redacted]

## शृङ्गारसुन्दरभाणस्य परिचयः

✍आचार्या इन्दिरा.पि
साहित्यविभागाध्यक्षा

**द्वे वर्त्मनीगिरां देव्याः शास्त्रं च कविकर्म च ।**
**प्रज्ञोपज्ञं तयोराद्यं प्रतिभोद्भवमन्तिमम् ॥**

इत्यादिना दृश्यश्रव्यात्मकस्य काव्यस्य परमोपादेयत्वं सूचितम् । एतादृशस्य काव्यस्य प्रभेदेषु, दृश्यकाव्यं प्रमुखं स्थानमावहति। तच्च दशविधम्। तदुक्तम् –

**नाटकमथ प्रकरणमङ्को व्यायोग एव च ।**
**भाणःसमवकारश्च वीथी प्रहसनं डिमः ॥**
**ईहामृगश्च विज्ञेया दशेमे नाट्यलक्षणे ।** इति।

एतेषु रूपकभेदेषु भाणभेदमवलम्ब्य केरलदेशे समुपलब्धानां रूपकाणामीषत्परिचयपूर्वकं शृङ्गारसुन्दरभाणस्य विशेषतः परिचयदानमेवाऽस्य प्रबन्धस्य विषयः ।

मलयालभाषाव्यवहर्तॄणामावासभूमिः केरलदेशः भारतदेशस्य दक्षिणपश्चिमस्यां दिशि सह्यपर्वतेनारब्समुद्रेण च समलंकृता विलसति । अत्र हि प्राचीनकालादारभ्यैव गैर्वाणीगरिमा प्रसृतप्रवाहा अभूत्। अत्रत्याः पण्डिताः सर्वशास्त्रपारङ्गताः सन्तः संस्कृतसाहित्यस्य विविधासु शाखासु प्राप्तकीर्तयः । परमपूजनीयश्रीशङ्कराचार्यणां जन्मना केरलदेशः सुविदितो जात इति प्रसिद्ध एव। एवमाश्चर्यचूडामणिकर्ता कुलशेखरः पय्यूर्भट्टनारायणभट्टपादादयः केरलदेशं अलंकृतवन्तः । अत्रत्यानां कवीनां प्रोत्साहनार्थं सहृदयशिरोमणयः राजानः आसन्नित्यतोऽन्यदेशं न गता इत्यतोऽन्यदेशीयाः कवय इव विख्यातिम् एते न प्राप्तवन्तः ।

यद्यपि भाणः रूपकभेदेषुङ्गीक्रियते तथापि नाटकादिवदेतस्मिन् कवीनामादरः न समवलोक्यते । अतः भाण संख्यायां न्यूनत्वं दरीदृश्यते । परिचितेष्वपि भाणेषु सहृदयहृदयावर्जकत्वं समेषां नास्ति । भाणस्वभाव एव तत्कारणं भवितुमर्हति । तदुक्तम् – 'भाणः स्याद् धूर्तचरितो....' इत्यादि । शृङ्गाररस्यातिप्रसरत्वे विमुखाः सहृदयाः भाणास्वादनेऽभिरुचिं न प्रकटितवन्त इति केषाञ्चनाभिप्रायः । एवं स्थिते सत्यपि –

**'वररुचिरीश्वरदत्तः श्यामलिकः शूद्रकश्च चत्वारः ।**
**एते भाणान् बभणुः का कीर्तिः कालिदासस्य ।'**

इति पद्मप्रभृत्तकायां दृष्टेन श्लोकेन भाणानां प्रौढत्वं सुन्दरत्वं च सम्यक्तया व्यक्तीकृतम्।



ISSN : 2320-740X

भाणविरचने दक्षिणभारतीयाः विशिष्य केरलदेशीयाः प्रगल्भाः । राजभिः सम्यक् प्रोत्साहिताः कवयः स्वकीयकर्मकौशलेन सभागतनीतिनिर्वहणादिविषयान् हास्यरसपरिवेषं दत्वा सरसया रीत्या भाणमुखेन सहृदयसमक्षमवतारयितुं समर्था एवाभवन् ।

भाणरचनाकालः द्विधा विभक्तुं शक्यते । चतुर्भाणकालः तदनन्तरकालश्चेति । चतुर्णां भाणानां समाहारः चतुर्भणिः । शृङ्गाररसादीनां सहृदयहृदयाह्लादरीत्या वर्णनं क्रियतेऽत्र । साहित्यकदृष्ट्याऽपि प्रौढत्वमेतेष्वस्ति । वररुचप्रणीता उभयमिसारिका शूद्रकनिर्मिता पद्मप्रभृत्तका, ईश्वरदत्तप्रणीता धूर्तविटसंवादः श्यामलिककृत पादताडितकश्च चतुर्भाणः । श्रीहर्षस्य समये गुप्तकाले वा एते प्रचुरप्रचाराः इति मन्यन्ते ।

वत्सराजस्य कर्पूरचरितं, वामनभट्टभाणस्य शृङ्गारभूषणं, वरदाचार्याभिधानस्यामृताचार्यस्य वसन्ततिलकं, रामभद्रदीक्षितस्य शृङ्गारतिलकं, नल्लभट्टस्य शृङ्गारसर्वस्वं, कोटिलिङ्गपुरस्थस्य युवराजस्य रससादनभाणः, रङ्गाचार्यस्य पञ्चबाणविजयं, शङ्करस्य शारदातिलकं, श्रीनिवासाचार्यस्य रसिकराजीवम्, काशीपतिकविराजविरचितं मुकुन्दानन्दम्, अश्वतितिरुनाल् महाराजस्य शृङ्गारसुधाकरभाणः, उदयवर्मत्तम्बुरान महोदयेन विरचितं रसिकभूषणं, ईश्वरशर्मणः शृङ्गारसुन्दरभाणः, रतिकरस्य शृङ्गारमञ्जरी, कोटिलिङ्गपुरीय कोच्चुण्णित्तम्पुरान् महाभागेन विरचितविटराजविजयश्च कतिपये भाणाः । एतेषु भाणेष्वत्यन्तप्राचीनतमं भवति कर्पूरचरितम् । द्वादशशतकस्यान्तिमे तथा त्रयोदशशतकस्याद्ये एव विरचितं भवति तत् ।

भाणलक्षणम् ।

नाट्यशास्त्रे भाणस्वरूपमेवमुक्तम् –

'आत्मानुभूतशंसी परसंश्रयवर्णनाविशेषस्तु ।
विविधाश्रयो हि भाणो विज्ञेयस्त्वेकहार्यश्च ॥
परवचनमात्मसंरथं प्रतिवचनैरुत्तरोत्तरप्रथितैः ।
आकाशपुरुषकथितैरङ्गविकारैरभिनयैश्चैव ॥
धूर्तविटसम्प्रयोज्यो नानावरथान्तरात्मकश्चैव ।
एकाङ्गो बहुचिष्टः सततं कार्यो बुधैर्भाणः ॥' इति ॥

हास्यरसोचितविटधूर्तानुप्रवेशेन एकेन पात्रेण हरणीयः, सामाजिकहृदयं प्रापयितव्योऽर्थो यत्र स भाणः । भण्यते व्योमोक्त्या नायकेन स्वपरवृत्तं प्रकाश्यते इति भाणः । एक एव निपुणः पण्डितश्च विटः प्रयोक्ता । स आकाशभाषितैः उक्तिप्रत्युक्तिरूपेण स्वेन तथा इतरेण वा अनुभूतं वृत्तान्तं स्वयं तु केनापि विधिना बुद्ध्वा रङ्गे प्रकाशयति । शौर्यवर्णने वीरः, दम्पत्योः सौभाग्यवर्णने शृङ्गारश्च सूचयेत् । तत्रेतिवृत्तमुत्पाद्यं प्रकरणवत् कल्पनीयं, न तु नाटकादिवत्पुराणप्रसिद्धम् । प्रायेण भारतीवृत्तिः, क्वापि कैशिकीवृत्तिरपि स्वीकर्तव्यम् ।



ISSN : 2320-740X

मुखनिर्वहणे च सन्धी स्याताम् । तथा दशविधानि लास्यङ्गानि च स्युः । प्रधानरसरूपेण शृङ्गारस्तथा तदनुगुणतया हास्यरसस्यापि  संयोजनमत्र दृश्यते । 'सूचयेत् वीरशृङ्गारशौर्यसौभाग्यसंस्तवैः' इत्यादिना वीररसस्यापि स्वीकारः धनञ्जयेन कृतः । नाट्यदर्पणे भावप्रकाशने साहित्यदर्पणे प्रतापरुद्रीये च एतदनुसृत्यैव भाणलक्षणं निर्दिष्टम् । कोहलभोजराजादयस्तु शृङ्गरस्यैव प्रामुख्यमङ्गीकुर्वन्ति । पद्मप्राभृत्तके धूर्तविटसंवादे उभयाभिसातिकायां पादताडितके शृङ्गारसुधाकरे च वीररसवर्णनं नैव दृश्यते ।

**शृङ्गारसुन्दरभाणः**

ईश्वरशर्मणा विरचितो भवति शृङ्गारसुन्दरभाणः । अत्र भाणलक्षणानि सर्वाणिसमनुयन्ति । तत्र रचयितारमधिकृत्य ग्रन्थारम्भे सूचना विद्यते । बिम्बाली देशीयः वटक्कुम्क्कूर्अयं महानुभावः । तच्च तेनैवोक्तम् –

'व्याघ्रवेश्मनिवासस्य द्विजाराजशिरोमणेः ।
सद्गुरोर्यः कृपालेशात् साध्वीं शक्तिमवाप्तवान् ॥
बिम्बालीवासिनस्तस्य कृतिरीश्वरशर्मणः ।
भवता नाटनीयोऽद्य भाणः शृङ्गारसुन्दरः॥' इति । (शृ.सु.भा.4/5)

अत्र प्रथमपादेन वैक्कं मन्दिराधिष्ठितो महेश्वरः सूच्यते । ग्रन्थकर्ता व्याघ्रवेश्मनिवासिनः कस्यचित्ब्राह्मणस्य शिष्यः । सोऽपि ब्राह्मण एवेत्यवगम्यते । गोश्रीराजदेशस्य प्रणेता भवति ईश्वरशर्मा इत्यपि –

**'वीराग्रेसर लोकेऽस्मिन् प्रतापे ते प्रसर्पति ।**
**चित्रं शिशिरकालेऽपि प्रजाः शीतं न बाधते ॥'** (शृ.सु.भा.131)

राजस्तुत्या-

'अतिरमणियलक्ष्मीविलासोत्तरेयं गोश्रीर्नाम केरलराजानां राजधानी-' (शृ,सु.भा.पृ-6) इत्यादि गोश्रीपुरवर्णनेन च ज्ञायते । तस्य जीवनसमयमधिकृत्य एतदधिकं न वयं जानीमहे । शृङ्गारसुन्दरभाणः भाणेषु प्रसिद्ध एव । सर्वेषां भाणलक्षणानां समन्वयोऽत्र दृश्यते ।

**'इन्दुकलां हर्तुं पितुरुन्नमितो नालिकेरखण्डधिया ।**
**कुण्डलितः सर्पगणाद् भिया करो बालगणपतेर्वोऽव्यात् ॥'**

इति नान्दीपाठानन्तरं सूत्रधारः प्रविश्य,

**'श्रीमन् नन्दसुताधुना मम  करादुत्पत्यसद्योगतः ।**
**कालिन्दीतटकेलिवज्जुलवनोद्देशाय लीलांशुकः ॥**
**आवामेव तमाविशाव तमाविशाव निभृतं तन्मार्गणार्थं जवा-**



ISSN : 2320-740X

[redacted]

**दित्थं गोपिकयोदितः सह तया गच्छन् हरिः पातु वः ॥'**

इति हरिं स्तुत्वा निर्विघ्नपरिसमाप्त्यर्थं मदनमपि नमस्करोति। प्रस्तावनायां 'व्याघ्रवेश्मनिवासस्य-' इत्यादिना ईश्वरकर्मकृतशृङ्गारसुन्दरभाणो नटनीय इत्युक्त्वा नीलकण्ठो नाम नटवरः नाटयति भाणमिति विज्ञाप्य मधुमासमधिकृत्य मयूरिकागानं सामाजिकान् श्रावयित्वा विरमति सूत्रधारः।

तदनन्तरं कौसुभाम्बरौष्णीषधरः सुवर्णलिपकान्तकुन्तालङ्कृतपाणिः अभिरभिरामनामको विटः प्रविशति।

'अर्कोऽसावतिरिक्ताभो मस्तके पूर्वभूभृतः।
पद्मरागमयो मौलिरिव विद्योततेऽधिकम् ॥
बालातपोऽतितुङ्गानां नगानां मूर्धसु स्फुटम्।
कौसुम्भशाटिकोष्णीष इव विभ्राजते भृशम् ॥
अन्ध्कारकुलान्यर्ककराक्रन्तिविशङ्कया।
सद्यो विशन्ति संशान्तदीपं वासगृहोदरम् ॥'

इत्यादिना सूर्येदयं वर्णयित्वा 'अस्मिन्नहनि कः पुनरभीष्टोऽर्थो मे साधतिव्योऽस्ति' इति चिन्तयति सः। 'अद्य महाराजामात्यस्य बृहद्वसोः पुत्रेण महावसुना मदनविवशेन बलादानीय स्वमन्दिरे निरुद्धायाः नारीजातिमणेः केसरमालिकायाः नरलोकरत्नेन भ्रमरकेण संमोजनं करणीयम्' इति प्रस्तौति च।

केसरमालिकायां महावसोः विरागं कारयितुं हेममालिकां पूर्वमेव सः प्रेषितवान्। तस्या प्रवृत्तिं ज्ञातुमुत्सुकः सः प्रियसखीं मल्लिकासेनामाह्वयति। केसरमालिकायाः अतिकठिनां विरहव्यथां तस्याः मुखाज्ज्ञात्वा केसरमालिकायां भ्रमरकस्याप्येतादृशीमवस्थां प्रकाश्य तयोस्समागमप्राप्त्यर्थं स्वयं महावसुमन्दिरं गन्तुमुद्युक्तो भवति। मार्गमध्ये बहुभिः योषिद्भिः – कुवलयमालिका, मधुकेशी कामसेनादिभिः – सह तस्य सल्लापं वर्णयति। वर्णनायाः शृङ्गारमयता अत्रानुभूयते।

महावसुगृहं प्राप्तस्सः केसरमालिकायाः दर्शनेन कलहायमानायाः हेममालिकायाः निर्गमनवृत्तान्तं ज्ञातवान्। केसरमालिकायाः निर्गमनानन्तरमेव सा पुनरागच्छतीति ज्ञात्वा हेममालिकामानेतुं महावसुर्गच्छति। अभिरामस्तु केसरमालिकां स्वप्रियसमीपं नयति। अस्मिन् भरतवाक्यं न दृश्यते। तस्मादपूर्णोप्यल्पभाग एवावशिष्ट इति ज्ञायते।

ईश्वशर्मणः शैली सरला प्रौढा च। महानुभावेनानेन शृङ्गाररसस्य वर्णनं सरसया रीत्या कृतम् – 'स्त्रीपुंसानां त्रिजगति कठोराणि चित्तानि भेत्तुं-'42 इत्यादीनि तन्निदर्शनानि।

अतिसौकमार्येण शृङ्गाररसस्य विपुलतया वर्णनं बहुत्र दृश्यते।

'अहो विचित्रमेवास्य अङ्गाविक्षेपसौष्ठवम्।



ISSN : 2320-740X

अस्माल्लज्जाकुला नूनं हंसा यान्ति दिवं भुवः ॥' इति वीणावादनपरां तां वर्णयति।

नायिकानायकयोः विरहावस्थावर्णनं सम्यक्ततया कृतमीश्वरशर्मणा।

'निजप्रभामात्रविभूषणेन गात्रेण मारास्त्रतनूकृतेन।
अज्ञातकृत्याकुलमित्रभृत्यो मुहुर्मुहुः कश्मलमश्नुतोऽलम् ॥' 29

'अयि जीवादपि प्रेष्ठे भद्रे केसरमालिके।-'इत्यादीनि तन्निदर्शनानि भवन्ति।

'परस्मिन् निर्भरं रक्तां स्वे विरक्तां च योषिताम्।
यो नरो याति निर्बन्धात् स द्विपाद् गर्दभो ध्रुवम् ॥' 35

इत्यादिना लोकनीतीनामुद्घाटनमपि कविना कृतम्।

अन्यभाणेष्विवाऽत्रापि वृद्धवेशमावर्णनमस्ति ॥' तद्यथा-

'पलितश्वेतकेशौधा वलीविश्लथविग्रहा।

शुष्कस्तनी जरा साक्षान्मूर्तेवाप्रियदर्शना ॥' इति।

सर्वार्थसाधनसमर्थकः इति विटं विशेषयति कविः।

अलङ्काराणां सामंजस्येन योजनमपि कविरत्र कृतवान्।

'पद्मं पद्ममिवोल्लासि शशीव सुभगशशी।
अस्या वक्त्रमहो चित्रमस्याः वक्त्रमिवोज्वलम् ॥' 143

'नेमौ स्तनौ वक्षसि सुभ्रुवोऽस्याः
सौभाग्यसारस्य निधानकुम्भौ।
नेयं ततोऽधोऽपि च रोमराजी
रज्जुस्तयोर्बन्धविमुक्तलम्बा ॥' 145 इत्यादिषु अलङ्कारसौष्ठवं स्पष्टमेवाभाति।

अलङ्काराणां सन्निवेशः भाणेषु नात्यन्तमावश्यकम्। यतः प्रकृतानुसारिणाः अपृथग्यत्ननिर्वत्याः अलङ्काराः एव सहृदयहृदयावर्जकाः भवन्तीत्यालङ्कारिकैः निर्दिष्टम्। तदुक्तमानन्दवर्धनाचार्येण-

'रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथग्यत्ननिर्वर्त्यो सोऽलङ्कारो ध्वनौ मतः ॥' इति।

महाकाव्यादिवत् दृश्यप्रधानेषु विशिष्यैककथापात्राश्रयेण प्रयुज्यमानेषु भाणेषु अलङ्काराणां प्राचुर्येण प्रयोगो न भूषणाय भवेत्, किन्तु दूषणायेवेत्यतः भाणकाराः प्रायेणालङ्काराणां विरलेन प्रयोग एवाभिलषन्ति। एवमस्मिन् भाणेऽपि कतिपयान्यलङ्काराण्येव दृश्यन्ते।



ISSN : 2320-740X

पुरुषार्थेषु कामस्याप्युत्कृष्टतामवगम्य तस्यापि परमोपादेयत्वं भारतीयकविभिरङ्गीकृतम् । 'शृङ्गार एव मधुरः परप्रह्लादनो रसः' – इत्यनेन शृङ्गाररसस्य परमाह्लादकत्वं सहृदयमनप्रसादनप्रवीणत्वं च सुस्पष्टं प्रतिपादितम् । तस्माद् भाणे सहृदयाः अवश्यं रमन्त्येव इत्यत्र विदुषां विमतिर्नास्ति ।

एवं सत्यपि भाणावतरणे क्लिष्टत्वं च वर्तते । अन्यरूपकेष्विव हृदयावर्जकानां बहूनाम् उपाधीनामभावात् एकं नटमवलम्ब्यैव तस्य उक्तिप्रत्युक्तिकौशलेनैव सामाजिकनां रसास्वादः सम्भवति । तस्माद् भाणविरचनं दुष्करम् । एतादृशभाणानां विरचने केरलदेशीयाः कवायः अतिप्रगल्भाः आसन् । तस्मादिदं ज्ञायते यत् केरलदेशीयाः कवयः पण्डिताः कुशलाः प्रतिभासम्पन्नाश्च इति। विदुषां पुरतः विद्वद्वरेण्येष्वेकस्य ईश्वशर्मणः परिचयदानेन आत्मानं कृतार्थं मन्ये ।

*****



[redacted]

ISSN : 2320-740X

## चाटुधाराचमत्कार:

✍डा. सि.एस्. एस्.नरसिंहमूर्तिः
नव्यव्याकरणविभागाध्यक्षः

**सखायं यस्याहुर्वसुरलिकदृग्भूरिमकरो**
**दपाङ्गं गोशब्दग्रहपतिपरिष्कारकरणम् ।**
**अधाद् गां गाङ्गेयीमधिकमधिशेते य उरगं**
**स भूत्यै भूयस्यै सरसिरुहनाभोऽस्तु भवताम्॥**

(चिन्तलूरुनिवासिना पेद्दिन्टि कनकाद्रिशास्त्रिणा विरचितोऽयं श्लोक:)

यस्य विष्णो: अलिके = फाले दृक् यस्य स:= शिव:, सखा मित्रमित्याहु: = वदन्ति । यस्य विष्णो: जनक: वसुदेव: इत्याहु: । यद्वा यं = विष्णुं, सर्वजगन्निवास इति वदन्तीति च। यं = देवं, भूरिमकरोदपाङ्गं = भूरिमाणं सर्ववृद्धिं करोतीति = कर:, भूरि मकरं च तदुदम् = मुदकं च भूरिमकरोदं तत्पातीति = भूरिमकरोदप: = नीलमेघ इत्यर्थ: । स इवाङ्गं शरीरं यस्य तथोक्तम् । वदन्ति यम् देवं गोशब्द: = चन्द्र:, ग्रहपति: = सूर्य:, तौ द्वौ नेत्रद्वयरूपपरिष्कारकरणं यस्य तथोक्तम् । वदन्ति - य: = देव: गाङ्गेयीं = सुवर्णस्वरूपिणीम्, ई = लक्ष्मीं, यद्वा गाङ्गेयीं = गङ्गाया: अपत्यं स्त्रीम् गाङ्गेयीं च सा ईच = गाङ्गेयी वा तां लक्ष्मीं " ईरिन्दी गोमिनी ह्रीश्च भार्गवी कलशाब्दिजा - अमरशेष: । गां = भूमिं च अधात्, द्वे पत्नीभावेन परिजग्राह। यो विष्णु: अधिकमुरगं शेषमधिशेते = शयितवान् शेषशायीत्यर्थ: । स: = सरसिरुहनाभ: श्रीहरि: भवतां भूत्यै ऐश्वर्यायास्तु भवतु।

यस्य देवस्य सरसीरुहनाभ:= श्रीहरि: सखा मित्रमाहुर्वदन्ति यस्यालिकदृग्भू: = फाललोचनसम्भव: वसु: = वह्नि: वसुर्ना देवभेदेषु योक्त्राग्निधनदांशुषु। मधुरे तु त्रिषु क्लीबे सलिले धनरत्नयो: इति नाना । इं = मन्मथम्, अपाङ्गम् = अपहृतशरीरमकरोत् । इकार: फणिरत्नार्चिष्वग्रतोर्धगुहार्थयो: हरे करेणौ कक्ष्यान्ते निशाकरकरे स्मरे इति नाना । यं देवं गौरेव नेत्रमेव शब्दग्रहम् श्रोत्रं यस्य स: = गोशब्दग्रह: = सर्प: । तेषां पति: = शेष: परिष्कारकरणम् = आभरणरूपं यस्य तथोक्तमाहु: । य: देव: गां चन्द्रं गाङ्गेयीं गङ्गासम्बन्धिनीं धाराम् अधात् शिरसि धृतवानित्यर्थ: । यो देव: अधिकमुन्नतम् अगं = कैलासगिरिम्, अधिशेते = अधिश्रित्य शयितवान् । स: = तादृश:, उ: = शिव:, भवताम् = युष्माकम् भूयस्यै भूत्यै = अधिकैश्वर्यायास्तु = भवतु ।

**यावत्तोयधराधराधरधराधाराधरश्रीधरो**
**यावच्चारुचचारुचारुचमरं चामीकरं चामरम् ।**
**यावद्रावणरामरामरमणं रामायणं श्रूयते**



ISSN : 2320-740X

**तावद्वो भुवि भोगभोगभुवनं भोगाय भूयाद् विभो ॥** (कालिदासविरचितोऽयं श्लोक:)

तोयधरा: = मेघा:, समुद्राश्च ( यावत्तिष्ठन्तीति शेष:) । धरा = भूमि:, धरा: = पर्वता:, हिमवदादय: । मेरो: पृथग्वक्ष्यमाणत्वात् । आहार्यधरपर्वता: इत्यमर: । धराया: = भूमे:, आधार: = अधर: पाताललोकवर्ती श्रीधर: = विषधर:, शेष: = महाकूर्मरूप: श्रीविष्णुर्वा । एते च यावत्तिष्ठन्ति - श्रीर्वेषरचना शोभा सम्पत्सरलशाखिषु । वाणीलक्ष्मीलवङ्गेषु विषबिल्वेप्यथ त्रिषु इति नानार्थे । किञ्च चारु रम्यं चचेति रु: = ध्वनि: येषां ते = चचारव:, रुर्ना युद्धे भये ध्वनौ इति नानार्थे । चचारवश्च ते चारवश्चेति विशेषणसमास: । चचारुचारव: = चमरा: (मृगविशेषा:) यस्मिन् तथोक्तम् । अमराणामिदम् = आमरम् तस्येदमित्यण् । चामीकरं = सुवर्णं मेरुरिति यावत् । तच्च यावत्तिष्ठति । अपि च रावणश्च रामश्च = रावणरामौ, तावेव रामौ रमणीयौ = रमणौ नायकप्रतिनायकौ यस्मिन् तत्तथोक्तम् । रामायणं भुवि = भूमौ यावत्तिष्ठति तावत्पर्यन्तं भोगस्यापि भोगो यत्र स: = भोगभोग:, भो प्रभो भुवनं = सप्तद्वीपपरिमितं, ते= तव भोगाय भूयात् ॥

**सश्रीमानुदयोदयोदयदयोदायोदयोवेदयो**
**नित्यं येनरमारमारमरमारामारमस्सारम: ।**
**अव्यादस्तरणोरणोरणरणोराणोरणोरावणो**
**विष्णुर्जिष्णुरभीरभीरभिरभीराभीरभीभूरभि: ॥**
(कालिदासविरचितोऽयं श्लोक:)

स: विष्णु: व: रक्षतु इति शेष: । स: कथंभूत: इत्युक्ते - श्रीरस्यास्तीति श्रीमान् नित्ययोगे मतुप्। नित्यलक्ष्मीनिवास: । पुन: कथंभूत:- उदयोदयोदयदय:, उदयस्य = शुभोदयस्य, विधे: = उदय: उद्गत: उन्नतो वा अयोदयो यस्मात्स: = उदयोदय:, उदय: पूर्वशैले स्यादौन्नत्ये प्युद्गतावपि इति विश्व: । उदयप्रसारो यस्या स्सा = उदयोदयोदयदया - दया = कारुण्यं, उदयोदयोदयदय: यस्य दयोदयमात्रेण शुभावहविधे: उदयो भवति न इत्यर्थ: । पुन: कथम्भूत: दायोदय:- ददातीति = दाय: श्याद्व्याधास्त्रु - इत्यादिना ण: । (ददतीति=दा क्विप्चेति क्विप्। दा नयतीति = दाय: कर्मण्यण् ।) दायानां = दानशीलानाम्, उदय: = प्रादुर्भाव: यस्य स:= दयोदय: य: पुरुष: परमात्मा विद सर्वं वेत्ति= सर्वज्ञ: इत्यर्थ: । किञ्च येन हेतुना रमा = लक्ष्मी: मारं = मन्मथं नाम पुत्रम् आर = लेभे, ऋधातो: लिट्। रमारमारम् = अरमारामारम: = अविद्यमाना रमा येषां ते = अरमा: = त्यक्तश्रीका: वीतरागा: । अत एव आरामा: = अतिमनोहरा: तेषु आसमन्ताद्रमते = क्रीडत इति आरम: । अरमारामारम: घञर्थे कविधानमिति क:। सारम: - सारं = वाक्यसारं माति = वदतीति सारम: । मा शब्द इत्यस्माद्धातो: क: । एतेन वेदकर्तेति फलितम् । किञ्च रणो रणरणो राणोरण: रणोरणरणो इति- त्रिवारमनुकरणशब्द: - एवं राण: = रणसम्बन्धी रण: = ध्वनि: यस्य स:= रणोरणरणोराणोरण: - रणो रणरणो इति सर्वदा रामेण सह मे रणोस्त्विति वारं वारं वदन्नित्यर्थ: । रणो इत्यत्र दीर्घवत्प्रतिभासात्तथाप्रयोग: । इत्थम्भूतो रावण: अस्तरण: कृत इति शेष: । अस्त: = निरस्त:, रण: येन स:,



ISSN : 2320-740X

जिष्णु: = जयशील: ग्लाजिस्थश्च ग्स्नु: इति ग्स्नु: । विष्णु: = व्यापकशील: । अभी: = निर्भय: , रभी = रभोऽस्यास्तीति, रभी = भक्तसंरक्षणे, रभसवानित्यर्थ: । गजेन्द्ररक्षणप्रसस्तवेगयुक्त इति यावत् । रभिरभि: = रभिनीवेगयुक्ता रा = गति: यस्य स:= रभिर: जववद्गमन इत्यर्थ: । रभिर: भि: = पक्षी यस्य स:= रभिरभि: मनोजववद्गरुडवाहन इति यावत् । रा स्त्रियां हेम्नि शालायामाशंसायां गतावपि – नानार्थे । भि: स्त्री भीत्यां खगे पुंसि इति च । आभीरभीभूरभि: - आभीराणां गोपालानां भीभू: = भयस्थानभूमिरिति यावत्। र = पावक:, तस्य भि: = भयं यस्मात् स: - गोपबालकभयङ्करदवानलकबलनकर इत्यर्थ: । र: पुमान् पावके कामे इति नाना।

*****



ISSN : 2320-740X

[redacted]

# समूहगतिशास्त्र्य परिचयः
# [An Introduction to Group Dynomic]

✍डा. चन्द्रकान्तः
सहायकाचार्यः, शिक्षाशास्त्रविभागः

मानवः सङ्घजीवीति सर्वेऽप्यङ्गीकुर्वन्ति । समूहे एव मानवस्य जननादारभ्य मरणपर्यन्तं कालः यापितो भवति । मानवः स्वपरिवेशे विद्यमानैः व्यक्तिविशेषैः सह स्वकीयं चिन्तनं,जीवनं, भावं, क्रियाकलापञ्च विनिमयीकरोति । एवं सति प्रत्येकस्मिन् सन्दर्भे व्यक्तिः कथं व्यवहरति, कथं सामञ्जस्यं सम्पादयति, स्वकीयसमूहं कथं निर्माति, इत्येते अंशा अत्र रोचकाः महत्वपूर्णाश्च जायन्ते । **ह्यूबर्ट** जानर्महोदयस्य कथनानुसारं समूहगतिशास्त्रं, समूहस्य व्यवहारं विशदीकृत्य,समूहः कथम् उदितः,कथं परिवर्तते,व्यक्त्यनुगुणं कथं संकीर्णरूपेण व्यवहरतीत्यादीनामध्ययनं करोतीति ।

विंशतितमे शतके समूहगतिशास्त्रं बहुधा महत्त्वं प्राप्य व्यापकमभूत् । अस्योद्भावनं **कर्टलेविन्महोदयेन** तत्रादावकारि। तस्य मतानुसारं समूहेन सह व्यक्तेः प्रतिक्रियाविशेषस्प अध्ययनमेव समूहगतिशास्त्रं वर्तते । एवं सति अस्य शास्त्रस्यावगमनार्थं समूहस्प लक्षणादीनामध्ययनमावश्यकं वर्तते । समूहो नाम केवलं कासाञ्चन व्यक्तीनां समुदायः इति चेन्न । तादृशाव्यवस्थितानां संघटनं समूहस्य लक्षणं भवितुं नार्हति । मनोविज्ञानानुसारं समूहो नाम व्यवस्थितं संघटनं यत् घनीभूतमेव क्रियात्मकं गृह्यते दृश्यते च। अधोलिखितैरंशैः तद् स्पष्टं जायते । यथा-

1) संघटिताः सर्वेऽपि सदस्याः स्वाङ्गीकृतमेकमेव ध्येयं वहन्ति ।
2) प्रत्येकं सदस्यस्य किञ्चिन्निर्दिष्टं पात्रं भवति ।
3) सदस्यत्वं व्यवस्थितं यथा भवति तथैव सदस्या अपि व्यवस्थिताः भवन्ति ।
4) समूहसदस्येषु परस्परं क्रियाकलापमनुष्ठातुमवसरः भवति ।
5) समूहभेदेन नायकत्वस्य स्वरूपे भेदः जायते ।
6) समूहस्य सदस्यानां मेलनार्थं पूर्वनिर्धारितं स्थानं भवति । कालोऽपि निर्धारितः वर्तते ।
7) अन्यसमूहैः सह सम्बन्धं स्थापयितुं तदीयसमूहस्य नियमः सिध्दान्तश्च भवतः ।
8) सदस्यानां व्यवहारं नियन्त्रयितुं स्वनिर्मिताः नियमाः भवन्ति ।

इत्येते अंशा प्राधान्येन समूहस्य लक्षणे समायान्ति । समूहस्य ध्येयस्वरूपक्रियाकलापाधारेण वर्गीकर्तुमपि शक्यते । तत्र च -

1. सामान्यसमूहः(Crowd)



ISSN : 2320-740X

एतादृशः समूहः तात्कालिकः कदाचित् भवति । यतो हि मार्गे अपघातः भवति चेत् तत्काले जनसमूहः तत्र सञ्जायते । तत्र सर्वेषां कुतूहलं भवति । कुतूहलस्य परिहारानन्तरं समूहः नष्टो भवति ।

2. संघटनम् अथवा कूटः (Organization or Club)

अत्र सदस्याः सोद्देश्येन, सादर्शेन, सावगमनेन एकत्रिताः भवन्ति । एतादृशसमूहस्य स्वकीयं विषयवस्तु भवति । सः विषयः प्रत्येकं सदस्यस्य कृते सम्बध्दो वर्तते । इदं संघटनं स्थिरं भवति ।

3. समुदायः – (Community)

अयं स्थिरः शाश्वतश्च वर्तते । समाजस्य हितं लक्ष्यीकृत्य सदस्याः जीवनं समर्पितवन्तः भवन्ति । अस्योत्तममुदाहरणं कक्ष्याप्रकोष्ठः । शिक्षणमेवात्र चरमं लक्ष्यं भवति । शिक्षकः अस्य नायकः वर्तते । अन्यथापि केचन शिक्षाविदः विविधप्रकारेण समूहस्य वर्गीकरणमकार्षुः । तद्यथा

1) **समनर्महोदयस्य वर्गीकरणं** (Summner's Classification )

डब्ल्यू.जी.समनम्महोदयः स्वकीये Educational Sociology पुस्तके प्रकारद्वयं समुल्लिलेख-

a) आन्तरिकसमूहः (Internal group)

b) बाह्यसमूहः (External group)

केवलं बालकानां वा बालिकानां समूहः आन्तरिकः अथवा अस्माकं समूहः इति चिन्त्यते । बालकाः बालिकानां समुहम् अन्येषां समूह इति चिन्तयन्ति ।

2) **कूले महोदयस्य वर्गीकरणम्**-(Cooley's Classification) सि.एच् कूले (C.H.Cooley) महोदयः परस्परं सदस्येषु विद्यमानघनिष्ठताधारेण वर्गीकरणमकरोत् । प्राथमिकसमूहः ,(Primary) उन्नतसमूहः वा प्रथमः, प्राधानसमूहः द्वितीयः(Secondary), तृतीयः समूहः (Tertiary) इति त्रिविघमवोचत् । प्राथमिकसमूहे सदस्येषु निकटतमः घनिष्ठः सम्बन्धः भवति । आत्मीयभावः अधिकः दृश्यते । परस्परं हितं तत्र निहितं भवति । परिवारः, ग्रामसमुदायश्चात्र उदाहरणम् । सेकेण्डरी समूहे व्यक्तिगतसम्बन्धः तथा घनिष्ठः न भवति । परस्परं हितमपि न परिगण्यते । उदा :- ट्रेडयूनियन्, व्यावसायिकसंघटनं, क्लब , इत्यादि । तृतीये टेरशरीसमूहे व्यक्तिगतसम्बन्धः न भवत्येव, उदा-चलचित्रमन्दिरे जायमानः समूहः, रेलयाने,बस्याने जायमानः समूहश्च ।



ISSN : 2320-740X

[redacted]

3) संघटितः स्वाभाविकश्चेत्यपि विभक्तुं शक्यते । स्वाभाविकसमूहः विना कामपि योजनां प्रयासं वा जायते । परन्तु संघटितः समूहः कानि चन विशिष्टोद्देश्यान्याधृत्यः जायते । एतत् पूर्वयोजनायाः फलरूपेण दृश्यते । सेना, विद्यालयश्च अत्र उदाहरणे भवतः । एवमेव औपचारिकः अनौपचारिकश्च समूह इत्यपि विभक्तुं शक्यते । अन्ततो गत्वा सर्वेषामपि समूहानां व्यवहारः भिन्नः, विचित्रः, विशिष्टश्च लोके परिलक्ष्यते ।

**समूहस्य मनः –(Group mind)-** मनोविज्ञानिनः समाजशास्त्रिणश्च समूहस्य मनसः परिकल्पनां विविधरूपेण प्रादुः । फ्रेञ्च समाजशास्त्री **लेबेन** वदति यत् व्यक्तिः एकाकिनी यदा व्यवहरति तथैव समूहे यदा व्यवहरति तदा तयोः व्यवहारयोः मध्ये महदन्तरं पर्यवलोक्यत इति ।

**मेक्डूगलप्रभृतयः** समूहं मनः बहु व्यवस्थितं,स्थिरं च भवति, यथा सेनायाः व्यवहारः,धार्मिकसमूहस्य व्यवहारः भवति । तदेव व्यक्तिगतं मनः चञ्चलं भवति । समूहे समर्पितभावमनुभवतीति च वदन्ति ।

एतादृशस्य व्यत्यासस्य कारणानि बहूनि वर्तन्ते । अतः समूहव्यवहारस्योपरि बहवः बाह्या अंशाः प्रभावं जनयन्तीत्य ङ्गीकर्तव्यमेव, तादृशप्रभावोत्पादकाः बिन्दवः वातावरणोपजाः नियमोपजाः , नेतृत्वगुणोपजाः, तत्त्वाधारिताश्च भवन्ति । सहानुभूतिः, समूहभावनाः, जागरिताः कृत्वा समूहव्यवहारं प्रभावयन्ति । व्यक्तिः अन्यव्यक्तेः मनोवैज्ञानिकपरिस्थितिमवगत्य व्यवहर्तुं योग्यतां प्राप्नोति । अनुकरणमपि समूहव्यवहारं विशेषेण प्रभावयति । अनुकरणं समूहे कार्यं कर्तुमनिवार्यं वर्तते । अनुकरणं अन्यव्यक्तेः समानव्यवहारमवगत्य तथैव व्यवहर्तुं सहकरोति । तेन समूहे ऐक्यभावः जायते । अतः समूहव्यवहारस्योत्तमरूपसम्पादनेऽनुकरणमेवोत्तरदायीति मन्यते ।

## समूहगतिशास्त्रस्य शिक्षायां प्रभावः

शिक्षायाः उपरि समूहगतिविज्ञानस्य प्रभावः अतिमहत्त्वपूर्णः वर्तते यतो हि शिक्षा अनिवार्येण एका सामूहिकप्रक्रिया वर्तते । समूहं विना शिक्षा नास्त्येव । समूहगतिविज्ञानं समूहस्य विशेषताः, परिचाययति । समूहे छात्रः एकरूपव्यवहारे, चिन्तने, अनुभवे च बाध्दो भवति । विद्यालयः समाजस्य लघुरूपः, तस्मात् तादृशे समूहे सांस्कृतिक-सामाजिक-नैतिक-राष्ट्रिय-व्यावहरिक-भावात्मक - संवेगात्मकगूणाः वर्धनीयाः वर्तन्ते । सर्वेऽप्येतादृशाः गुणाः गतिविज्ञानस्य अवगमनेन सम्पोषिताः संवर्धिताः जायन्ते, अतः समूहगतिशास्त्रस्य प्रभावः महत्त्वञ्च शिक्षायां समाविष्टे वर्तेते इत्यत्र नस्ति संशयः ।



ISSN : 2320-740X

## उपयुक्त ग्रन्थसूची


1) Brown.F.J. Educational Sociology, 1960, Printice Hall New York.
2) एस्.के.मङ्गल, शिक्षामनोविज्ञान, 2011, PHIL Private Limited New Delhi.
3) एन्.बि.कोङ्गवाड, शैक्षणिकमनोविज्ञान, विद्यानिधि प्रकाशन गदग
4) डा.एस्.पि.गुप्ता.उच्चतर शिक्षा मनोविज्ञान, 2010, शारदा पुस्तक भवन इलहाबाद
5) डा.एस्.एस्.माथुर.शिक्षामनोविज्ञान, 2008, अगरवाल् पब्लिकेशन् आगरा


*****



ISSN : 2320-740X

[redacted]

# वेदस्वरूपविमर्शः

डा. रामचन्द्रुल बालाजी
सहायकाचार्यः, शिक्षाशास्त्रविभागः

सनातनधर्मप्रकाशकाश्चतुर्विधपुरूषर्थसाधकस्मृतिशास्त्रितिहासपुराणादीनां मूलभूताः विश्वविख्याताः चत्वारः ऋग्यजुःसामाथर्वाभिधेयाः वेदाः अद्यापि विश्वाकाशमण्डले भास्कर इव प्रकाशमानाश्चोपलभन्त इति को न विजानाति ।

प्रत्यक्षादिप्रमाणेषु चूडामणिकल्पोऽयं वेदः प्रमाणमित्यभ्युपगऽछन्ति खलु आस्तिकाः । तथापि विमतयः केचन कुठाराघतं कुर्वन्ति तत्रेति,अन्धो न पस्यति चेत् न स्थाणोरपराधः ।

वेदस्य श्रुतिः, त्रयी, आम्नायः इत्यादिपर्यायशब्दाः विद्यन्ते । कोऽयं वेदो नाम, किं च तल्लक्षणम्, केवास्य विषयप्रयोजनसम्बन्धाधिकारिणः कथं वा तस्य प्रामाण्यम् ? इति सामान्यजनजिज्ञासा स्वाभाविकी । तत केचन

1) अपौरूषेयं वाक्यं वेदः,
2) अपूर्वार्थ प्रविपादकत्वे सति नित्यसर्वज्ञप्रणीतवाक्यम्,
3) लौकिकवाक्यभिन्नवाक्यम्,
4) धर्मब्रह्मप्रतिपादकं शस्त्रम्,
5) ब्रह्ममुखनिर्गत धर्मज्ञापकं शास्त्रम्,
6) सम्प्रदायानुसारेण स्वरादि विशिष्टा या वर्णानुपूर्वी परिपाटी सः,
7) इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति सः,
8) शब्दः तदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्केसति शब्दजन्यवाक्यार्थज्ञानजन्यप्रमाणशब्दः ।
9) विदिताखिलशावस्त्रार्थसर्वधर्मनिरूपणात् दर्शनानां प्रमाणत्वाद्वेद इत्यभिधीयते ।
10) विद्यन्ते, ज्ञायन्ते, लभन्ते वा एभिर्धर्मादि पुरूषार्था इति वेदः इत्यादि प्रकारेण विविधनिगमागम - तत्त्वविशारदविशदीकृत व्याव्यानमणिरश्मयश्च प्रकाशन्ते ।

तैत्तिरीयसायणभाष्यभूमिकायां। "इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः" इति निर्दुष्टं वेदलक्षणं कथितं वर्तते । अत्र लक्षणस्थालौकिक पदेन प्रत्यक्षानुमाने व्यावर्त्येते । किं वास्यप्रयोजनमित्यत्र-

तदुक्तम्-



ISSN : 2320-740X

[redacted]

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता।** (वे.भा.भू:)

स एवोपायो वेदस्य विषयः । तद्बोध एव प्रयोजनम् । तद्बोधार्थी च अधिकारी । तेन सह उपकार्योपकारकभावः सम्बन्धः।

किं तस्यस्वरूपमित्यत्र "मन्त्रब्राह्मणसमष्टिर्वेदः" इत्युक्तम् । तथाचापस्तम्बः स्मरति "मन्त्रब्राह्मणयोः" वेदनामधेयम् इति । वेदैकदेशयोर्मन्त्रब्राह्मणयोः पृथकस्वरूपं जैमिनिर्न्यायेन निर्णीतवान् । वेदप्रयुक्तमन्त्रशब्दस्य लक्षणं किमिति विचारे सति श्री खण्डदेवः स्वकीयभाट्टदीपिकासंहितायाम् "तच्चोदकेषुमन्त्राख्या" इत्यस्मिन् मन्त्रनिर्वचनाधिकरणे "यत्राभियुक्तानां मन्त्रपदवाच्यत्वप्रकारिका उपस्थितिर्विषयता सम्बन्धेम स मन्त्रः इति व्याख्यानमकरोत् । अत्र वाच्यतावच्छेदकं च मन्त्रत्वमधखण्डोपाधि वेदत्ववत् । मन्त्रस्वरूपनिणीयं द्वितियाध्यस्य प्रथमपादे सप्तमाधिकरणे न्यायविस्तारकारः इत्थमुदाजहार-

"अहेः बुध्निय मन्त्रं मे गोपाय इति मन्त्रस्य लक्षणम्, इत्याद्यारभ्य "विहितार्थाभिधायको मन्त्रः", एवं "मननहेतुर्मन्त्रः", "असिपदान्तो मन्त्रः" "उत्तमपुरुषान्तोमन्त्रः" इत्यदिकथितानां लक्षणानां परस्परदोषमुद्भाव्य याज्ञिकसमाख्यानस्य निर्दोषलक्षणत्वेन प्रतिपादितम् । तच्चसमाख्यानमनुष्ठाननेस्मारकादीनां मन्त्रत्वं गमयति। एवमेव वेदे केषुचिदभिधायकेषु वाक्येषु मन्त्र इति समाख्या सम्प्रदायविद्भिर्व्यवह्रियते इति सायणाचार्यः वदति। ब्राह्मणो नाम कः इत्यत्र निर्वक्ति सूत्रकारः "शेषे ब्राहमणशब्दः" इत्यस्मिन् ब्राह्मणनिर्वचनाधिकरणे नाम "मन्त्रातिरिक्त वेदत्वमेव ब्राह्मणत्वम् इति । शुक्रनीतावपि मन्त्रब्राह्मणयोलक्षणविचारः सुष्ठु कृतः द्दश्यते । तथाहि "जपहोमार्चनं यस्य देवताप्रीनिदं भवेत्। उच्चारान्मन्त्रसंज्ञं तद्विनियोगि च ब्राह्मणम्"। इति कथितं वर्तते।

नाम देवताप्रीत्यै जपहोमदेवपूजनादिषु उच्चार्यमाणः वेदभागः मन्त्रः इत्यभिधीयते। एवं विनियोग (प्रयोगविधौ) प्रयुक्तवेदभागः ब्राह्मणशब्देन व्यवह्रियते।

मन्त्रब्राह्मणनिर्वचनानन्तरं मन्त्रत्वार्दो व्यापकधर्मे निरूपिते तत्प्रसङ्गादेव तदवान्तरधर्मः ऋक्त्वादिः इति ऋगादीनां लक्षणानि निरूप्यन्ते सूत्रत्रये जैमिनिमुनिना । तथाहि "तेषामृग्यत्रार्थवशेन पादव्यवस्था" (जैः यू 2.1.35)

नाम पादव्यवस्थावन्मन्त्रत्वं ऋकत्वम् इति। "गीतिषु सामाख्या" (जै.सू.2.1.36) मन्त्रत्वसमानाधिकरण गीतित्वं सामत्वम् इति सामवेदतलक्षणम्। "शेषे यजुश्शब्द" (जै.सू 2.1.37) शेषे ऋक्सामभिन्ने मन्त्रजाते यजुश्शब्दः यजुःपदं व्यवह्रियते।

एवं शुक्राचार्येणापि शुक्रनीतौ ऋग्वेदादीनां लक्षणानि प्रतिपादितानि वर्तन्ते। तथाहि "ऋग्रूपा यत्र ये मन्त्राः पादशोऽर्धर्चशोऽपि वा। येषां होत्रं स ऋग्भागः समाख्यानं च यब वा। (शु.नीः4-32) इति ऋग्वेदस्य,



ISSN : 2320-740X

[redacted]

**"प्रश्लिष्टपठिता मन्त्रा वृत्तगीतिविवर्जिताः।**

**आध्वर्यवं यत्र कर्म त्रिगुणं यत्र पाठनम्।"**

मन्त्रब्राह्मणायोरेव यजुर्वेदः स उच्यते। इति यजुर्वेदस्य, "उदगीथं यस्य शस्त्रादेर्यज्ञे तत्सामर संज्ञकम्" इति सामवेदस्य।

"अथर्वाङ्गीरसो नाम ह्यपास्योपसनात्मकः" इति अथर्ववेदस्य च लक्षणानि उक्तानि वर्तन्ति।

<u>वेदस्य प्रामाण्यविचारः</u> –

वेदस्य प्रामाण्यं तु बोधकत्वात् स्वतएव सिद्धम् । पौरूषेयवाक्यं तु बोधकमपि सत् पुरूषगतभ्रान्तिमूलत्वसम्भावनया तत्परिहाराय मूलप्रमाणमपेक्षते न तु वेदः । तस्यनित्यत्वेन वकतृदोषशाङ्कानुदयात्। एतदेव जैमिनिमुनिना सूत्रितम् -

"तत्प्रमाणं बादरायणसथानपेक्षितत्वात्" इति । अतः श्रुतिस्मृतिभ्यां नित्यत्वावगमात् वेदस्यापौरुषेयत्वं तस्मात् प्रामाण्यं, नित्यत्वञ्च। सामन्यव्यवहरेऽपि शब्दस्यातीवं प्राधान्यं दृश्यते। परन्त् जगत्स्वभावस्तु विचित्रः –"असत्यंवद, अधर्मं चर मद्यपानं कुर" इत्याद्युपदेष्टारः कसिन्नपि धर्मे, वर्गे सम्प्रदाये वा न सन्त्येव – सत्यं वद मद्यपानं न न कर्तव्यमित्याद्युपदेशका एव। तत्र यदि वेदोऽस्मान् सत्यं वदेत्यादि वाक्यैः तथोत्तमाचरणं शिक्षयति - इति ब्रूमश्चेत् आधुनिकः जनः कुप्यति, वेदः कः ? काल्पनिकः सः साम्प्रदायिकः इत्यादि प्रलपति किन्तु कर्तव्याकर्तव्ययोग्यायोग्प धर्मादि कर्मबोधकोऽयं वेद इति नाधिगच्छति लोकः। यदि माणिक्यं न परिचिनोति लोकस्तर्हि कस्यदोषः ?

अन्यच्च नेत्रगम्यविषयैव सत्यः तस्यैवास्तितता, नेत्रागोचरविषयस्तु नास्त्येवेति केषाञ्चन विचारः। अस्माभिः प्रतिदिनं देशविदेशेषु खगोले वा सम्भूतानां वृत्तान्तानाम् ज्ञानं प्रसारसाधनानां द्वारा प्राप्यते, तज्ज्ञानं नहि शब्दप्रमणमन्तरा विश्वसितुं शक्यते । तत्र प्रत्यक्षानुमानादि प्रमाणाभावात् । यदा मनुष्यो व्याधिग्रस्तो भवति तदा तन्निवारणार्थं तस्यपराधीनतामन्तरा गत्यन्तरं नास्ति अत एव जाड्यमप्रतिपत्रिः स्यात्सर्वकार्येषु ---पारवश्न "मेतैर्जाङ्गे निरूप्यते" इति भावप्रकाशनोक्तरीत्या परवशतारूपं जाड्यं स्वीकर्तव्यं भवति । रोगनिवारणार्थं शब्दप्रामाण्यं सवैरपि उररीक्रियते । तस्मादेव "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्" इति गौतमसूत्रं "त्रैविद्य वृद्धानां वेदाः प्रमाणमिति निष्ण" आपस्तम्बसूत्रम्।

अपि च कामन्दकीयनीतिसारे "धर्मं पुरस्कृत्य यतेतार्थाय भूपतिः" "धर्मेण वर्धते राज्यं तस्य स्वादुफलं (श्रियः)" इत्यादि वचनप्रामाण्यानुरोधेन धर्मादीनां ज्ञानमावश्यकं राज्ञे। अयं धर्मः, अयञ्चाधर्म इत्यादि सत्कर्म दुष्कर्मादि बुद्धिस्तु वेदाधीना भवति । धर्माधर्म विज्ञाने सत्येव राजाभूपतित्वमविन्दति । अन्यथा तद्विज्ञन परिहीना नेतारः लोककत्याणशब्दजालेन जनानाच्छादद्यान्घकारकूपे प्रक्षिपन्तीति प्रतिक्षणं तत्फलमनुभवामो वयम्। परिपालनं तु धर्मादि ज्ञानमन्तरा नोपपद्यते, धर्मादि ज्ञानहेतुभूतोऽयं वैदः किल जगत्परीपालन जीवातुः" अत एव तत्परिपालनोपयुक्त वेदः प्रमाणमिति सत्यमङ्गीकर्तव्यम्।



ISSN : 2320-740X

एवम् "आन्वीक्षकी त्रयी वार्ता दण्डनीतिश्च शाश्वती। विद्वाश्वतस्रः एवैता लोकसंस्थिति हेतवः" इत्यत्र त्रयी शब्दस्य व्याख्याने ऋकयजुःसामेत्येव नामानस्त्रयो वेदाः त्रयी स्मृतामता-धर्मा धर्मवेदनात् वेदा इति। उपनिषदपि "धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति" इति। "लोकस्य सम्यक् स्थितिः तस्यै कारणभूतानां त्रय्यादीनां विधानामधिगमाय विद्यावृद्धगुरुं सेवेत्" इत्युक्तम्। गुरूस्तु विद्याधिगमाय सेव्यते। सुनिपुणं सुगुरूमुपसेव्य नृपपदाय शमाय च क्षमः" इत्वञ्च राष्ट्रेयंस्थिति-----हेतुभूतेषु अन्यतमा त्रयी, त्रयीज्ञानेन विना लोकसंस्थितिर्न सम्भवति, इति स्पष्टम्। तर्हि लोकसंस्थितिकारणत्वाच्च वेदाः प्रामाणमिति सुतरानधिगन्तव्यं खलु।

याज्ञवल्क्यः "व्यवहारान्नृप पश्येत् ----धर्मशास्त्रानुरोधेन क्रोधलोभविवर्जितः" सभ्यै परिवृतोऽन्वहं राजा व्यवहारान् पश्येत् इत्यत्र स्भ्याः के? इति चेत् "श्रुताध्ययनसम्पन्नाः धर्मज्ञा" इत्याद्युक्तम्।

मीमांसाव्याकरणादिश्रवणेन, अध्ययनेन वेदाध्ययनेन सम्पन्नाः धर्मज्ञाः सत्यवादिनः सभ्याः भवन्ति। निस्सन्देहेन बहुविधलाभप्रयोजकवेदाः प्रमाणमिति सर्वथाङ्गीकरणीयमिति वस्तुस्थितिः। किन्तु अर्थ एव प्रधानमिति विचार्यमाणामनुकूलोद्भवा अनुपग्रस्तोऽयं वेद इति तमाक्षिपन्तीति विषादेष विद्धंमनः।

प्रयोजनमस्तिनवा वेदस्येति विचारात्पूर्वं लोके किमपि वस्तु तथास्ति फलदायकमिति?

लक्षाधिकधनव्ययसाध्यं M.B.B.S, B.E, CA इत्यादि धनसम्पादनोपायभूतामुपाधिं लब्ध्वापि धनमार्जयन्तिवा यथेष्टम् सर्वे। तथाविधोपाधिविहीनाः केचन अक्षारज्ञानशून्याश्च इहवा दुबैप्रभृति देशगमनेनवा अल्पेकाले एव लक्षाधीशाः कोट्यधीशाः किं न भवन्ति। अत्रोपाधेः किं प्रयोजनम्? मारूतिवाहनस्य, वर्णयुक्तदूरदर्शिन्यश्च प्रयोजनं किमस्ति दरद्राय? अतः कस्मैचित् प्रयोजनं भवति कस्मैचित् न। "अर्थोऽस्तु नः केवलम्" इतिरीत्या सत्यसत्यधर्माधर्मकर्तष्ययोग्यायोग्यन्यायान्यायादिविवेकविरहमणिविशोभिताः जनाः केवलमर्थार्जनतत्परा अनुसरंतं व्याघ्रं पश्यन् मृगो यथा तथा कालेऽस्मिन् महाविपिने प्रधावन्ति। एवं धावमानेभ्यो मानवेभ्यो वेदस्य प्रयोजनमीषदपि नास्त्येव। तथ्यमिदं "तानि त्वयोपास्यानि" 'नो इत्राणि 'सत्यंवद' 'धर्मंचर' इत्यादि सत्यधर्मकर्तव्यादि विवेकं शिक्षयति वेदः। 'परस्मिन् बन्धुर्क्गे वा' "मित्रे द्वेष्ये रिपौ तथा आत्मवद्वर्तितव्यम्" "अर्थमनर्थं भावय नित्यम्" इत्यादीनि श्रुतिसारभूतानि वचांसि ज्ञापयन्ति सर्वथा सर्वदा संदेहसंकोचपक्षपातादिकं विना वेदस्य प्रयोजनमस्तीति अभ्युपगन्तव्यमेव।

*****



ISSN : 2320-740X

## तत्त्वान्वेषणे साधनसरणिः

**डा. नवीनहोळ्ळः**
सहायकाचार्यः, नव्यन्यायविभागः

अध्यात्मविद्या हि विद्यास्वशेषासु वेदवेदाङ्गप्रभृतिषु निरतिशयमुत्कर्षमावहतीति निर्विवादम् । श्रूयते इतरविद्यापेक्षया आत्मविद्यायाः परत्वम् **'द्वे विद्ये वेदितव्ये परा चैवापरा च.... अथ परा यया तदक्षरमधिगम्यते'** इति। गीतासु च **'अध्यात्मविद्या विद्यानाम्'** इति । उपनिषत्सु विस्तरेण प्रतिपादितायाः ब्रह्मविद्यादिशब्दैः व्यपदिश्यमानाया अस्याः दुरधिगम्यत्वं श्रुतिःसदृष्टान्तमाह **'क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति'** इति । सर्वानर्थपरम्पराणां मूलोच्छेदनसमर्थायाः निरतिशयानन्दाविर्भावकपरमपुरुषार्थसमधिगामैकहेतोः आत्मविद्यायाः सम्प्राप्तौ अनुसरणीयां साधनसरणिं सुस्पष्टमादर्शयति श्रीमच्छङ्करभगवत्पादप्रणीतः 'विवेकचूडामणिः' ।

**जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता**
**तस्माद् वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात् परम् ।**
**आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थितिः**
**मुक्तिर्नौ शतकोटिजन्मसु कृतैः पुण्यैर्विना लभ्यते ॥**

जन्तुभिः क्रमशः समधिगन्तव्यानि साधनानि सोपानक्रमेण निर्दिश्यन्ते, मानुषजन्म-पुरुषत्वं-विप्रत्वं-वेदो क्तधर्मानुष्ठानपरता-वेदान्तवाक्यश्रवणपूर्वकज्ञानप्राप्तिः - युक्तिपूर्वकम् आत्मानात्मविवेचनं - निदिध्यासनपूर्वक ब्रह्मसाक्षात्कारः, वासनाक्षयमनोनाशाभ्यां ब्रह्मभावेन अवस्थानमिति ।

आत्मज्ञानप्राप्तेः प्रथमं साधनं **मानुषजन्मैव** । मानुषशरीरं हि **'चतुरशीतिलक्षयोनिपरिणतं'** इति स्मर्यते, **'न मानुषं विनाऽन्यत्र तत्त्वज्ञानं तु लभ्यते'** इति च । द्वितीयं साधनं **पुंस्त्वम्** । यतोहि ज्ञानप्राप्तेः बहिरङ्गसाधानानां वेदोक्तकर्मणां यथाविध्यनुष्ठानसामर्थ्यं स्त्रीणां न विद्यते । ज्ञानप्राप्तेरन्तरङ्गसाधनस्य सन्यासाश्रमस्य ब्राह्मणैकाधिकारिकतया, ब्राह्मणस्यैव ऐदम्पर्येण ब्रह्मविचारः सुघटः, न तु क्षत्रियादीनाम् । चिन्ताविक्षेपहेतूनां बाह्यव्यापाराणां सत्त्वात् । अतो**विप्रत्वम**ग्रिम साधनम्। अत्र चिन्त्यते । ननु पशुजन्मनि अज्ञाननिवृत्तिपूर्वकमोक्षावाप्तिः गजेन्द्रादीनां स्मर्यते,

**'गजेन्द्रो भगवत्स्पर्शात् विमुक्तोऽज्ञानबन्धनात् ।**
**प्राप्तो भगवतो रूपं पीतवासश्चतुर्भुजः ॥ (भागवतम् ८.४.६)'**

स्त्रीजन्मनि ब्रह्मवादित्वं योगसमाधिसम्पतिश्च देवहूत्याः स्मर्यते,

**'स्वमात्रा ब्रह्मवादिन्या कपिलोऽनुमतो ययौ ॥' (भागवतम् ३.३३.१२)**



[redacted]

ISSN : 2320-740X

**ध्यायती भगवद्रूपं यदाह ध्यानगोचरम्।**

**सुतः प्रसन्नवदनं समस्तव्यस्तचिन्तया॥**

**भक्तिप्रवाहयोगेन वैराग्येण बलीयसा।**

**युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना॥**

**ब्रह्मव्यवस्थितमतिर्भगवत्यात्मसंश्रये।**

**नित्यारूढसमाधित्वात् परावृत्तगुणभ्रमा॥(३.३३.२७)**

**स्वाङ्गं तपोयोगमयं मुक्तकेशं गताम्बरम्।**

**दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः॥(२९)**

योगपाटवं दाक्षायण्याः स्मृतम् –

**कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः।**

**शनैर्हृदि स्थाप्य धियोरसि स्थितं कण्ठाद् भ्रुवोर्मध्यमनिन्दितानयत्॥**

**(४.४.२५)**

**ततः स्वभर्तुश्चरणाम्बुजासवं जगद्गुरोश्चिन्तयती न चापरम्।**

**ददर्श देहो हतकल्मषः सती सद्यः प्रजज्वाल समाधिजाग्निना॥**

मन्त्रद्रष्टृत्वं ब्रह्मवादित्वं च स्मर्यते घोषादीनाम् –

**घोषा गोधा विश्ववारा अपालोपनिषन्निषत्।**

**ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसादितिः॥**

**इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी।**

**लोपामुद्रा च नद्यश्च यमी नारी च शश्वती॥**

**श्रीर्लाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा।**

**रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः॥(बृहद्देवता २.८४)**

स्त्रीजन्मनि ब्रह्मभावापत्तिश्च स्मर्यते देवहूत्याः –

**एवं सा कपिलोक्तेन मार्गेणाचिरतः परम्।**

**आत्मानं ब्रह्म निर्वाणं भगवन्तमवाप ह॥** (भागवतम् ३.३३.३०)

एवं क्षत्रियजन्मनि ब्रह्मज्ञानित्वं जनकादीनां स्मर्यते। तथा च मनुष्यत्व-पुंस्त्व-विप्रत्वानां मोक्षसाधनत्वं तत्त्वज्ञानसाधनत्वं वा व्यभिचारात् दुर्घटम् इति चेत् उच्यते – तत्त्वज्ञानकारणीभूतानां श्रवणमनननिदिध्यासनानाम् अनुष्ठानोपयोगितया मनुष्यत्व-पुंस्त्व-विप्रत्वानां तत्त्वज्ञानसाधनत्वं, न तु साक्षात् तत्साधनत्वम्। गजेन्द्रादिश्च पूर्वजन्मनि मानुषशरीरे भगवत्परायणो भूत्वा तानि साधनानि



ISSN : 2320-740X

[redacted]

अन्वतिष्ठदेव । तत्फलीभूतस्य तत्त्वसाक्षात्कारस्य मोक्षस्य च प्राप्तौ प्रतिबन्धकीभूतात् ऋषिशापायत्तकौञ्जरजन्मनोवशात् फलं विलम्बितम्।

स्मर्यते हि –

**'स वै पूर्वमभूद्राजा पाण्ड्यो द्रविडसत्तमः ।**
**इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ॥**
**विप्रावमन्ता विशतां तमोऽन्धं यथा गजः स्तब्धमतिः स एव । (८.४.१०)**
**एवं शप्त्वा गतोऽगस्त्यो भगवान् नृप सानुगः ।**
**इन्द्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन् ।**
**आपन्नः कौञ्जरीं योनिम् आत्मस्मृतिविनाशिनीम् ॥**

देवहूतीप्रभृतीनां तु इह स्त्रीजन्मनि योगसमाध्यादिसाधनानुष्ठानेऽपि ब्रह्मभावापत्तावपि च न पुंस्त्वस्य साधनत्वभङ्गः । स्थैर्यधैर्यादिमत्त्वरूपस्यैव पुंस्त्वस्य अत्र विवक्षितत्वात्, तस्य च तासु अक्षतत्वात् । न हि श्मश्वादिमत्त्वरूपं तदभिव्यङ्ग्यजातिविशेषरूपं वा पुंस्त्वमत्र विवक्षितुमुचितं, तस्य अकिञ्चित्करत्वात् । अपि तु चाञ्चल्य-अबलत्व-अशुचित्व-कामित्वादिमत्वरूपस्त्रीत्वस्य विरुद्धं स्थैर्य-धैर्य-शुचित्व-अकामित्वादिमत्वरूपमेव पुंस्त्वम् । तस्यैव मोक्षसाधनानुष्ठानोपयोगित्वात् ।

एवं जनकप्रभृतीनाम् इह क्षत्रियान्वयप्रसूतत्वेऽपि रज उपसर्जनसत्त्वप्रधानतारूपं विप्रत्वम् अक्षतमेव । अतो न विप्रत्वस्य साधनताभङ्गप्रसङ्गः इति सर्वमनवद्यम्।

विप्रत्वं प्राप्य यथाविधि वेदोक्तकर्माणि अनुतिष्ठता पुरुषेण वेदान्तवाक्यश्रवणादियोग्यतारूपं **साधनचतुष्टयं** सम्पादनीयम्।

तत्राद्यं साधनं **नित्यानित्यवस्तुविवेकः**। **'ब्रह्मसत्यं जगन्मिथ्येत्वेवं रूपो विनिश्चयः । सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः ॥'** ततो द्वितीयसाधनम् **वैराग्यम्** - दर्शनस्पर्शनादिना अनुभूयमाने ऐहिकदेहादिभोग्यवस्तुनि, श्रूयमाणे आमुष्मिकदिव्यदेहादिभोग्यवस्तुनि च काकविष्ठायामिव असह्यबुद्धिः 'कदापि ईदृशपदार्थ सम्बन्धो मा भूदिति' वैराग्यमुच्यते । **'तद् वैराग्यं जिहासा या दर्शनश्रवणादिभिः । देहादिब्रह्मपर्यन्ते ह्यनित्ये भोग्यवस्तुनि' ॥** साधनचतुष्टये प्रधानं चित्तशुद्ध्यपरपर्यायम् इदं वैराग्यमेव वैदिककर्मानुष्ठानस्य फलम्, **'चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये'** । तत्रापि तीव्रवैराग्यमेव साधकं साधनपथे समुन्नयति न तु आपातवैराग्यम् । वैराग्यस्य हेतुः देहादिविषयेषु दोषदर्शनम् **'विरक्तितीव्रत्वनिदानमाहुः भोग्येषु दोषेक्षणमेव सन्तः'** । ततः तृतीयसाधनं **शमादिषट्कसम्पत्तिः** (i) भोग्येषु आद्यन्तवत्त्व-बहुवित्तव्ययायाससाध्यत्व-परिणतिविरसत्त्वादिदोषान् पुनः पुनरनुसन्धाय तेभ्यो विषयेभ्यः मनः परावर्त्य सगुणे निर्गुणे वा ब्रह्मणि मनसो नियमेन अवस्थापनं **शमः** । **'विरज्य विषयव्रातात् दोषदृष्ट्या मुहुर्मुहुः । स्वलक्ष्ये नियतावस्था मनसः शम उच्यते ।'** (ii) श्रवणादि पञ्च ज्ञानेन्द्रियाणि वागादि



[redacted]

ISSN : 2320-740X

पञ्च कर्मेन्द्रियाणि च शब्दादिभ्यः स्वविषयेभ्यः पराङ्मुखीकृत्य तेषामिन्द्रियाणां गोलकेषु कर्णशष्कुल्यादि प्रदेशेषु उपरतव्यापारतासम्पादनं **दम** इत्युच्यते । **'विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके । उभयेषामिन्द्रियाणां स दमः परिकीर्तितः'** (iii)यथा तटाकजलं कुल्याद्वारा निर्गत्य क्षेत्राकारेण परिणमते तथा अन्तस्थं मनः श्रोत्रादीन्द्रियद्वारा बहिरागत्य शब्दादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरुच्यते। इन्द्रियेषु निगृहीतेषु अन्तःस्थमनसः बाह्यविषयाकारा वृत्तिः न जायते । एषा मनसः बाह्यविषयाकाराप्राप्तिरेव **उपरतिः** । **'बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा'** (iv) शैत्योष्णादिजनितानां सकलदुःखानां कम्बलव्यजनादिभिः प्रतीकारं अकृत्वा, विनाचिन्तां विलापञ्च यत् सहनं सा **तितिक्षा । 'सहनं सर्वदुःखानाम् अप्रतीकारपूर्वकम् । चिन्ताविलापरहितं सा तितिक्षा निगद्यते'**(v)'तत्त्वमसि' इत्यादिवेदवाक्ये तदनुसारिगुरुवाक्ये च 'इदम् अबाधितार्थबोधकम्' इति यो दृढविश्वासः स **श्रद्धा** । **'शास्त्रस्य गुरुवाक्यस्य सत्यबुध्यवधारणा । सा श्रद्धा कथिता सद्भिः यया वस्तूपलभ्यते ॥** (vi )सङ्कल्पविकल्पात्मकतातो विनिर्मुक्तायाः अध्यवसायात्मिकायाः बुद्धेः सर्वदा शुद्धे ब्रह्मणि सम्यग् अवस्थापनं समाधानम् । **'सम्यगास्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा । तत्समाधानमित्युक्तं न तु चित्तस्य लालनम्' ।** साधनचतुष्टये अन्तिमसाधनं **मुमुक्षा**-अज्ञानेन कल्पितान् अहङ्कार-प्राण-बुद्धि-मन-इन्द्रिय-देहान्-शुद्धात्मस्वरूपज्ञानेन मोक्तुमिच्छा । **'अहङ्कारादिदेहान्तान् बन्धान् अज्ञानकल्पितान् । स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षता'**।

इत्थं दृढवैराग्यवान् साधनचतुष्टयसम्पन्नः प्रसक्त **सकलकर्मसंन्यासपूर्वकं** ब्रह्मणि लीनमनस्कं गुरुं समाश्रयेत् । गुरुसन्निधौ वेदान्त **वाक्यश्रवणं,** ततः श्रुतार्थस्य दार्ढ्याय उपपत्तिभिः चिन्तनरूपं **मननम् आत्मानात्मविवेचनं** कुर्यात् । तद्यथा- त्वङ्मांसरुधिरादिभिः समुत्पन्नं जीवस्य सुखदुःखोपलब्धिसाधनं स्थूलशरीरमित्युच्यते, नैतद् आत्मा । जन्मजरामरणादयः स्थूलस्य धर्माः, नात्मनः । पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि पञ्चप्राणाः पञ्चसूक्ष्मभूतानि मनोबुद्ध्यहङ्कारचित्तानि अविद्याकामकर्माणि एतत्सर्वं मिलितं सूक्ष्मशरीरमित्युच्यते । एतदेव 'लिङ्गशरीरं जीवस्य भोगहेतुरनादि आमोक्षं स्थास्यति, नैतदात्मा । अन्धत्वादयः सूक्ष्मशरीरान्तर्गतेन्द्रियादीनां धर्माः, न तु आत्मनः । सत्त्वरजस्तमोरूपगुणत्रयमयी सकलजगदुत्पत्तिहेतुभूता माया अविद्यापदबोद्ध्या अव्यक्तनाम्नी शक्तिः कारणशरीरमित्युच्यते, नेयमात्मा । मायायाः सत्त्वरजस्तमोगुणानां कार्यरूपाः क्रमेण तिस्रः शक्तयः ज्ञानशक्तिः विक्षेपशक्तिः आवरणशक्तिः इति। विक्षेपशक्तितः रागदुःखादयो जायन्ते, आवरणशक्तितः अज्ञानालस्यादयो जायन्ते । ज्ञानशक्तितः अमानित्वश्रद्धाभक्त्यादयो जायन्ते । मायातत्कार्यभूतं जगदिदं सूक्ष्मस्थूलदेहपर्यन्तं सर्वम् अनात्मजातं मिथ्यैव । **'माया मायाकार्यं सर्वं महदादि देहपर्यन्तम् । असदिदमनात्मतत्वं विद्धि त्वं मरुमरीचिका कल्पम् ॥'**(125)शरीरत्रयव्यतिरिक्तः आत्मा नित्यः सत्यश्च जाग्रत्स्वप्नसुषुप्त्याख्यावस्थात्रयेऽपि साक्षी भवति । मायायाः आवरणविक्षेपशक्तिभ्यां आत्मनः बन्धः समागतः **'एताभ्यामेव शक्तिभ्यां बन्धः पुंसः**



ISSN : 2320-740X

**समागतः । याभ्यां विमोहितो देहं मत्वात्मानं भ्रमत्यम् ॥'** ( 146) गाढतमोमय्या आवरणशक्त्या आत्मनि आवृते सति राजसी तीव्रविक्षेपशक्तिः पुरुषं बहुविधदुःखैः क्षपयति । यथा नभसो नैल्यं न वास्तवं तथैव निर्विकारस्य निस्सङ्गस्यात्मनः देहादिसम्बन्धरूपः संसारः न वास्तवः, अपि तु भ्रान्तिमूलकः । यथा पुरुषस्य भ्रान्त्या रज्ज्वज्ञानरूपया रज्जौ सर्पः कल्प्यते,रज्जुसाक्षात्कारेण रज्ज्वज्ञाननिवृत्तौ निवर्तते,तथा बुद्धेः भ्रान्त्या आत्मतत्त्वाज्ञानरूपया निर्गुणे आत्मनि जीवभावः कल्पितः, आत्मतत्त्वसाक्षात्कारेण निवर्तते आत्मतत्त्वाज्ञानमपि निवर्तते । **'बुद्धेःभ्रान्त्या प्राप्तो जीवभावो न सत्यो मोहापाये नास्त्यवस्तु स्वभावात्'(198)'रज्ज्वां सर्पो भ्रान्तिकालीन एव भ्रान्तेर्नाशे नैव सर्पोऽस्ति तद्वत्'** (199)। इत्थं श्रवणमननाभ्यां असम्भवनायाः संशयभावनायाश्च निवृत्तौ श्रुतात्मतत्त्वस्य दार्ढ्ये परमार्थतत्त्वस्य ध्यानं **निदिध्यासनं** निरन्तरं चिरकालं कुर्यात्।

निर्गुणतया अतीवसूक्ष्मं स्वप्रकाशसदानन्दरूपम् आत्मयाथात्म्यं शरीरादिस्थूलवस्तुविषयिण्या अन्तःकरणवृत्त्या व्याप्तुं न शक्यते । अत्यन्तनिर्मलान्तःकरणैः मुमुक्षुभिः अत्यन्तसूक्ष्मया प्रपञ्चाऽविषयिण्या अखण्डाकारया अन्तःकरणवृत्त्या आत्मतत्त्वं विषयीकर्तुं शक्यते । निरन्तरचिरकालध्यानाभ्यासवशात् अन्तःकरणं सत्त्वरजस्तमोमलं परित्यज्य विपरीतभावनादिदोषशून्यं सत् निर्वृत्तिकं ब्रह्ममात्रावशेषं भवति । तदा अप्रयनेनैव ब्रह्मस्वरूपभूतानन्दरसानुभावकः सकलविकल्परहितः **निर्विकल्पः समाधिः** सम्पद्यते।

निर्विकल्पप्रात्युपायाः – **योगस्य प्रथमं द्वारं वाङ्निरोधोऽपरिग्रहः ।**

**निराशा च निरीहा च नित्यमेकान्तशीलता ॥**

**वाङ्निरोधः** मौनम् । व्यवहारेण मनोवृत्तीनां वर्धनात् अवश्यं मौनमवलम्बनीयम्। अपरिग्रहः - शरीरस्थितिमात्रसाधनातिरिक्तभोगसाधनानां अस्वीकारः । तत्स्वीकारे तद्रक्षणादौ व्याप्रियमाणस्य चित्तस्य वृत्तिनिरोधाऽसम्भवात् अपरिग्रहः आश्रयणीयः । **निराशा**-वैराग्यं । **निरीहा**-कर्मभ्यः उपरतिः । **एकान्तशीलता**- विजनवासः। इच्छायां सत्यां, कर्मणि आचर्यमाणे सति, जनसङ्घे स्थितौ च चित्तविक्षेपात् निराशा-निरीहा-एकान्तवासः-एतत्त्रयमवश्यकम् । एवम् आत्मानात्मविवेचनजन्यः आत्मस्वरूपयाथात्म्यानुभवोऽपि साधनम्।

निर्विकल्पयोगस्य फलम्-निर्विकल्पक समाधिनैव ब्रह्मतत्त्वं स्फुटं करतलामलकवत् अवगम्यते, नान्यथा । निर्विकल्पेनैव मिथ्याज्ञानजनितानां समस्तवासनानां नाशः,सञ्चिताखिलकर्मणां नाशो भवति, अन्तः बहिः सर्वत्र सर्वदा आत्मस्वरूपं प्रकाशते।

ज्ञानप्राप्तेः प्रतिबन्धकानि-

**लोकवासनया जन्तोः शास्त्रवासनयापि च ।**

**देहवासनया ज्ञानं यथावन्नैव जायते ॥ (272)**



[redacted]

ISSN : 2320-740X

'सर्वे जनाः यथा मां न निन्दन्ति यथा स्तुवन्ति तथैव चरिष्यामि' इत्यभिनिवेशः **लोकवासना** । ज्ञानप्राप्तौ इयम् अत्यन्त प्रतिबन्धिका । 'बहूनि शास्त्राणि अध्येष्ये' इत्याद्यभिनिवेशरूपा **शास्त्रवासना** । प्रतिष्ठादिद्वारा भुक्तिमात्रहेतुत्वात् मुक्तिविरोधात् दर्पहेतुत्वात् इयं प्रतिबन्धिका । **देहवासना** नानाविधा, देहे आत्मत्वभ्रान्तिः, देह गुणाधानभ्रान्तिः देहे दोषापनयनभ्रान्तिरित्यादिः | अत एव-

**लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानुवर्तनम् ।**
**शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु ॥ (271)**

प्रमादोऽपि यत्नेन वारणीयः । जातविवेकोऽपि कदाचिदपि ब्रह्मनिष्ठायां प्रमादम् अनवधानं नाश्रयेत् । ज्ञानिनापि यत्नेन वारणीयः प्रमादः । ज्ञानिनोऽपि चित्तम् ईषद् लक्ष्याद् ब्रह्मणः च्युतं चेत् बहिर्मुखं सत् ततस्ततः अहङ्कारात् बुद्धिमनः प्राणेन्द्रियदेहविषयेषु निपतेत् ।

इत्थम् अप्रमादेन निरन्तरध्यानाभ्यासवशात् निर्विकल्पसमाधिं प्राप्य साक्षात्कृतब्रह्मणः अविद्यादिनाशात् **ब्रह्मात्मना संस्थितिरूपो** मोक्षः सम्पद्यते इति।

अत्र चिन्त्यते – ब्रह्मतत्त्वसाक्षात्कारं प्रति चित्तवृत्तिनिरोधरूपस्य निर्विकल्पस्यैव कारणत्वं भगवत्पादसम्मतं प्रतीयते **निर्विकल्पसमाधिना स्फुटं ब्रह्मतत्त्वमवगम्यते ध्रुवम् । नान्यथा चलतया मनोगतेः प्रत्ययान्तरविमिश्रितं भवेत्** (366)'**तस्माच्चितनिरोध एव सततं कार्यः प्रयत्नान्मुनेः**'(369)इति वचनात् । चित्तनाशं प्रत्यपि निर्विकल्पकस्य कारणत्वं तत्सम्मतं प्रतीयते **'समाधिनाऽनेन समस्तवासनाग्रन्थेर्विनाशोऽखिलकर्मनाशः'**(364) इति वचनात् ।

जीवन्मुक्तिविवेककारास्तु शुद्धात्मतत्त्वसाक्षात्कारे न हि निर्विकल्पसमाधिरेक एव उपायः, चिज्जडविवेकेनापि साक्षात्कारसम्भवात् ।

अत एवाह वसिष्ठः – **'द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ।**
**योगस्तद्वृत्तिरोधोहि ज्ञानं सम्यगवेक्षणम् ॥**
**असाध्यः कस्यचिद्योगः कस्यचिद् ज्ञाननिश्चयः।**
**प्रकारौ द्वौ ततो देवो जगाद परमेश्वरः ॥'** इति ।

न च विवेकोऽपि योगे पर्यवस्यति, विवेकदर्शनवेलायां आत्ममात्रगोचरायाः एकाग्रवृत्तेः क्षणिक सविकल्पसमाधिरूपत्त्वात् इति वाच्यम् । सविकल्पकनिर्विकल्पकयोर्वृत्त्यवृत्तिभ्यां स्वरूपभेदस्य स्फुटत्वात् साधनतोऽपि भेदसत्त्वाच्च इत्याहुः ।

गूढार्थदीपिकाकारा अपि एतदेव अभिप्रयन्ति । स्पष्टयन्ति च यथा हि चित्तवृत्तिनिरोधः साक्षिसाक्षात्कारहेतुः तथा जडविवेकेन सर्वानुस्यूतचैतन्यपृथक्करणमपि, नावश्यं योग एवापेक्षितः । अत एवाह वसिष्ठः'द्वौ क्रमौ.....इति। साक्षिणः सकाशात् तदुपाधिभूतचित्तस्य पृथक्करणेन तददर्शनरूपस्य चित्तनाशस्य उपायद्वयम्। एकोऽसंप्रज्ञातसमाधिः, यत्र सर्ववृत्तिनिरोधात् अन्तःकरणसत्त्वं नानुभूयते ।



ISSN : 2320-740X

द्वितीयः 'साक्षिणि कल्पितं साक्ष्यम् अनृतत्वात् नास्त्येव, साक्ष्येव परमार्थसत्यः केवलो विद्यत' इति विचारः । तत्र प्रथममुपायं प्रपञ्चपरमार्थतावादिनो हैरण्यगर्भादयः प्रपेदिरे । चित्तस्य अदर्शनेन साक्षिदर्शने प्राप्तव्ये चित्तवृत्तिनिरोधातिरिक्तोपायाऽसम्भवात्, चित्तस्य तन्मते परमार्थत्वात् । श्रीमच्छङ्करभगवत्पूज्यपादमतोपजीविनस्त्वौपनिषदाः प्रपञ्चमिथ्यात्ववादिनः द्वितीयमेवोपायमुपेयुः । अधिष्ठानज्ञानदार्ढ्ये सति तत्र कल्पितस्य बाधितस्य चित्तस्य तद्वृत्तेश्च अदर्शनम् अनायासेनैव उपपद्यते इति । अत एव भगवत्पूज्यापादाः कुत्रापि ब्रह्मविदां योगापेक्षां न व्युत्पादयाम्बभूवुः । अत एव चौपनिषदाः ब्रह्मसाक्षात्काराय वेदान्तवाक्यविचार एव प्रवर्तन्ते,न तु योगे इति।

भाष्योत्कर्षदीपिकाकारास्तु नैतत् सहन्ते । **'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य'** इत्यादिश्रुत्या ध्यानयोगस्य साक्षात्कारकारणतायाः अभिहितत्वात् । शमादिघटितसाधनचतुष्टयसम्पन्नस्यैव ब्रह्मविचारे अधिकारस्य जिज्ञासासूत्रे निर्णीततया निरुक्तविचारात्मकसम्यगवेक्षणस्य वृत्तिनिरोधसाध्यां चित्तैकाग्रतां विना अनुपपत्तेः । वसिष्ठवचनं तु न साक्षिसाक्षात्कारे हेतुद्वयकथनपरम्, अपितु चित्तनाशे क्रमद्वयकथनपरम् । चित्तैकाग्रतोत्तरं विचारात्मकेन सम्यगवेक्षणेन वृत्तिनिरोधेन वा चित्तनाशः विषयतश्चित्तनिवृत्तिरूपः सम्पादनीयः इति । अत्र तत्त्वं तु अनुभवैकगम्यम् इति शम् ।

*****



ISSN : 2320-740X

## अथ कथम् एकापूपी इति ?

✍डा. चन्द्रशेखरभट्टः
सहायकाचार्यः, नव्यव्याकरणविभागः

'मुखं व्याकरणं स्मृतम्' शिक्षादिषु षट्स्वङ्गेषु शब्दसाधुत्वबोधकं व्याकरणं मुखस्थानीयत्वेन परिकीर्त्यते। उक्तं च भाष्यकृता 'प्रधानं च षट्स्वङ्गेषु व्याकरणम्' इति। सत्स्वपि ऐन्द्रादिषु बहुषु व्याकरणेषु परमेश्वरानुग्रहवता तत्रभवता पाणिनिना सन्दृब्धम् उपचतुःसहस्रसूत्रात्मकमेव बिभर्ति वेदाङ्गत्वम् । श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वमित्युपापादि नागेशभट्टैः । अत एवोक्तं शिक्षायां 'येनाक्षरसमाम्नायमधिगम्य महेश्वरात्' इति । आर्थिकप्रक्रियाभेदेन प्रस्थानद्वयवदिदं व्याकरणम् । आर्थिकप्रस्थाने तावत् धातूनां, तिङां ,सुपां समासादीनाम् अर्थो विचार्यते । शिष्टैरर्थे प्रयुक्तानां शब्दानां प्रकृतिप्रत्ययविभागपूर्वकमन्वाख्यानं प्रक्रियाप्रस्थाने विचार्यते । शिष्टाश्च लक्ष्यैकचक्षुष्काः, ते च याञ्छब्दान् धर्मबुद्ध्या प्रायुञ्जत त एव शब्दा अस्माभिरनुकर्तव्या अर्थबोधनाय, तेषामेव च धर्मजनकत्वम्। ते च शब्दाः अस्मदादिभिः लक्षणेनैव (सूत्रैणैव) अनुमेयाः इत्यतो वयं लक्षणैकचक्षुष्काः । अनन्तशब्दराशेः ज्ञानार्थं भगवान् पाणिनिः लघुतमानि सूत्राणि प्राणैषीत्। पाणिनिसूत्रज्ञाने सत्यपि सूक्ष्मैक्षिकत्वाभावात् क्व वा भगवतः तात्पर्यमवधारणीयमिति सन्देहः जायत एव।

तत्र एकापूपीशब्दस्य साधुत्वविषये शङ्का जायते। तत्रादौ अवसरसङ्गत्यर्थं 'सङ्ख्यापूर्वो द्विगुः' इति सूत्रं मनागालोचनीयम् । सङ्ख्यापूर्वावयवः समासः द्विगुसंज्ञः स्यादिति सूत्रार्थः । अस्मिन् सूत्रे सङ्ख्यापूर्व शब्दे बहुव्रीहिः। सङ्ख्या पूर्वा यस्मिन् सः सङ्ख्यापूर्वः समासः इति। तत्रायं प्रश्नः – किमनेन सूत्रेण विधीयमाना द्विगुसंज्ञा अनन्तरस्य 'तद्धितार्थोत्तरपदसमाहारे च' इति सूत्रेण विहितस्य भवति? उत पूर्वमात्रस्य पूर्वसमुदायस्य भवति वा इति । पूर्वमात्रशब्देन 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' दिक्सङ्ख्ये संज्ञायाम् तद्धितार्थोत्तरपदसमाहारे च इति त्रिसूत्री गृह्यते । प्रत्यासत्तिन्यायमाश्रित्य आद्यः, व्याप्तिन्यायमाश्रित्य द्वितीयः प्रश्नः।

यद्यत्र प्रत्यासत्तिन्यायेन अनन्तरोक्तस्य तद्धितार्थेति विहितस्यैव द्विगुसंज्ञा इत्युच्यते तर्हि एकशाटी इति न सिद्ध्यति । अत्र हि एकः शाटः इति विग्रहे 'पूर्वकालैक' इत्यादिसूत्रेण समासो वाच्यः । तत्सूत्रविहितस्य द्विगुसंज्ञाभावे द्विगोरिति ङीप् न स्यात्। एतद्दोषापनोदाय व्याप्तिन्यायेन पूर्वमात्रस्य संज्ञा इति स्वीक्रियते चेत् एकभिक्षा इत्यत्र अतिव्याप्तिः । एकः भिक्षः इति विग्रहे पूर्ववत् समासे समासार्थस्य स्त्रीत्वोपजनात् ङीप् प्रसज्येत।


ISSN : 2320-740X
[redacted]

अत्रेदं समाधानम् – अनन्तरस्यैव तद्धितार्थोत्तर इति विहितस्य द्विगुसंज्ञाऽनेन विधीयते । ततश्च एकभिक्षा इत्यत्र नातिव्याप्तिः । एकशाटीत्यत्र अव्याप्तिदोषस्तदवस्थः । तत्र तु शाटशब्दात् जातिलक्षणङीषि निष्पन्नस्य शाटी इति दीर्घेकारान्तस्य ग्रहणे एका शाटी एकशाटी इति रूपं सिद्ध्यति इति न दोषः ।

एवमपि एकापूपी इति न सिद्ध्यति । एकापूपी इत्यत्र एकश्चासौ अपूपश्च इत्येव विग्रहः कार्यः । ततश्च 'पूर्वकालैक' इति सूत्रेण समासो वाच्यः । अत्र द्विगुत्वे सत्यकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते इति द्विगोरितीकारः सिध्यति नान्यथा । न च अपूपशब्दाज्जातिलक्षणङीषि अपूपी इति शब्देन एकशब्दस्य समासे सिद्ध्यतीति वाच्यम्, केवलस्य अपूपशब्दस्य पुंसि वृत्तेः जातिलक्षणङीषोऽभावात् । यद्यत्र दोषपरिहाराय पूर्वमात्रस्येति स्वीक्रियते तर्हि एकभिक्षा इत्यत्र दोषतादवस्थ्यम् । अत्रापि भिक्षधातोः 'गुरोश्च हलः' इत्यप्रत्यये टापि टाबन्तेन समासे एकभिक्षेति निर्बाधमिति चेत् ब्रूते सप्तर्षय इत्यत्र दोषः । तथा हि सप्तन् अस्, ऋषि अस् इत्यवस्थायां 'दिक्सङ्ख्ये संज्ञायामिति' समासे, द्विगुसंज्ञायाम् 'इगन्तकालकपालभगालशरावेषु द्विगौ' इति पूर्वपदप्रकृतिस्वरः प्राप्नोति । इष्यते त्वत्र समासस्येत्यन्तोदात्तस्वरः । अनन्तरस्यैवेह ग्रहणमिति पक्षे तु सप्तर्षय इत्यस्य द्विगुत्वात् इगन्तलक्षणस्वरो न भवति । परं पञ्चहोतारः इत्यत्र इगन्तेति स्वरः इष्टः न सिध्यति । एकापूपी इत्यत्रापि दोषोऽस्त्येव ।

अत्रायं परिहारक्रमः – पूर्वमात्रस्य (त्रिसूत्र्याः) संज्ञित्वेनोपादाने सप्तर्षयः इत्यत्र प्राप्ता अतिव्याप्तिः वार्यते । 'अन्तोदात्तप्रकरणे त्रिचकादीनां छन्दस्युपसङ्ख्यानम्' इति वक्ष्यते तत्र त्रिचक्रादिषु सप्तर्षयः इति शब्दः पठनीयः । तत्सामर्थ्यात् द्विगुस्वरं बाधित्वा अन्तोदात्तस्वरः सिध्यति । एकभिक्षा इत्यत्र दोषः वारित एव ।

अनन्तरस्य तद्धितार्थोत्तर इति विहितिसमासस्य संज्ञित्वस्वीकारे यद्यपीमौ दोषौ न प्रसरतस्तथापि एकापूपी, दशहोतारः इत्यादौ दोष इति पूर्वमुक्तम् । तत्पक्षे तयोरपि परिहारः इत्थं भवति । तत्र हि दशहोतारः पञ्चहोतारः इत्यादौ द्विगुसंज्ञाभावेऽपि आद्युदात्तप्रकरणे दिवोदासादीनां छन्दसि' इति वचनात् दिवोदासादिगणे तेषां पाठः कार्यः । ततश्च आद्युदात्तः सिद्ध्यति । द्विगुसंज्ञायां सत्यामपि इगन्तेति पूर्वपदप्रकृतिस्वरः भवति । स च आद्युदात्त 'एव नृसंख्यायाः' इति नान्तसंख्यानाम् आद्युदात्तत्वविधानात् । अतः फलेऽभेदः । एकापूपी इत्यत्र तु 'एकश्चासौ अपूपश्च' इति विगृह्य 'पूर्वकालैक' इति समासविधाने द्विगुत्वं न सेत्स्यति । 'तद्धितार्थोत्तरपदसमाहारे च' इत्यत्रोक्तानामर्थानामनन्वितत्वात् तत्समासो न भवति । तत्र भाष्यकृतोक्तम् एकापूपी इत्यत्र समाहारः । यथा पञ्चानां गवां समाहारः पञ्चगवम् इति समाहारे समासः तथेहापि भवति । ननु समाहारो नाम समूहः तस्य चानेकविषयत्वात् एकस्य अपूपस्य समाहारासम्भवात् कथं समाहारस्य वाच्यता, कथं वा समासः इति चेत् तत्र भाष्यकृतोक्तः समाधिः – यत्तद्दानं सम्भ्रमो वा इति । अयमाशयः – कश्चित्कृपणः अपूपदानं चिकीर्षुः एकमेवापूपं ददत् अनेकं मन्यते । अत्र दानमित्यनेन दातुः कार्पण्यं, सम्भ्रमः इत्यनेन प्रतिग्रहीतुः कार्पण्यं गम्यते अथवा दाने श्रद्धातिशयात् अनेकस्मिन् या बुद्धिः सा



ISSN : 2320-740X

एकस्मिन्नपि । कश्चित् कृपणः प्रतिग्रहीता दीयमानमेकमेवापूपम् अनेकं मन्यते । अनेकस्मिन् यः सम्भ्रमः तमेकस्मिन्नपि करोति । तत्र एकापूपी क्रियते इति प्रयोगः । अथवा अनेकस्मिन् यः सम्भ्रमः एकस्मिन् क्रियते अपूपमहत्वात् । अवयवगतबहुत्वम् अवयविनि एकस्मिन् अपूपे आरोप्य समाहारे समासो वाच्यः । ततो द्विगुत्वे ङीप् ।

इत्थमत्र पूर्वमात्रस्य संज्ञा इति पक्षे अनन्तरस्य इति पक्षे च सम्भाविता दोषाः परिहृताः । किन्तु पूर्वमात्रस्य इति स्वीकारे एकापूपी क्रियते इत्यादि स्वारसिकप्रयोगाः न सिध्येयुः । अतः अनन्तरस्य इति पक्षः युक्ततरः प्रतिभाति । किञ्च पूर्वमात्रस्य इति पक्षाश्रयणे असाधारणफलस्याभावात्, प्रतिविधेयदोषसद्भावाच्च नादरः इति नागेशाशयः । किञ्च अनन्तरस्य इति न्यायेन 'तद्धितार्थ' इति विहितसमासविषये एवेयं संज्ञा, योगविभागसामर्थ्यात् । अन्यथा दिक्संख्ये संज्ञायां तद्धितार्थोत्तरपदसमाहारेषु इत्येव न्यासं कुर्यात् इति दीक्षिता आशेरते ॥

*****



ISSN : 2320-740X

# पदोपस्थापकपरिभाषान्तरम् अचश्च

✍डा. सि. हेच्.के.पद्मनाभम्
सहायकाचार्यः, नव्यव्याकरणविभागः

यद्यपि इको गुणवृद्धी इति सूत्रस्यैव पदोपस्थापकपरिभाषात्वेन व्यवहारः तथापि अचश्चेति सूत्रमपि तादृश्येव । अचश्च इति सूत्रार्थविचारोऽत्र प्रस्तूयते । अचश्चेति किं परिभाषाऽलोन्त्यस्येत्यस्य शेषो विशेषणमुतालोन्त्यस्येत्यस्यापवाद इति विचार आदौ कृतो भाष्ये । तदुक्तं भाष्ये 'किमयमलोन्त्यशेष आहोस्विदलोन्त्यापवाद इति । तच्छेषतदपवादपक्षाविको गुणवृद्धी इति सूत्रे उपपादितौ यद्यपि तथापि स्पष्टप्रतिपत्त्यर्थं पुनः पृच्छ्यते भाष्ये "कथं वायं तच्छेषः स्यात् कथं वा तदपवादः ?"इति । यद्येकं वाक्यं तच्चेदं चालोन्त्यस्य विधयो भवन्ति अचो ह्रस्वदीर्घप्लुता अन्त्यस्येति ततोऽयं तच्छेषः । अथ नानावाक्यमलोन्त्यस्य विधयो भवन्ति, ह्रस्वदीर्घप्लुता अन्त्यस्यानन्त्यस्य चेति ततोऽयं तदपवाद' इति । यद्यप्यलोऽन्त्यस्येत्यस्यापि परिभाषारूपत्वेन तस्यायं शेषो विशेषणमिति कथं सङ्गच्छताम्! उक्तं च भाष्ये न ह्युपाधेरुपाधिर्भवति,विशेषणस्य विशेषणं वा इति, तथापि क्वचिच्च तथाश्रयणं विना निर्वाहेऽसति तदाश्रयणस्य अदोषत्वात् । किञ्च पक्षद्वयेऽपि दोषसत्त्वेन पदोपस्थापकपक्षस्यैव सिद्धान्तयिष्यमाणत्वेन प्रकृतग्रन्थस्य न्यायव्युत्पादकत्वाभावेऽपि सम्भवमात्रोक्तिकत्वेनादोषः । किञ्च प्रकृतपरिभाषापेक्षया चालोऽन्त्यपरिभाषायाः व्यापकतायामेव भाष्यकृत्तात्पर्यकत्वस्य विवक्षितत्वेन वाऽदोषः । अत एवाचश्चेत्यस्याऽभावेऽपि स्थानषष्ठीरूपालिङ्गाद् दिव उद् इत्यादावलोऽन्त्यस्येस्य प्रवृत्तिस्सूचिता ।

तच्छेशषपक्षे ह्याश्रिते ह्रस्वादिविधिरलोन्त्यस्येति चेद्वचिप्रच्छिशमादिप्रभृतिहनिगमिदीर्घेष्वज्ग्रहणम् इति वार्तिकमारब्धम् । ह्रस्वदीर्घप्लुतविधिरलोऽन्त्यस्येति चेत् वच्धातोः 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च' इत्यनेन विधीयमानो दीर्घः अलोऽन्त्यस्य इत्यन्त्यस्य प्राप्नोतीति तद्वारणार्थमज्ग्रहणं कर्तव्यमित्यर्थः । अन्यथा चकारस्य दीर्घे रूपासङ्गतिः । एवमेव प्रच्छधातोः विधीयमनो दीर्घश्छकारस्य मा भूदित्येवमर्थम् अज्ग्रहणं कर्तव्यम् । तथा शमामष्टानां विहितो दीर्घो मकारस्य मा भूत् । हन्तेश्चाज्झनगमां सनि इत्यनेन दीर्घो मकारस्य प्राप्नोति, गमेश्चेह तेनैव सूत्रेण विधीयमानो दीर्घो मकारस्य स्यात् । नन्वत्र वार्तिके आदिप्रभृतिपदयोः प्रयोगेण पौनरुक्त्यं स्यात् । न । कैयट एवमाह प्रभृतिग्रहणेन ष्ठिवुक्लम्वादयो गृह्यन्ते । तथाचादिपदं शमामष्टानामिति सूत्रस्थबहुवचनानुरोधेन तदनुवादकमित्यर्थः । स्पष्टं चेदमुद्द्योतेऽत्रैव । एवं च तच्छेषपक्षे अतिव्याप्तिसत्त्वेन भाष्ये तदपवादपक्ष उपपादितः । तदपवादपक्षे तु पूर्वोक्ताः सर्वे दोषा वार्यन्ते । यतो हि अलोऽन्त्यस्येत्यस्य अचश्चेति न विशेषणम् । तथा च ह्रस्वादयो विधीयमाना अलोऽन्त्यस्येत्यन्त्यस्यैव इत्यर्थो नास्ति । अतः वच्यादीनां चछमनमानां स्थाने ते दीर्घा न भवन्ति । वच्यादिघटकान्त्यस्य अच्त्वाभावेऽपि तद्घटकस्याचोऽनन्त्यभूतस्य स्थाने



ISSN : 2320-740X

भवन्ति । एवञ्च पञ्चस्वपि स्थलेषु अकरस्यैव दीर्घो भवति इति न दोषः । अलोऽन्त्यस्येत्यस्य ह्यपवादतया अचश्चेति सङ्कीर्त्यते ।

तदपवादपक्षाश्रयणे दोषवारणेऽपि पुनर्दोषान्तराणि प्रदर्शयति वार्तिककारः । 'अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वनन्त्यप्रतिषेधः' इत्यनेन । अस्यामवस्थायां ह्रस्वदीर्घप्लुतशब्दैरेव यत्र ते विधीयन्ते इत्यर्थो नोक्तः । अयमर्थः पदोपस्थापकतापक्षं प्रतिपाद्य ततोऽपि निर्वाहाभावं च प्रदर्श्य ततो वक्ष्यते भाष्यकृता । एवञ्च ह्रस्वदीर्घप्लुतविधानं यत्र तत्र अचः स्थाने स आदेशो भवतीत्यर्थः सम्पद्यते । तथाच अतिरै इत्यत्र ह्रस्वो नपुसंके प्रातिपदिकस्य इति सूत्रेण विधीयमानो ह्रस्वः ऐकारस्याचः स्थाने यथा भवति तस्याङ्गावयवत्वात् तथा सुवाक् ब्राह्मणकुलमित्यत्रापि प्राप्नोति । तथाहि रायमतिकान्तमित्यर्थे प्रातिपदिकावयवत्वस्य ऐकारे सत्त्वेन यथा ह्रस्वः तथा शोभना वाग् यस्य कुलस्य तदित्यर्थे सुवाग् ब्राह्मणकुलमित्यत्र आकारस्य ह्रस्वः स्यात् । तस्याप्याकारस्य प्रातिपदिकावयवत्वात् । तथा प्राप्तह्रस्ववारणार्थः प्रतिषेधो वक्तव्यः इत्यर्थः प्रकृतवार्तिकस्य । एवमेव शीयते सूयते इत्यत्र अकृत्सार्वधातुकयोर्दीर्घो विधीयमानोऽच इकारस्य यथा भवति तस्याङ्गावयवत्वात् तथा भिद्यते छिद्यते इत्यादावपि इकारस्य स्यात् । तस्याप्यङ्गावयवत्वात् । यकारे परेऽङ्गावयवस्याचो दीर्घ इत्यर्थात् । तथा नामीत्यनेन विधीयमानो दीर्घो यथा अग्नीनाम् इत्यत्र भवति, नामि परे इकारस्याङ्गावयवस्य तथा षण्णामित्यत्रापि नामि परे अङ्गावयवत्वस्य षकारादकारस्य स्यात् इति तदपवादपक्षेऽपि अतिव्याप्त्यन्तराणि प्रदर्शितानि भाष्यकृता ।

तदपवादपक्षे प्राप्तानां दोषाणां मध्ये नामिदीर्घविषयकदोषपरिहारार्थं यत्नो दर्शितो भाष्ये । नैष दोषः नोपधाया इत्येतन्नियमार्थं भविष्यति इत्यनेन । अस्यामवस्थायां नियमस्य आकारस्तु अङ्गस्य अवयवस्य अचो दीर्घश्चेन्नकारान्तस्यैवेति, तेन षण्णामित्यत्राङ्गस्य नान्तत्वाभावेन न दीर्घः इत्यर्थः । अनेन नियमेन अन्यते तन्यते इत्यत्रापि नकारान्ताङ्गस्य सत्त्वेन दीर्घः प्राप्नोति इति चेत् नाम्येवाङ्गस्य दीर्घः इति पक्ष आश्रयणीयो भवति । तथा च अन्यत इत्यादौ नामोऽभावेन दीर्घो वार्यते चेदपि पुनः षण्णामित्यत्र दीर्घप्रसङ्गः । अथोऽभयथापि नियमः क्रियते नान्तस्याङ्गस्य नाम्येवेति तथाच अन्यत इत्यादौ नामोऽभावेन, षण्णामित्यत्र नान्तत्वाभावेन नामिदीर्घविषये दोषो वार्यते चेदपि दोषान्तराणां तादवस्थ्यमेवेति उपपादितं भाष्ये । तदुक्तम् "अथाप्युभयतो नियमः स्यात् नोपधाया एव नामि नाम्येव नोपधाया एवेति, एवमपि भिद्यते छिद्यते सुवाग् ब्राह्मणकुलमित्यत्रापि प्राप्नोति" इत्यनेन । कथञ्चिद्दोषजातमध्यनामीत्यत्रोभयतो नियमेनातिव्याप्तिवारणेऽपि तद्भिन्नस्थले दोषस्तदवस्था एवेत्यर्थः ।

कैयटेन तु प्रकृते तदपवादपक्षे भिद्यते छिद्यते इत्यादावपि दीर्घप्राप्तिरूपातिव्याप्तिरूपदोषो वारितः । तथाहि यकारादौ यदङ्गं तस्य योऽवयवोऽजित्येवमत्र प्रसङ्गः । यदा त्वजेव यकारादिना विशेष्यते तदात्र व्यवधानान्नात्स्त्यतिप्रसङ्गः एवमन्यत्रापि सुवागित्यादावपि ज्ञेयमिति तस्याशयः । किन्तु प्रत्ययस्याङ्गांशे



ISSN : 2320-740X

एव उत्थिताकांक्षायाः सत्त्वेन अङ्गावयवेऽसत्त्वेन अङ्गावयवो योऽज् यकारादिना प्रत्ययेन स विशेष्यत इति वक्तुं न शक्यते । उक्तञ्च नागेशेनात्रैव कैयटव्याख्याने “इदं चिन्त्यं, प्रत्ययस्याङ्गांश एवोत्थिताकांक्षत्वात्” इति । एवं च दोषतादवस्थ्येन पदोपस्थितिपक्ष एवाश्रयणीय भवति, आश्रितश्च भाष्ये । तदुक्तम् एवञ्च ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयात् अच इत्येतत्तत्रोपस्थितं द्रष्टव्यम् इति । यतः पदोपस्थापकतानया परिभाषया बोध्यतेऽतो द्वितीया षष्ठी प्रादुर्भाव्यते । एवञ्च अकृत्सार्वधातुकयोरित्यत्र अङ्गस्य इत्यधिकाराल्लभ्यते, दीर्घ इति पदस्य श्रवणेन अच इति षष्ठ्यन्तं पदमुपतिष्ठते । विशेष्यविशेषणभावे च कामचारात् वृत्त्यादिषु गृह्यमाणेन अचा विशेष्यते । अच् अत्र विशेष्यते इति तस्य विशेषणत्वाभावेन न तदन्तविधिः । तथा च अङ्गस्येत्यवयवषष्ठी भविष्यति । तथा च एतेषामचो दीर्घो भवति इत्यनन्त्यस्य दीर्घः सिद्ध्यति । क्विबाद्यव्यवहितपूर्वं यदङ्गसंज्ञकं तस्यावयवस्याचो दीर्घ इत्यादेरर्थस्य सत्त्वात् । एवञ्च वच्यादिष्वनन्त्यस्य दीर्घप्राप्तिरूपो दोषो वारितो भवति ।

नपुंसकह्रस्वाकृत्सार्वधातुकादिषु च विशेष्यविशेषणभावे कामचारादेव अङ्गस्य इत्यादीनां विशेषणत्वम् । दीर्घपदश्रवणेनोपस्थितस्याच इत्यस्य विशेषणत्वमिति तदन्तविधौ अजन्तस्य प्रातिपदिकस्य ह्रस्वो यकारादौ प्रत्यये, अजन्तस्याङ्गस्य दीर्घ इत्यर्थाश्रयणेन भिद्यते छिद्यते इत्यादौ अन्त्यस्य दीर्घप्राप्तिरूपो दोषोऽपि वार्यते । पदोपस्थितिपक्षप्रतिपादनवेलायां भाष्य उक्तम् “एवं तर्हि ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयादच इति इत्येतत्तत्रोपस्थितं द्रष्टव्यम्” इति । अस्याशयं स्पष्टतया प्रकटीकर्तुं ‘इह कस्मान्न भवति द्यौः पन्थाः सः इति’ इति पृष्टम् । ह्रस्वो दीर्घः प्लुतः इति वाक्ये यद्यपि इतिकरणं वर्तते । तथाच तदानुर्ध्वीकसहिततया यत्र ह्रस्वादीनां विधानं तत्रैव पदोपस्थितिः भवति इति द्यौरित्यादौ प्रकृतपरिभाषायाः प्रवृत्तिरेव न भवितुमर्हतीति वक्तुं शक्यम्, तथापि वाच्यवाचकयोः संज्ञासंज्ञिनोः शब्दार्थयोरभेदेन लोके व्यवहारस्य दर्शनेन ह्रस्व इति ब्रूयात्, दीर्घ इति ब्रूयात् इत्यादेः तत्पदाभिधेय आकारादिः ह्रस्वः, आकारादिः दीर्घो भवति इत्यादिक्रमेणार्थो भवतीति मन्यतेऽत्र वाडी । दिव औत् इत्यत्र औकारस्य दीर्घस्य विधानेन पूर्वोक्तरीत्या अच इति षष्ठ्यन्तस्य पदस्योपस्थित्या विशेष्यविशेषणभावे कामचारेण अच इत्यस्य च विशेष्यत्वाङ्गीकारे च तदन्तविध्यभावेन दिवोऽवयवस्येकारस्यौदित्यर्थाश्रयणेऽयं दोषः । एवमेव द्वयोरप्युदाहरणयोः दोषस्वरूपं बोध्यम् । एवं दोषे प्राप्ते संज्ञया विधाने नियम इत्युक्तं भाष्ये । संज्ञया च ये ह्रस्वदीर्घप्लुता विधीयन्ते तत्रैवेयं परिभाषा प्रवर्तते इत्यर्थः । दिव औदित्यादौ, औकारस्य दीर्घस्य औकारत्वेन विहितत्वम्, पन्था इत्यत्र दीर्घस्याकारस्य आकारत्वेन विहितत्वम्, स इत्यत्र अकारस्य अकारत्वेन विहितत्वमस्ति । न तु दीर्घ इति, ह्रस्व इति संज्ञया भाव्यत्वमिति प्रकृतपरिभाषाऽप्रवृत्तिः । तर्हि संज्ञया विधाने नियम इत्यपूर्वतया वक्तव्यत्वे प्राप्ते न वक्तव्यम् ऊकोलोऽजिति सूत्रात् अजित्यनुवर्तते । ह्रस्वदीर्घप्लुत इत्यपि । ह्रस्वदीर्घप्लुत इत्युपस्थितस्य न अचामुपस्थापकत्वम्, तथा सति ह्रस्वादिसंज्ञका अचोऽचः स्थाने भवन्तीत्यर्थो भवति येनात्र प्रकृते न किञ्चित्प्रयोजनम् । किञ्च तेषां वर्णानां



ISSN : 2320-740X

तदनुपस्थितावपि प्रतीतेः सत्त्वेन न किञ्चिदुपकारकत्वम् । अतश्चाश्रितस्वरूपव्यापारा आश्रीयन्ते । आश्रितस्वरूपव्यापारत्वञ्च ह्रस्व इत्याद्यानुपूर्वीविशिष्टतया यदज्विधानं तत्राचः स्थाने भवतीत्यर्थप्रकाशकत्वम् । तथा च द्यौरित्यादौ दोषाभावायापूर्वतया वचनं न कार्यमिति सिध्यति । यदि पूर्वसूत्रस्थस्य अज्ग्रहणस्य अत्राचश्चेति सूत्रे फलमुपदर्श्यते तर्हि तत्सूत्रे अज्ग्रहणं मा भूत् प्रकृतसूत्र एवास्तु इत्यस्याः शङ्कायाः समाधानमुच्यते तत्राप्यज्ग्रहणस्य फलमस्तीति । तदुक्तं भाष्ये “अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थम्” इति । प्रतक्ष्य...... इत्यादौ ककारषकारयोः अकारकालकालिकत्वमस्तीति तत्र सूत्रे अज्ग्रहणाभावे अस्य संयोगस्यापि ह्रस्वत्वेन ग्रहणे सति ह्रस्वस्य पिति कृति तुक् इति तुगापत्तिः स्यात् । तद्वारणार्थं तत्सूत्रेऽपि अज्ग्रहणमपेक्ष्यते इति तस्यात्र सूत्रेऽनुवृत्तिरेव गरीयसीति प्रतिपादितं भाष्ये ।

******



ISSN : 2320-740X

[redacted]

## सङ्गीतरत्नाकरे वेदान्तार्थनिरूपणम्

✍डा. गणेश ईश्वर भट्टः
सहायकाचार्यः, अद्वैतवेदान्तविभागः

**भूतं भव्यं भविष्यच्च सर्वं वेदात् प्रसिद्ध्यति**[1] इति मनुवचनानुसारं, भगवान् वेदः सर्वार्थप्रकाशकः, अत एव सर्वप्राणिभिः सर्वथा समादरणीयः । ऋग्यजुस्सामाथर्वभेदेन चतुर्धा विभक्तस्य तस्य क्रमेण आयुर्वेदधनुर्वेदगान्धर्ववेदार्थशास्त्राणि उपवेदनाम्ना प्रथन्ते । तत्र सङ्गीतशास्त्रनाम्ना प्रसिद्धं गान्धर्वशास्त्रं आबालवृद्धं मनो रञ्जयत् लोके अद्यापि लोके पामरानपि जनान् प्रीणाति । किन्तु सङ्गीतशास्त्रस्य लक्ष्यं न मनोरञ्जनम्, अपि तु तत् आत्मतत्त्वसाक्षात्कारस्य साधनम् । सङ्गीतशास्त्रविषयप्रतिपादकेषु ग्रन्थेषु सङ्गीतरत्नाकरः प्राधान्यं भजते । त्रयोदशशतके लब्धजन्मा शार्ङ्गदेवाख्यः काश्मीरपण्डितः इमं अष्टाध्यायात्मकं ग्रन्थं रचयामास । अयं सङ्गीतशास्त्रस्य वेदान्तार्थोपकारकत्वं स्फुटं प्रतिपादयति । अस्य व्याख्यातारौ कल्लिनाथसिंहभूपालावपि वेदन्तसिद्धान्तानेव आश्रित्य श्लोकानाम् अर्थं वर्णयामासतुः । इमं विषयं किञ्चिदिह अवलोकयामः ।

ग्रन्थस्य मङ्गलश्लोके श्लेषेण एवं स्वरपरमात्मानौ स्तूयेते-

**ब्रह्मग्रन्थिजमारुतानुगतिना चित्तेन हृत्पङ्कजे**
**सूरीणामनुरञ्जकः श्रुतिपदं योऽयं स्वयं राजते ।**
**यस्माद्ग्रामविभागवर्णरचनाऽलङ्कारजातिक्रमः**
**वन्दे नादतनुं तमुद्धुरजगद्गीतं मुदा शङ्करम्**[2] ॥ इति ।

अस्मिन् श्लोके प्रकृतार्थः वन्द्यमानः शङ्करः । तेन सह अप्रकृतः अर्थः स्वरोऽपि प्रतीयते । तत्र शङ्करपक्षे व्याख्यानतः एवमर्थः लभ्यते- सूरीणां योगिनाम् हृत्पङ्कजे अनाहताख्ये द्वादशदलचक्रे चित्तं ब्रह्मग्रन्थिजमारुतमनुगच्छति । देहस्य गुदलिङ्गयोः मध्ये चतुर्दलम् आधारचक्रं स्थितम् । तस्माद् द्व्यङ्गुलान्तरादूर्ध्वम्, मेहनाद् द्व्यङ्गुलान्तरात् अधः विद्यमानं देहमध्यम्, तस्मात् नवाङ्गुलान्तरादुपरि नभिकन्दो वर्तते । तत्र जायमानः प्राणाख्यः वायुः हृदयनासास्यस्थानेषु सञ्चरन् शब्दोच्चारणं करोति इति स्थितिः । एवं च प्राणम् अनुगच्छता अन्तःकरणेन श्रुतिपदम् अर्थात् वेदानाम् उत्पत्तिस्थानं प्रणवः, तस्य उच्चारणे सति हृदि परमात्मा प्रकाशते । तदुक्तम्-

**धारयन्मनसा वायुं व्याहरन् प्रणवाक्षरम् ।**
**आसनेऽनन्यधीरास्ते रहस्ये विजितेन्द्रियः ॥**
**सम्प्राप्ते मारुते तस्मिन् सुषुम्णायां वरानने॥**
**मन्त्रमुच्चार्य मनसा हृन्मध्ये धारयेत्सुधीः ॥**



ISSN : 2320-740X

**वायुना पूरिते व्योम्नि साङ्गोपाङ्गकलेवरे ।**

**तदाऽत्मा राजते तत्र यथा व्योम्नि विकर्तनः ।**

**यद्यत्पश्यति तत्सर्वं पश्येदात्मवदात्मनि**[3] ॥ इति ।

ग्रामविभागेत्यादीनाम् अयमर्थः - यस्मात् लोकानां विभागः, ब्राह्मणादीनां वर्णानां रचना, अनुलोमप्रतिलोमजातयः एतेषां क्रमो भवति, सः उद्धु रजगद्गीत; जगत् स्फुटं यथा स्यात्तथा जनैः गीतः, नादतनुः नादविग्रहः । एवमत्र योगिगम्यः परमात्मा स्तुतः । अत्र श्रुतिपदम् इत्यादीनां वेदान्तशास्त्ररीतिमेव अनुसृत्य एवमपि व्याख्यायाम् अर्थः प्रदर्शितः- श्रुतिपदं श्रुतीनां अवान्तरवाक्यानां स्थानं महावाक्यम् । योऽयमित्यत्र यच्छब्देन शाब्दप्रतिपत्तिविषयः आत्मा उक्तः । इदंशब्देन श्रवणोत्तरकालीनमननविषयः आत्मा निर्दिश्यते । अनु=मननाद्यभ्यासे कृते सति, स्वयं राजते= साक्षात्कारे जाते वृत्त्यवच्छेदेन स्वयं प्रकाशते । स्वरपक्षेऽपि अत्र विद्यमानानां पदानाम् अर्थः व्याख्यायां दर्शित एव ।

एतदनन्तरं ग्रन्थकारः प्रथमेऽध्याये, अग्रे प्रस्तोष्यमाणानां विषयाणां सङ्ग्रहं प्रदर्श्य, ततः पिण्डोत्पत्तिप्रकरणाख्यं द्वितीयं प्रकरणं प्रारभत । तत्र न कोऽपि तालरागादिविषयाः प्रतिपादिताः, अपि तु शरीररचना, तत्र शरीरिणः संस्थितिः, षट्चक्राणि इतीमे विषयाः विस्तरेण निरूपिताः । नादनिरूपणे प्रवृत्तस्य किं शरीरादिनिरूपणेन इति शङ्का जायेत । अतः स्वयमेव शार्ङ्गदेवः कथयति यत् सर्वमिदं जगन्नादात्मकम्, तस्य च नादस्य शरीरमेव आधारः, अतः शरीरं निरूपणीयमेव इति । शरीरं जीवकर्माधीनम् । जीवश्च ब्रह्मैव नापरः । अतः शरीरिणः वास्तवं रूपं ब्रह्मैव इति इममर्थं ग्रन्थकृत् उपस्थापयति-

**अस्ति ब्रह्म चिदानन्दं स्वयञ्ज्योतिर्निरञ्जनम् ।**

**ईश्वरं लिङ्गमित्युक्तमद्वितीयमजं विभुम् ॥**

**निर्विकारं निराकारं सर्वेश्वरमनश्वरम् ।**

**सर्वशक्ति च सर्वज्ञं तदंशा जीवसंज्ञकाः**[4] ॥ इति ।

अत्र वेदान्तप्रतिपाद्यं ब्रह्मैव निर्दिष्टम् । जीवानां ब्रह्मांशत्वमप्युक्तम्, यद्धि शारीरकमीमांसाशास्त्रे अंशाधिकरणे निरूपितम् । एतदनन्तरं जीवानां अविद्याद्युपाधयः दर्शिताः -

**अनाद्यविद्योपहिता यथाऽग्नेर्विस्फुलिङ्गकाः ।**

**दार्वाद्युपाधिसंयोगात्ते कर्मभिरनादिभिः ॥**

**सुखदुःखप्रदैः पुण्यपापरूपैर्नियन्त्रिताः**[5] ॥ इति ।

अत्र **यथाऽग्नेर्ज्वलतः क्षुद्रा विस्फुलिङ्गाः प्रभवन्ते सहस्रशः सरूपाः**[6] इति श्रुत्युक्तं जीवस्य जन्म सूचितम् । तत्र चानाद्यविद्यैव कारणमित्यपि दर्शितम् । एतदग्रे वेदान्तरीत्यैव सूक्ष्मशरीरस्य स्वरूपमुक्तम्

**सूक्ष्मं लिङ्गशरीरं तदामोक्षादक्षयं मतम् ।**

**सूक्ष्मभूतेन्द्रियप्राणावस्थात्मकमिदं विदुः**[7] ॥ इति ।



ISSN : 2320-740X

ततः भोगः सृष्टेः प्रयोजनमिति, संसारः प्रवाहतः अनादिरिति चोक्त्वा जीवब्रह्मणोः अभेदः स्फुटं निगदितः- **ते जीवा नात्मनो भिन्ना भिन्नं वा नात्मनो जगत्**[8] इति । जीवस्य चेतनत्वेन ब्रह्मरूपत्वम्, जगतः ब्रह्मकार्यत्वेन ब्रह्मणः अनन्यत्वं च शास्त्रे यद्विस्तरेण सिद्धान्तितम्, तदत्र सङ्क्षेपेण दर्शितम् ।

वेदान्तशास्त्रे मायायाः परिणाम्युपादानत्वम्, ब्रह्मणः विवर्तोपादानत्वं च प्रसिद्धम् । तदत्र एवमाख्यातम्-

**शक्त्या सृजन्नभिन्नोऽसौ सुवर्णं कुण्डलादिव ।**
**सृजत्यविद्ययेत्यन्ये यथा रज्जुर्भुजङ्गमम्**[9] **॥** इति ।

जगत्सृष्टिं कुर्वन् परमात्मा आदौ पञ्चभूतानि सृष्ट्वा ततः हिरण्यगर्भं सृष्ट्वा तस्मै वेदानुपदिश्य वैदिकेभ्यः शब्देभ्यः सर्वं जगत् ससर्ज इति शास्त्रे प्रसिद्धम् । सोऽप्यर्थः ग्रन्थे निबद्धः-

**ब्रह्म ब्रह्माणमसृजत्तस्मै वेदान् प्रदाय च ।**
**भौतिकं वेदशब्देभ्यः सर्जयामास तेन तत्**[10] **॥** इति ।

तैत्तिरीयश्रुतौ **अन्नात् पुरुषः**[11] इति पुरुषस्यैव सृष्टिः दर्शिता, न प्राण्यन्तरस्य । तत्र भाष्यकारैः हेतुरुक्तः- **सर्वेषामप्यन्नरसविकारत्वे ब्रह्मवंश्यत्वे च अविशिष्टे, कस्मात्पुरुष एव गृह्यते? प्राधान्यात् । किं पुनः प्राधान्यम्? कर्मज्ञानाधिकारः । पुरुष एव हि शक्तत्वादर्थित्वादपर्युदस्तत्वाच्च कर्मज्ञानयोरधिक्रियते, 'पुरुषे त्वेवाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीक्षतीत्येवं संपन्नः; अथेतरेषां पशूनामशनायापिपासे एवाभिविज्ञानम्' इत्यादि श्रुत्यन्तरदर्शनात्**[12] इति । इममर्थं मनसि निधाय ग्रन्थे कथितम्- **ततो नादोपयोगित्वान्मानुषं देहमुच्यते**[13] इति। न हि पशुपक्षिकीटादयः वर्णान् उच्चारयितुं प्रभवन्ति ।

ततः **क्षेत्रज्ञः स्थित आकाशः आकाशाद्वायुमागतः**[14] इत्यादिना ग्रन्थेन औपनिषदीं पञ्चाग्निविद्यामनुसृत्य जीवस्य गर्भे प्रवेशः वर्णितः । गर्भावासकाले जीवशरीरस्य उपचयः सविस्तरं वर्णितः । मातापितृजाः भावाः, प्रसूतिप्रकारः, प्राणेन्द्रियाणां स्वरूपव्यापारविशेषाः, षट्चक्राणां स्थानस्वरूपभेदः, देहावयवाः, सुषुम्नादिनाडीप्रभेदाः इत्येवं भूयांसः विषयाः निरूपिताः । ततः

**मनश्चेल्लीयते प्राणे सुषुप्तिः स्यात्तदाऽत्मनः ।**
**स्वमपीतः परात्मानं स्वपित्यात्मा यतो मतः**[15] **॥**

इत्यादिना वेदान्तरीत्यैव अवस्थाः निरूपिताः । वैद्यशास्त्र-योगशास्त्र-वेदान्तशास्त्रेषु निरूपणार्हाः एते विषयाः सङ्गीतशास्त्रे प्रतिपादिताः इत्येतदेव सङ्गीतशास्त्रस्य अध्यात्मशास्त्रोपकारकत्वं ज्ञापयति । शरीरनिरूपणस्यापि फलं शरीरस्य हेयत्वज्ञानमेव, यथा पञ्चाग्निविद्यानिरूपणं वैराग्योत्पादनाय, तद्वत् ।

निर्गुणब्रह्मज्ञानफलभूतं मोक्षं विहाय अन्यत् सर्वं फलं भोग एव इति शास्त्रे सिद्धान्तितम् । अत एव ग्रन्थकारः भोगमोक्षयोः साधनं वेदान्तानुसारमेव कथयति- **तत्र स्यात्सगुणध्यानाद्धक्रमुक्तिश्च निर्गुणात्**[16]



ISSN : 2320-740X

इति । सगुणोपासनस्यापि निर्गुणज्ञानमेव फलमिति व्याख्यायां दर्शितम् । तर्हि सगुणध्यानस्यैव सर्वेषां साधनत्वात् किं नादनिरूपणेन इत्याकाङ्क्षायामुक्तम्-

**ध्यानमेकाग्रचित्तैकसाध्यं न सुलभं नृणाम् ।**
**तस्मादत्र सुखोपायं श्रीमन्नादमनाहतम् ॥**
**गुरूपदिष्टमार्गेण मुनयः समुपासते**[17] ॥ इति ।

तर्हि इदानीं लोके प्रसिद्धस्य सङ्गीतस्य तेन नादेन सह कस्सम्बन्ध इति जिज्ञासायाम् इदं समाधानं दर्शितम्-

**सोऽपि रक्तिविहीनत्वान्न मनोरञ्जको नृणाम् ।**
**तस्मादाहतनादस्य श्रुत्यादिद्वारतोऽखिलम् ।**
**गेयं वितन्वतो लोकरञ्जनं भवभञ्जनम्**[18] ॥ इति ।

एतेन सङ्गीतशास्त्रस्य मनोरञ्जनमेव न लक्ष्यम्, किन्तु भवभञ्जनहेतुभूतस्य आत्मज्ञानस्य सिद्धौ सङ्गीतमपि साधनमिति ज्ञायते ।

एतदनन्तरं श्रुतिस्वरजात्यादीनां निरूपणमारभमाणः ग्रन्थकृत् ब्रह्मात्मना नादमेवं रूपयति-

**चैतन्यं सर्वभूतानां विवृत्तं जगदात्मना ।**
**नादब्रह्म तदानन्दमद्वितीयमुपास्महे**[19] ॥ इति ।

अयमर्थः- नद्यत इति, नदाभ्यां प्राणाग्निभ्यां जातः इति वा नादः । परा वागिति प्रसिद्धः सूक्ष्मतमः शब्दः सः नाद एव ब्रह्म नादब्रह्म । स च स्फोटात्मना समस्तपदार्थप्रकाशकत्वसाधर्म्येण चैतन्यारोपविषयत्वात् चैतन्यम् । जगदात्मना विवृत्तम्=अतत्त्वतः अन्यथाभूतम्, तच्च आनन्दम् अर्थात् आनन्दाभिव्यञ्जकत्वात् आनन्दः इत्यारोप्यते । तच्च स्वरादिकार्यजातस्य कारणम् । नादब्रह्मणोः अत्यन्तं प्रत्यासन्नत्वात् नादोपासनायां कृतायाम्, मणिप्रभाप्रवृत्तस्य मणिलाभवत् ब्रह्मप्राप्तिः भविष्यति । तदुक्तम्-

**अपि स्यात् सच्चिदानन्दरूपिणः परमात्मनः ।**
**प्राप्तिः प्रभाप्रवृत्तस्य मणिलाभो यथा भवेत्**[20] ॥ इति ।

नादबिन्दूपनिषदि नादोपासनविधिः श्रूयते । आदौ स्थूलशब्दं गृहीत्वा ततो सूक्ष्मसूक्ष्मतरसूक्ष्मतमतां गते शब्दे अन्तःकरणं प्रविलाप्य उपासकः अन्ते स्वस्वरूपे ब्रह्मणि तिष्ठति इत्ययमर्थः तत्र प्रतिपादितः । यथा-

**सिद्धासने स्थितो योगी मुद्रां सन्धाय वैष्णवीम् ।**
**शृणुयाद्दक्षिणे कर्णे नादमन्तर्गतं सदा ॥**
**श्रूयते प्रथमाभ्यासे नादो नानाविधो महान् ।**
**वर्धमाने तथाऽभ्यासे श्रूयते सूक्ष्मसूक्ष्मतः ॥**



ISSN : 2320-740X

**आदौ जलधिजीमूतभेरीनिर्झरसम्भवः ।**

**मध्ये मर्दलशब्दाभः घण्टाकाहलजस्तथा ॥**

**अन्ते तु किङ्किणीवंशवीणाभ्रमरनिःस्वनः ।**

**इति नानाविधाः शब्दाः श्रूयन्ते सूक्ष्मसूक्ष्मतः ॥**

**सर्वचिन्तां समुत्सृज्य सर्वचेष्टाविवर्जितः ।**

**नादमेवानुसन्द्ध्यान्नादे चित्तं विलीयते ॥**

**ब्रह्मप्रणवसंलग्ननादो ज्योतिर्मयात्मकः ।**

**मनस्तत्र लयं याति तद्विष्णोः परामं पदम्**[21] ॥ इति ।

यद्यपि भर्तृहरिप्रवर्तितः स्फोटवादः भाष्यकारादिभिः निराकृत एव । तथापि नादब्रह्मनिरूपणं न दोषमावहति । यतः नेदं दर्शनशास्त्रम्, अपि तु आत्मदर्शनसाधनभूतनादब्रह्मोपासनप्रपञ्चनपरम् । श्रुत्याऽपि **नाम ब्रह्मेत्युपास्ते**[22] इति नाम्नि ब्रह्मोपासनं विधीयते । रजस्तमोगुणाभ्यां विक्षिप्तस्य मनसः सात्त्विकत्वापादने यद्यदुपकरोति, तत् खलु साधकेन उपादेयम् । अत एव याज्ञवल्क्यस्मृतौ सङ्गीतशास्त्रस्य मोक्षानुकूलत्वम् अभिहितम्-

**वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।**

**तालज्ञश्चाप्रयसेन मोक्षमार्गं स गच्छति**[23] ॥ इति ।

तदेवं सङ्गीतशास्त्रमपि वेदान्तार्थोपकारकत्वेन मोक्षमार्गस्य आनुकूल्यमाचरति । उक्तं हि-

**यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।**

**सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता**[24] ॥ इति ।

**सङ्केतसूची-**

१. मनुस्मृतिः १२-९७
२. सङ्गीतरत्नाकरः १-१-१
३. तत्रैव कल्लिनाथव्याख्या१-१-१
४. तदेव १-२-४,५
५. तदेव १-२-६
६. मुण्डकोपनिषत् २-१-१
७. सङ्गीतरत्नाकरः १-२-८
८. तदेव १-२-१०
९. तदेव १-२-११
१०.तदेव १-२-१४
११.तैत्तिरीयोपनिषत् २-१



ISSN : 2320-740X

१२.तैत्तिरीयोपनिषच्छाङ्करभाष्यम् २-१
१३.सङ्गीतरत्नाकरः
१४.तदेव १-२-१८
१५.तदेव १-२-८५
१६.तदेव १-२-१६४
१७.तदेव १-२-१६५,१६६
१८.तदेव १-२-१६७
१९.तदेव १-३-१
२०.तत्रैव कल्लिनाथव्याख्या१-३-१
२१.नादबिन्दूपनिषत् ३३-४७
२२.छान्दोग्योपनिषत् ७-१-५
२३.याज्ञवल्क्यस्मृतिः
२४.बृहदारण्यकवार्त्तिकम् १-४-४०२

*****



ISSN : 2320-740X

## समस्यासन्देशीयम्

✍डा.राघवेन्द्रभट्टः
सहायकाचार्यः,साहित्यविभागः

अद्य दुराचारग्रामो भारतं कम्पयते । तस्य समूलविनाशाय राष्ट्रस्य सौख्यवर्धनाय च महात्मनो गान्धिवर्यस्य सिद्धान्तो नूनमुपकरोति । अतस्तस्य सन्देशः सार्वजनीनः सार्वकालिकश्च । अत्र **समस्यासन्देशीये** साम्प्रतिकसमस्या तत्समाधानञ्च बालवृद्धयोः संवादद्वारा **राघवीया**ख्यया व्याख्यया सह प्रस्तूयते।

**एकतः श्लाघनं चान्यतो दूषणंवैषमीभावनां मानवानां मिथः ।**
**दुर्मुखाः कुर्वते स्वार्थसम्प्राप्तये भारतीयाःकिमेते ? न भो ! रासभाः ॥१॥**

**एकत इति ।** दुर्मुखा दुष्टं मुखं येषान्त इति बहुव्रीहिः । दुर्भाषिणो दुष्टा इत्यर्थः । **स्वार्थसम्प्राप्तये** स्वार्थस्य निजप्रयोजनस्य सम्प्राप्तये सम्यग्लाभाय। **एकत** एकस्मात् प्रकारात् 'पञ्चम्यास्तसिल्' इतिसूत्रेण तसिल् । **श्लाघनं** प्रशंसां 'श्लाघृ कत्थने इति धातोः 'ल्युट् च' इत्यनेन ल्युट्। **अन्यतो**ऽन्यस्मात् प्रकारात् । **दूषणं** निन्दां मानवानां मनुष्याणां मध्ये । 'मनुष्या मानुषा मर्त्या मनुजा मानवा नराः' इत्यमरः । **मिथः** परस्परं 'मिथोऽन्योन्यम्'इत्यमरः । **वैषमीभावनां** वैषमीं विषमस्य भावस्ताञ्च । विषमाद् ब्राह्मणादेराकृतिगणत्वात् ष्यञ् । स्त्रीत्वविवक्षायां 'षिद्गौरादिभ्यश्च' इत्यनेन ङीष्। वैषमी च सा भावना चेति कर्मधारयः। **कुर्वते** विदधति । डुकृञ् करणे इति धातुः । **भो तात ! एते** इत्थम्भूता **भारतीयाः किम् ?** सत्पथावलम्बिनःखलु भारतीयाः 'अपथेष्वकृतपदा भारतव्यपदेशिनः' इति प्राज्ञोक्तेः । न भारतीया अपितु **रासभा** गर्दभाः । 'चक्रीवन्तस्तु बालेया रासभा गर्दभाः खराः' इत्यमरः । अत्र अपह्नुतिरलङ्कारः रासभत्वारोपार्थभारतीयत्वधर्मनिह्नवात् । 'शुद्धापह्नुतिरन्यस्यारोपार्थो धर्म-निह्नवः' इति तल्लक्षणम्। रासभानां पुरतश्शिरःकम्पनं पृष्ठतः पादेन प्रहरणञ्च धर्ममादाय दुर्जनेष्वभेदः । स्रग्विणीवृत्तं 'रैश्चतुर्भिर्युता स्रग्विणी सम्मता' इति लक्षणात् ।

**अथ प्रबुद्धो जगतः सुखार्थी न द्वेष्टि नो निन्दति जीवराशिम् ।**
**पीडाक्रियामात्मविनाशहेतुं वदन्ति तात ! स्मर धार्तराष्ट्रान् ॥२॥**

**अथेति। अथ** मङ्गलमयसन्देशारम्भवचनः । **प्रबुद्धः** सञ्जागरितः विवेकीति भावः । **जगतः** लोकस्य **सुखार्थी** सुखमर्थयते तच्छीलो जनः । जगद्धिताभिलाषीत्यर्थः । **जीवराशिं** मनुष्यादिसकलजीवं **न द्वेष्टि** वैरभावं वहति, **'द्विष अप्रीतौ'** । 'निर्वैरः सर्वभूतेषु' इति खलु गीतोक्तिः। **नो निन्दति** गर्हते, 'णिदि कुत्सायाम्' । **पीडाक्रियाम्** बाधाजननकार्यम् **आत्मविनाशहेतुं** स्वस्य हानिकारणं **वदन्ति** प्राज्ञा इत्यर्थः ।



[redacted]

ISSN : 2320-740X

**तात**! हे वत्स तद्विषये **धार्तराष्ट्रान्** दुर्योधनादीन् धृतराष्ट्रपुत्रान् स्मर । उपजातिवृत्तम् **'**अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः**'**इति लक्षणात्।

लोकसुखं कामयमानो विवेकी जनः कस्यापि जीविनो द्विट् निन्दाकृच्च न भवति। द्वेषबुद्ध्या क्रियमाणमन्येषां पीडनमात्मन एव विनाशाय भवतीति ज्ञानिनो वदन्ति। दुर्योधनादयः पाण्डवान्पीडयित्वा विनाशं प्रापुः। तेन मानवा मिथो द्वेषं न कुर्युरिति ज्ञायते। अत्र गान्धिवर्यस्य अहिंसावादः स्मर्तव्यः।

**कम्पनीव्याजतः सम्पदो हारका भारतं ये नराः शुष्कमाकुर्वते।**
**वीक्ष्य तान्नायका मौनमातन्वते भारतीयाः किमेते ? न भो ! नग्नकाः ॥३॥**

**कम्पनीति। ये नरा**ः ये मनुष्याः **कम्पनीव्याजत**ः कम्प्यते भूम्यादिरनयेति कम्पनी, भूखननराष्ट्र-शोषणाद्युद्यमसंस्था । 'करणाधिकरणयोश्च' इत्यनेन ल्युट्। तस्या **व्याजतो**ऽपदेशात् । 'व्याजोऽपदेशो लक्ष्यञ्च' इत्यमरः । **सम्पद**ः देशस्य सम्पत्तेः । 'सम्पदि । सम्पत्तिश्श्रीश्च लक्ष्मीश्च' इत्यमरः । **हारका** मोषकाश्चोरा इति भावः। **भारत**मेतन्नामकं देशम्

'उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः॥'

इति लक्षितम् । **शुष्कं** निस्सारमाकुर्वते आ समन्तात्कुर्वन्ति । **नायका** नेतार**स्तान्** श्रीचोरान् **वीक्ष्य** विलोक्यापि **मौनमातन्वते** तूष्णीकास्तिष्ठन्ति। तनु विस्तारे। **एते भारतीयाः किम्? भो**ः पुत्रक! **न**, **'**बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् । वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ॥' इति स्मृत्युक्तराजधर्मविरोधात्। के तर्हि ते तूष्णीकाः? इति चेत् **नग्नका**ः कुत्सिता नग्ना अवाससः। **'**कुत्सिते**'** इत्यनेन कन्। विगतमाना नग्ना इव विनष्टराष्ट्रधना अपि एते चञ्चला न भवन्तीति नायकेषु नग्नकानाम-भेदारोपः।

**लोकः सुखार्थी नियमं विरुध्य सर्वान्नभोजी न भवेत्कदापि।**
**काकोऽप्यहित्वा निजबन्धुमत्ति सर्वोऽपि भोज्येषु समाधिकारः ॥४॥**

**लोक इति। सुखार्थी** आत्मनः सुखमर्थयते तच्छीलमस्य, आनन्दाभिलाषीत्यर्थः। **लोक**ः जनः **नियमं** संविधानं जीवनाय प्राज्ञैर्निर्दिष्टमिति यावत्। **विरुध्य** उल्लङ्घ्य **सर्वान्नभोजी** सर्वेषामन्नं, तस्य भोजनं शीलमस्य सर्वान्नीनः। 'ताच्छील्ये णिनिः'। **कदापि** कस्मिन्नपि काले **न भवेत्। काक**ः करटोऽपि 'काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः'इत्यमरः। **निजबन्धुं** स्वकीयम् **अहित्वा** अपरित्यज्य **अत्ति** भुङ्क्ते, अद भक्षणे धातुः। **सर्व**ः समोऽपि जन्तुः **भोज्येषु** भोजनीयपदार्थेषु **समाधिकार**ः समानोऽधिकारो यस्य सः। तुल्यावसर इत्यर्थः । दृष्टान्तालङ्कारः 'चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः' इति तल्लक्षणम् । इन्द्रवज्रावृत्तम् 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति तल्लक्षणम्।



ISSN : 2320-740X

[redacted]

स्वसुखं वाञ्छञ्जनः धर्मं नोल्लङ्घेत । सर्वान्नीनो भूत्वा कदापि इतरेषां जीवितं न नाशयेत्। काको यथा अन्यैः काकैः सह भुङ्क्ते, तथा मनुष्यः भोजने आत्मा इवान्योऽप्यधिकारीति मत्वा अभ्यवहरेत् 'सहनाववतु । सहनौ भुनक्तु' इत्यादिश्रुतिरपि तदाह । तेन सम्पदो हारका मौनिनो नायका वा स्वयं जीवन्तोऽन्यान् जीवयेयुरिति व्यज्यते।

**निर्धना भुञ्जते चूर्णितां रोटिकां कर्पटाच्छादकाः शेरते वर्त्मसु।**
**सम्पदा मन्त्रिणो वित्तकोषाशिनो भारतीयाःकिमेते ? न भो! लुण्टकाः ॥५॥**

**निर्धना इति । निर्धना** दरिद्राः **चूर्णितां** कृतचूर्णां । चूर्णयतेःकर्मणि क्तः । **रोटिकां** पिष्टसाध्यो भोज्यद्रव्यविशेषस्ताम्। 'रुट् प्रतिघाते' इति धातोः रोटते प्रतिबध्नाति क्षुधमित्यर्थे रोटः। रोट एव रोटकः। पचादेराकृतिगणत्वात् अच्। स्वार्थे कप्रत्ययः। स्त्रीत्वविवक्षायां रोटिकेति । **भुञ्जते**ऽभ्यवहरन्ति । 'भुज पालनाभ्यवहारयोः' इतिधातोर्लट् । **कर्पटाच्छादकाः** 'पटच्चरं जीर्णवस्त्रं समौ नक्तककर्पटौ' इत्यमरः । **वर्त्मसु** मार्गेषु 'अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः' इत्यमरः । **शेरते** शयनं कुर्वन्ति। शीङ् स्वप्ने इति धातोर्लट् । **मन्त्रिणः** सचिवाः **सम्पदा** निजसम्पत्त्या । ज्ञापकात् तृतीया । **वित्तकोषाशिनः** वित्तकोषमश्नन्तीति बहुधनप्रवर्त्यमानवित्तकोषभोगिन इति भावः । **एते भारतीयाः किम्? भोः** कुमार! **न**, अपितु **लुण्टकाः** लुण्टन्त्यपहरन्तीति चोराः। लुटि स्तेये इति धातोर्लट्।

भारते आढ्यदरिद्रयोस्तारतम्यं सज्जनेषु भूयसीं व्याकुलतां जनयति। प्रशासका मन्त्रिणस्तु दरिद्रानुपेक्षन्ते। तद्धि, दरिद्रा अपूर्णोदरा वीथीवासाः कष्टेन जीवन्ति, मन्त्रिणश्च न केवलं वित्तमश्नन्ति, किन्तु वित्तकोषमपीति ते लुण्टका इति तात्पर्यम्।

**स्वराज्यचिन्तः सचिवः स्वसौख्यं विहाय सर्वोदरपूरणाय।**
**यतेत चित्तस्य शुचिं विधाय व्रतेन बद्धोऽप्यपरिग्रहेण ॥६॥**

**स्वराज्येति । स्वराज्यचिन्तः** स्वराज्ये चिन्ता यस्य सः, निजराष्ट्रविषये चिन्तनपरः सन् **सचिवः** मन्त्री **चित्तस्य** अन्तरङ्गस्य **शुचिं** मलनिरसनं शौचमभिप्रेतम्। यच्च गारुडे

सत्यशौचं मनःशौचं शौचमिन्द्रियनिग्रहः।
सर्वभूतदयाशौचं जलशौचन्तु पञ्चमम्॥ इति पञ्चधोक्तम्।

**विधाय** सम्पाद्य **अपरिग्रहेण** तदाख्येन **व्रतेन** नियमेनापि 'नियमो व्रतमस्त्री' इत्यमरः। **बद्धः** सम्बद्धो भूत्वा **स्वसौख्यं** स्वहितं **विहाय** अपरिगणय्य **सर्वोदरपूरणाय** सर्वासां प्रजानामाहारप्रापणाय, सुखायेति भावः । **यतेत** यत्नवान् भवेत्। उपेन्द्रवज्रावृत्तम् 'उपेन्द्रवज्रा जतजास्ततो गौ' इति तल्लक्षणम्।



ISSN : 2320-740X

[redacted]

देशस्य वृद्धिमिच्छता मन्त्रिणा तद्वासिनां जनानां सौख्यसम्पादकेन भवितव्यम् । तदर्थं सः शौचमपरिग्रहव्रतञ्च गृह्णीयात् । तेन दरिद्रा अपि भारते पूर्णोदरा भवन्ति । सर्वोन्नतिं कामयमानो गान्धिवर्यो मुख्यतया शौचापरिग्रहव्रते अग्रहीष्ट।

**लेखनी मे करालङ्कृता लेखितुं शेमुषी सूर्यभाभासिनीति स्वयम्।**
**शङ्करः सृज्यते संस्कृतेर्भञ्जकैः भारतीयाः किमेते? न भो! मर्कटाः ॥७॥**

**लेखनीति । लेखनी** लेखनसाधनवस्तु, लिख्यते अनयेति व्युत्पत्तेः । लेखितुं लेखनार्थं **मे** मम लेखकस्येत्यर्थः । **करालङ्कृता** हस्तेन भूषिता गृहीतेति यावत् । **शेमुषी** बुद्धिः, 'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः' इत्यमरः । **सूर्यभाभासिनी** भास्करस्य भाः, सेव भासते प्रकाशते तच्छीला । 'कर्तर्युपमाने' इतिसूत्रेण ताच्छील्ये णिनिः । **इति**कारणात् **स्वयमा**त्मना **संस्कृतेर्भञ्जकैः** सनातनसंस्कृतेः नाशकैः अयतार्थलेखकैरित्यर्थः । **शङ्करः** भगवान् शिवः **सृज्यते** रच्यते। सृज विसर्गे,कर्मणि लट् । **एते भारतीयाः किम्? भोः** तात ! **न,**तैश्च भगवत्स्वरूपतया विश्वस्तत्वात् । अपितु **मर्कटाः** शाखामृगाः । वानरैर्यथा माणिक्याद्यमूल्यं रत्नं विकार्यते तथा तत्त्वानभिज्ञैर्लेखनीधारिभिः स्वच्छन्दतया सदाशिवविषयिणी कृतिर्दूरसत्त्वा क्रियत इत्यर्थः ।

**चित्तं समुद्वेजयते कुलेखो मिथ्या प्रसूते व्ययते च वित्तम्।**
**ख्यात्यैकलाभाय विमुक्तनीतिं ग्रन्थं सखे! कापुरुषा लिखन्ति ॥८॥**

**चित्तमिति । कुलेखः** कुत्सितं लेखनं **चित्तं** मनः'चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः । **समुद्वेजयते** भयकम्पितं करोति, ओविजी भयसञ्चलनयोः धातुः । **मिथ्या** मृषा, कर्मार्थः । **प्रसूते** सृजति, अनृतविचारान्प्रतिपादयतीत्यर्थः । षूञ् प्राणिगर्भविमोचने धातुः । लेखकसम्बन्धि **वित्तं** धनञ्च 'द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु' इत्यमरः । **व्ययते** व्ययितङ्करोति,व्यय वित्तसमुत्सर्गे धातुः । **सखे!** मित्र, **ख्यात्यैकलाभाय** प्रसिद्धिमात्रावाप्तये **कापुरुषाः** विवेकहीना जनाः **विमुक्तनीतिं** विमुक्ता नीतिर्लेखनसिद्धान्तो यस्य तं, **ग्रन्थं** वाक्यसमवायं लिखन्ति ।

दुर्लेखनं पाठकानां स्वास्थ्यं, प्रतिपाद्यस्य याथार्थ्यं, लेखकस्य पुनः धनञ्च नाशयति । किन्त्वेतद-नाकलितबुद्ध्योऽविवेकिनो येन केन प्रकारेण स्वप्रसिद्धिं वाञ्छन्तो विषमितं लिखन्ति । तेन लेखकैर्विवेकवद्भिः सद्भिः लौकिकालौकिकान्यतरप्रयोजनोद्देशेन प्रवृत्तवाक्यसमुदायरूपो ग्रन्थो रचनीय इति ज्ञायते ।

**देवताचित्रणात् पादुका चोरुकं क्रय्यतामाप्यते कुत्सितैर्वाणिजैः ।**
**तानिमान् सादरं वन्दितुं संस्थिता भारतीयाः किमेते ? न भोः! षण्डकाः ॥९॥**



ISSN : 2320-740X

[redacted]

**देवतेति। कुत्सितै**रधमैः **वाणिजै**रापणिकैः। 'वैदेहकस्सार्थवाहो नैगमो वाणिजो वणिक्। पण्याजीवो ह्यापणिकः क्रयविक्रयकश्च सः' ॥ इत्यमरः। **पादुको**पानत् 'अथ पादुका। पादूरुपानत्स्त्री' इत्यमरः। **ऊरुकम्** सक्थ्युपरिवस्त्रञ्च 'चड्डि' इति भाषायाम्। ऊर्ण्यते आच्छाद्यते अनयेति 'ऊर्णोतेर्नुलोपः' इत्युणादिसूत्रेण कुः नुलोपश्च। **देवताचित्रणात्** रामादिभगवच्चित्रणतः **क्रय्यताम्** आपणेषु क्रये प्रसार्यमाणत्वम्, 'क्रय्यस्तदर्थे' इति सूत्रेण निपातनात् क्रय्यम्, तस्य भावः क्रय्यता। **आप्यते** भज्यते क्रयणार्हं क्रियत इत्यर्थः। **तान्** पूर्वोक्ता**निमान्** एतान्वाणिजान् **वन्दितुम्** अभिवादयितुं **संस्थिता**ः सिद्धाः (नेतृजनाः) **भारतीया**ः **किम्? भो**ः तात! **न,एते षण्डका**ः नपुंसकाः।

पादरक्षाः ऊरुकानि च श्रीरामगणेशादिदेवतानां चित्रैश्चित्रितानि कृत्वा वणिजो विक्रीणन्ति। तान् वणिजः ये स्वार्थपरा नेतारः समाद्रियन्ते ते भृशं भारतीया न, किन्तु पौरुषहीनाः। भारतीयाश्चेत् सपौरुषास्सन्तः पूज्यनिन्दापराणि कार्याणि धिक्कुर्वन्तीति भावः।

**ग्रामाद्विवृद्धात् सुत! देशवृद्धिः ग्रामोऽपि विज्ञानयुतस्समृद्धिम्।**
**ज्ञानेन विज्ञानमपि प्रकृष्टां यातीति मत्वा जहि लोभमोहौ ॥१०॥**

**ग्रामादिति। सुत! विवृद्धाद्** विशेषतोऽभिवृद्धाद् **ग्रामाद्** जनपदात्, **देशवृद्धि**ः भारतस्याभिवृद्धिः। **ग्रामोऽपि विज्ञानयुत**ः वैज्ञानिक्या पद्धत्या युक्तः, **विज्ञानमपि ज्ञानेन** (युतम्) **प्रकृष्टा**मुच्चैः **समृद्धिं** विकासं **याति** प्राप्नोति। **इति मत्वा** ज्ञात्वा **लोभमोहौ** लोभं मोहञ्च **जहि** त्यज। तयोः परिणामस्त्यागश्च प्राज्ञैः प्रत्यपादि। लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च। द्वेषक्रोधादिजनको लोभः पापस्य कारणम् ॥

लोभः पापस्य बीजोऽयं मोहो मूलन्तु तस्य हि। असत्यं तस्य च स्कन्धो माया शाखा सुविस्तरः ॥

लोभप्रमादविश्वासैः पुरुषो नश्यते त्रिभिः। तस्माल्लोभो न कर्तव्यः न प्रमादो न विश्वसेत् ॥ इति। सारालङ्कारः 'उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते' इति तल्लक्षणम्।

भारतदेशस्याभिवृद्धिः ग्रामाणामभिवृद्ध्या, ग्रामाणाञ्च कृष्यादिकर्मसु वैज्ञानिकपद्धतियोगात्, विज्ञानस्यापि ज्ञानयोगाद्भवति। एतत्क्रममविगणय्य लोभान्मोहाद्वा अभिवृद्धिव्याजेन अन्यथाकुर्वन्ति चेद्भारतस्य हानिरेव जायत इत्यर्थः। अत्र गान्धिवर्यस्य 'ग्रामस्वराज्यस्वप्नः' स्मर्तव्यः।

**सज्जनो हन्यतामास्तिको मार्यतां मन्दिरस्योपरि स्फोटकं क्षिप्यताम्।**
**इत्थमातङ्कवादप्रियाः शिक्षिताः भारतीयाः किमेते? न भो! राक्षसाः ॥११॥**

**सज्जन इति। सज्जन**ः साधुः **हन्यतां** हिंस्यताम्, **आस्तिक**ः वेदप्रामाण्यवादी अस्ति ईश्वर इति मतिर्यस्येति व्युत्पत्तेः। **मार्यतां** पीड्यताम्। मृ हिंसायाम्। **मन्दिरस्य** देवालयस्य **उपरि** शिरसि **स्फोटकं** विदारकम् 'बाम्' इति भाषायाम्। स्फुट भेदने घञ्। क्षिप्यतां स्थाप्यताम्। क्षिप प्रेरणे कर्मणि लोट्। **इत्थम्**



[redacted]

ISSN : 2320-740X

एवंप्रकारेण **शिक्षिताः** प्राप्तशिक्षणाः **आतङ्कवादप्रियाः** आतङ्कवादः प्रियो येषां ते भयोत्पादनवादासक्ता जना इत्यर्थः । आतङ्कयतीत्यातङ्कः, आङ् पूर्वकात् 'तकि कृच्छ्रजीवने' इति धातोः पचाद्यच्। आतङ्कस्य वदनं भावे घञ् । **भारतीयाः किम्? भोः** तात ! **न,**

तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विनः ।
दानानि चात्र दीयन्ते परलोकार्थमादरात् ॥

इति विष्णुपुराणोक्तदिशा तपःप्रभृतीनि भारतीयानां विहितानि कर्माणि । तत्प्रतिकूलानि सर्वथा निषिद्धानि कुर्वन्तीति **एते राक्षसाः** परजीवितक्षोभजननद्वारा पुण्यजना भवन्ति । साधुवैदिकजनहनन-देवालयनाशादिषु गर्हितेषु कर्मसु प्राप्तविद्या भारतीया न, अपितु राक्षसा इत्यर्थः ।

**द्वेषो रणं मारणमग्निदाहः परस्परं शान्तिहतिर्जनेषु ।**
**जगद्दुनोतीति किमत्र चित्रं? सर्वत्र हेतुर्ननु! भेदबुद्धिः ॥१२॥**

**द्वेष इति । जनेषु** मनुष्येषु **परस्परं** मिथो **द्वेषः** वैरभावः, **रणं** युद्धम् 'अस्त्रियां समरानीकरणाः कलहविग्रहौ' इत्यमरः । **मारणं** वधः, **अग्निदाहः** वह्निना भस्मीकरणं परगृहादेरित्यर्थः । **शान्तिहतिः** शान्तेरपकर्षश्च **जगत्** विश्वं **दुनोति** परितापयति । टुदु उपतापे । **इत्यत्र** अस्मिन्विषये **चित्र**माश्चर्यं **किम्? सर्वत्र** एतेषु द्वेषादिषु **हेतुः** कारणं, **भेदबुद्धिः** वैषम्यम्। **ननु** अवधारणार्थे ।

जनानां मध्ये सम्भवन्तो द्वेषादयः लोकमेव सन्तापयन्ति । तत्र तेषु विद्यमाना भेदबुद्धिरेव कारणम्। 'सङ्गच्छध्वं संवदध्वम्' इत्यादिश्रुत्युक्तरीत्या सर्वे जना मानसमैक्यं रक्षन्ति, तथा आचरन्ति चेदातङ्कवादप्रिया न भवेयुरित्यर्थः ।

**पट्टने पद्धतौ वाहने चापणे लज्जया प्रज्ञया मातृभावेन च ।**
**नो युताः कामुका योषितां भक्षकाः भारतीयाः किमेते ? न भोः! कुक्कुराः ॥१३॥**

**पट्टन इति । पट्टने** विपण्यां, पतन्ति गच्छन्ति वणिजो यत्र तस्मिन् ,पट गतौ । बाहुलकात् तनन् । **पद्धतौ** मार्गे 'अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः । सरणिःपद्धतिःपद्या वर्तन्येकपदीति च ॥ इत्यमरः' । **वाहने** याने, **आपणे** निषद्यायाञ्च, **लज्जया** ह्रिया, **प्रज्ञया** मत्या विवेकेनेति भावः, **मातृभावेन** मातरि यादृशः पूज्यभावस्तादृशेन **च नो युताः** रहिताः, **कामुकाः** कमितारः, 'कामुके कमितानुकः' इत्यमरः । **योषितां** स्त्रीणां, स्त्री योषिदबला योषेत्यमरः । **भक्षका** अत्याचारादिकुकर्माचरणेन जीवितनाशका लक्षणया बोध्यन्ते । **एते भारतीयाः किम्? भोः** तात **! न,** 'पदे पदे शुभं तस्य यस्स्त्रीमानञ्च रक्षति' इत्यभियुक्तोक्तिविरुद्धत्वात् तद्विपरीताचरणाच्च। (किन्तु) **कुक्कुराः** श्वानः,

**श्रोणीं वक्षःस्थलं वक्त्रं यःपश्यति परस्त्रियाः ।**



ISSN : 2320-740X

**कामतो वापि मूढश्च षण्डो भवति निश्चितम् ॥**

इति परस्त्रीदर्शनादिनिषेधवचनस्य जागरूकत्वेऽपि तदनाकलिततया कामातुरा लज्जादिभिर्मुक्ता पत्तनादिषु अबलासु अत्याचारादिकुकर्म कुर्वन्तीति नैते भारतीया मनुष्या अपितु सारमेया इत्यर्थः ।

**रामस्य सङ्कीर्तनतत्पराश्चेद्धर्मानुगाः संयमिनो भवन्ति ।**
**सीतायुतो रावणसोदरीं वा नान्यां वियुक्तोऽपि ददर्श मानी ॥१४॥**

**रामस्येति।** जना **रामस्य** भगवतो रामचन्द्रस्य **सङ्कीर्तनतत्पराः** चरितकथने निमग्नाः सन्तः, **धर्मानुगाः** धर्ममनुगच्चन्तीति धर्ममार्गमनुसरन्तश्च (भवन्ति) **चेत्** ते **संयमिनः** चित्तवृत्तिं निरुन्धाना भवन्ति । **मानी** मर्यादापुरुषोत्तमः सः, **सीतायुतः** जानक्या संयुक्तः पञ्चवट्यामित्यर्थः । **रावणसोदरीं** शूर्पणखां (तयोद्वाहार्थं याचितः) **वियुक्तः** सीतया विप्रलब्धोऽपि (सीतापरित्यागात्परम्) **अन्या**मितरां स्त्रियं **वा न ददर्श** कामवशो भूत्वा नाद्राक्षीत् । अर्थान्तरन्यासालङ्कारः 'उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः' इति तल्लक्षणम् ।

श्रीरामस्य नामोच्चारणमपि मनो निर्मलीकरोति । अतो जनास्तत्सङ्कीर्तनपरा धर्मपथगामिनश्च भवेयुः । तेन ते इन्द्रियनिग्रहणे समर्था भविष्यन्ति । इत्थम्भूता अत्याचाराख्ये कुकार्ये न प्रवर्तन्ते । एकपत्नीव्रतस्थो रामः वनवासावधावात्मानं वरीतुकामां शूर्पणखां 'कृतदारोऽस्मि भवति भार्येयं दयिता मम' इत्युक्त्वा विजहौ । कालान्तरे परित्यक्तसीतोऽपि स नान्यामकामयत । सोऽयं रामो निजभक्तान् संयमधनान् करोतीत्यर्थः ।

**यैरिमे पोषिताः शिक्षणाद् वर्धिताः संस्कृताः संभृताः सत्पथे स्थापिताः ।**
**वार्धके बन्धिनः कुर्वते तान् सुता भारतीयाः किमेते? न भोः! कंसकाः ॥१५॥**

**यैरिति। यैः** मातापितृभि**रिमे** एते (सुताः) **पोषिताः** पालिताः, पुष पुष्टौ कर्मणि क्तः । **शिक्षणाद्** विद्याप्रदानतो **वर्धिताः** समेधिताः **संस्कृताः** संस्काराधानात् संस्कृताः **संभृताः** सम्यक् कृतभरणाः **सत्पथे** अनवद्ये मार्गे **स्थापिताः** संयोजिताः सन्मार्गेण गमनाय प्रेरिता इतिभावः । **तान्** पितॄन् **वार्धके** वृद्धावस्थायां **बन्धिनः** (वृद्धालयस्थान्विधाय) अस्वतन्त्रान् **सुताः** पुत्राः कुर्वते । **एते भारतीयाः किम्? भोः** तात! **न,** भारतीया न, **कंसकाः** कंसरूपाः ।

'मातृदेवो भव । पितृदेवो भव' इति खलु वेदोपदेशः । तत्र श्रद्धावन्तो भारतीयाः भरणदिग्दर्शनादौ निजवृद्धिकारणं पितॄन् प्राप्तवृद्धावस्थानपि सादरं रक्षन्ति । तदेतदाचारानाकलितमतयो मूढास्ते स्थविरान् कारास्थान् कुर्वन्ति। कंसो निजपितरौ देवकीवसुदेवौ कारावासिनौ चकार। तत्कार्यकारित्वेन तादृशाः कंसा इति तदर्थः ।



[redacted]

ISSN : 2320-740X

**शतानि सूत्राणि भवन्तु सिद्ध्यै संस्कार एवापरकल्पवृक्षः ।**
**तद्वाञ्जनो नन्दयतीह वंशं देशञ्च लोकं कुरु तत्र बुद्धिम् ॥१६॥**

**शतानीति । सिद्धै** कार्यसिद्ध्यर्थं, **शतानि** बहूनि असङ्ख्यानीति भावः । **सूत्राणि** उपायाः **भवन्तु** सन्तु नाम।**इह** नानाविधसमस्यानां समाधानविषये तु **संस्कारः** आत्मगुणाधानहेतुभूतः कर्मविशेषः, एव **अपरकल्पवृक्षः** प्रसिद्धादन्योऽभीष्टदो देवतरुः । **तद्वान्** संस्कारवान् जनः **वंशं** कुलं **देशं** राष्ट्रं **लोकं** भुवनञ्च **नन्दयति** परितोषयति । **तत्र** संस्कारप्राप्तौ **बुद्धिं** मतिं, **कुरु** विधेहि । संस्कारेऽपरस्य कल्पवृक्षस्या-रोपात्ताद्रूप्यरूपकम्।

आत्मनः कुलस्य देशस्य च सर्वविधोन्नतये अनेके उपाया भवन्तु । तेषु संस्कारः प्रथमोपायः । मनुष्यः संस्कारवान् भवेत्। तेन समस्यानां परिहारः सुकरः । कार्यसिद्धिश्च भवति । तदर्थमित्थमाशास्यते लोककल्याणाभिनिवेशिभिर्महर्षिभिः

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः ॥ इति ।

*****



ISSN : 2320-740X

[redacted]

## रामराज्यार्थं भरतोपदेशः

✍डा. हरिप्रसादः के.
सहायकाचार्यः, शिक्षाशास्त्रविभागः

रामायणस्य अयोध्याकाण्डे शततमः सर्गः । पितृवाक्यपरिपालनार्थं ससीतो रामः लक्ष्मणेन सह वनवासार्थं प्रस्थाय मध्ये गुहस्य आतिथ्यं प्राप्य पश्चात् गङ्गानदीं तीर्त्वा भरध्वाजाश्रमं गत्वा, ततः चित्रकूटपर्वतं सम्प्राप्य तत्र कुटीं निर्माय वस्तुमारभत।

तत्र अयोध्यायां वशिष्ठप्रेषितानां दूतानां माध्यमेन मातुलगृहात् आनीतः भरतः पितुः दिवङ्गमनस्य कारणं कैकेयीति विज्ञाय तां भृशं गर्हित्वा, पितुः और्ध्वदैहिकं सर्वविधं कर्म निर्वर्त्य चदुरङ्गबलोपेतां सेनां स्वीकृत्य सामाजिकैः सह अरण्यात् रामं प्रत्यानीय सिंहासने अभिषेचनं कर्तुं सङ्कल्प्य प्रतिष्ठते । चित्रकूटस्य कुटीरे सम्प्राप्तं भरतं रामः मूर्ध्नि आघ्राय परिष्वज्य स्वीये अङ्के उपावेश्य अनुयोक्तुमारभते । पितुः मातॄणां पुरोहितस्य वसिष्ठस्य, गुरोश्च सुधन्वानः च कुशलां वार्तां पृष्ट्वा प्रश्नमाध्यमेन एव भरतम् उपदेष्टुमारभते –

**मन्त्रिणः**

**कच्चिदात्मसमाः शूराः श्रुतवन्तो जितेन्द्रियाः ।**
**कुलीनश्चेङ्गितज्ञाश्च कृतास्ते तात मन्त्रिणः ॥**

हे भरत, भवतः आस्थाने कीदृशाः मन्त्रिणः भवता नियोजिताः ? ते मन्त्रिणः भवत्सदृशाः एव सन्ति किल ? शूराः ज्ञानिनः जितेन्द्रियाः उत्तमकुले जाताः, तीक्ष्णमतयः मन्त्रिणः एव भवता नियोजिताः किल ? इति रामस्य प्रश्ने राज्यस्य सुशासनार्थं पूर्वोक्तविशेषणाविशिष्टाः मन्त्रिणः आवश्यका इति अभिप्रायोऽस्ति । अतः एतादृशैः मन्त्रिभिः सह मन्त्रणां कृत्वा राजा शास्ति चेत् साफल्यमवाप्तुम्(विजयम्) अर्हति इति अग्रिमश्लोके कथयति।

**मन्त्रो विजयमूलं हि राज्ञां भवति राघव ।**
**सुसंवृत्तो मन्त्रिधुरैरमात्यैः शास्त्रकोविदैः ॥**

राज्यस्य समृद्धये अहर्निशं एभिः मन्त्रिभिः सह मन्त्रणां कृत्वा राजा निर्णयं स्वीकुर्यात्, निद्रादिविषयमोहगर्ते निमग्नो न भवेत् इति अनेन श्लोकेन उपदिशति-

**कच्चिनिद्रावशं नैषि कच्चित्कालेऽवबुद्ध्यसे ।**
**कच्चिच्चापररात्रेषु चिन्तस्यस्यर्थनैपुणम् ॥**



[redacted]

ISSN : 2320-740X

**शत्रुतः गुप्तस्य गोपनम्**

इत्थं मन्त्रणासमयेऽपि गोप्यता संरक्षणीया । मन्त्रणार्थमपि अधिकाः न भवेयुः । गुप्ताः विषयाः अधिकेषु मन्त्रयितृषु सत्सु बहिः प्रकाशिताः भवन्ति । भवता अधिकजनानां मध्ये सुचिन्तिताः गुप्तविषयाः शत्रूणां निकटे न गच्छन्ति किल ? इति रामः अग्रिमश्लोके भरतं मन्त्रणाविषयसंरक्षणजागृतिम् उपदिशति -

**कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिः सह ।**
**कच्चित्ते मन्त्रितो मन्त्रो राष्ट्रं न परिधावति ॥ इति ।**

**समये सुकार्यसाधनम्**

अल्पश्रमेण साधयितुं योग्यं किञ्चन महत्प्रयोजनं मनसि निधाय सुचिन्तितं कार्यं विलम्बेन न आरभसे किल ? तादृशाणि कार्याणि तूर्णं साधनीयानि इति रामस्य अभिप्रायः अस्मिन् श्लोक्के उपदिष्टो वर्तते -

**कच्चिदर्थं विनिश्चित्य लघुमूलं महोदयम् ।**
**क्षिप्रमारभसे कर्म न दीर्घयसि राघव ॥ इति ।**

**शत्रुभ्यः कार्यरक्षणम्**

शत्रवः अस्माभिः करिष्यमाणानि कार्याणि आदावेव न जानीयुः । कार्यं यदा सिद्ध्यति ततः परं ज्ञास्यन्ति चेत् चिन्ता नास्ति । पूर्वमेव ज्ञास्यन्ति चेत् कार्ये बाधं जनयेयुः । अथवा अस्मदपेक्षया पूर्वमेव ते तत् कार्यं साधयित्वा अस्माभिः प्राप्तव्यं प्रयोजनं ते अपहरेयुः । तदर्थं रामः भरतं अग्रिमे श्लोके जागरयति-

**कच्चिन्नु सुकृतान्येव कृतरूपाणि वा पुनः ।**
**विदुस्ते सर्वकार्याणि न कर्तव्यानि पार्थिवाः ॥ इति ।**

**स्वीयस्य गोप्यस्य परानवगतिः, परेषां तु गोप्यस्य अवगतिः**

अमात्यैः सह मन्त्रितः विचारः बहिः न प्रकटितः चेदपि इतरैः(शत्रुभिः) तर्केण युक्त्या वा न ज्ञायेत । प्रत्युत इतरैः (शत्रुभिः) मन्त्रितः विचारः प्रकटनात्प्रागेव ज्ञातव्यः । अतः ईदृशं कार्यं भवान् भरतः साधयति किल इति रामः पृच्छति -

**कच्चिन्न तर्कैर्युक्त्या वा ये चाप्यपरिकीर्तिताः ।**
**त्वया वा तव वामात्यैर्बुध्यते तात मन्त्रितम् ॥ इति ।**

**सुयोग्यानां श्रेष्ठानां नियोजनम्**

एवम् मन्त्रणां कृत्वा समस्यापरिहाराय सम्पदभिवृद्धये च अल्पसंख्याकाश्चेदपि सुयोग्यानामेव मन्त्रिणां राजा नियोजनं कुर्यात् न तु अधिकसंख्याकानां अयोग्यानाम् इति सकारणं प्रतिपाद्य भरतम् इत्थम् उपदिशति रामः -

कच्चित् सहस्रैर्मूर्खाणामेकमिच्छसि पण्डितम् । पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निश्रेयसं महत् ॥



ISSN : 2320-740X

सहस्राण्यपि मूर्खाणां यद्युपास्ते महीपतिः। अथवाप्ययुतान्येव नास्ति तेषु सहायता॥
एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षणः। राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम्॥

**योग्यतानुसारं भृत्यानां नियोजनम्**

जनानां योग्यतां सम्यक् विज्ञाय तदनुगुणं तेषां कृते विविधानि पदानि दातव्यानि भवन्ति। साम्प्रतिकप्राशासनिकव्यवस्थायां वयं एतद्विपरीतं पश्यामः। किञ्च श्रेष्ठानां नियोजनवेलायां तेषां श्रेष्ठतायाः मूल्याङ्कनार्थं तेषां पितृपितामहादयः शुचयः आसन् वा न वेत्यपि परीक्षणीयमिति रामः वदति। सम्प्रति नेतृणाम् अधिकारिणां च भ्रष्टाचारं पश्यामः चेत् रामस्य चिन्तनं रामराज्यस्य निर्माणे कियत् श्रेष्ठमासीदिति पद्यद्वयेन ज्ञायते -

कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः। जघन्याश्च जघन्येषु भृत्यास्ते तात योजिताः॥
अमात्यानुपधातीतान् पितृपैतामहान् शुचीन्। श्रेष्ठान् श्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्मसु॥

**उग्रकरविधानस्य परिणामः**

द्विरेफवत् राज्ञा करग्रहणं कर्तव्यं येन राज्ञः अपि लाभः भवेत् प्रजानामपि हानिः न स्यात् इति चाणक्यः अर्थशास्त्रे वदति। द्विरेफः मकरन्दं पिबति चेत् द्विरेफस्य तु लाभः भवत्येव। किन्तु पुष्पस्य कापि हानिर्न भवति प्रत्युत परागस्पर्शेन वृक्षसन्ततिरेव वर्धते। किन्तु राजा बलात् उग्ररूपेण करं विधत्ते चेत् कामचारिणं पुरुषं स्त्रियः यथा अवजानन्ति तथा राजानमपि प्रजाः अवजानन्ति। भवान् तु तथा न करोति किल ? इति रामः अनेन श्लोकेन पृच्छति -

कच्चित् त्वां नावजानन्ति याजकाः पतितं यथा।
उग्रप्रतिग्रहीतारं कामयानमिव स्त्रियः॥ इति।

**उपायादिकुशलस्य शत्रोः अहननस्य परिणामः**

राजा कुशलं शत्रुं न हन्ति चेत् सः शत्रुः स्वयं राजानमेव हन्ति। अतः तादृशस्य शत्रोः हननम् अवश्यमेव कर्तव्यम् इति रामः इत्थम् उपदिशति -

उपायकुशलं वैद्यं भृत्यसंदूषणे रतम्।
शूरम् ऐश्वर्यकामं च यो हन्ति न स हन्यते॥ इति।

**कीदृशस्य सेनापतेः नियोजनं कर्तव्यम् ?**

एकस्य राज्यस्य संरक्षणार्थं सेनापतिः कथं भवेत् ?



ISSN : 2320-740X

कीदृशस्य सेनापतेः नियोजनं कर्तव्यमिति भरतमुपदिशति रामः -

कच्चित् धृष्टश्च शूरश्च धृतिमान् मतिमान् शुचिः ।
कुलीनश्चानुरक्तश्च दक्षः सेनापतिः कृतः ॥ इति ।

**कर्मचारिणां वेतनस्य भक्तस्य च समये प्रदानस्य महत्वम्**

प्रशासकस्य इयं तु चातुरी भवति यत् काले काले कर्मकरेभ्यः वेतनस्य भक्तस्य च दानेन तत्सकाशात् अधिकसेवायाः स्वीकारः इति । तदभावे महाननर्थश्च भवतीति राजा जानीयात् । भवान् तु इत्थमेव काले तेभ्यः वेतनं भक्तञ्च सर्वेभ्यः कर्मकरेभ्यः प्रयच्छति किल ? विलम्बं तु न करोति किल ? इति रामः भरतं पृच्छति -

कच्चिद्बलस्य भक्तञ्च वेतनं च यथोचितम् । सम्प्राप्तकाले दातव्यं ददासि न विलम्बसे ॥
कालातिक्रमणे ह्येव भक्तवेतनयोर्भृताः । भर्तुरप्यतिकुप्यन्ति सोऽनर्थः सुमहान् कृतः ॥ इति ।

**स्वबलस्य शत्रुसामर्थ्यस्य च नियतपरीक्षा**

त्रयाणां त्रयाणां गुप्तचराणां माध्यमेन शत्रुपक्षस्य अष्टादशव्यक्तीनां स्वपक्षस्य पञ्चदशव्यक्तीनाञ्च व्यवहारस्य विषये राज्ञा अवधानं दातव्यमिति मनुना यदुक्तं तदत्र दण्डनीतिशास्त्रानुगुणं रामः भरतमुपदिशति । शत्रुपक्षस्य आष्टादश जनाः इमे भवन्ति येषां व्यवहारः सूक्ष्मेक्षिकया अवलोकनीयः – मन्त्री, पुरोहितः, युवराजः, सेनापतिः, द्वारपालः, अन्तःपुराध्यक्षः, कारागाराध्यक्षः, कोशाध्यक्षः, यथायोग्यकार्येषु धनव्ययकर्ता सचिवः, सुरक्षासचिवः(Security Chief), नगराध्यक्षः, कार्यनिर्माणकर्ता(अभियन्ता), धर्माध्यक्षः, सभाध्यक्षः, दण्डपालः, दुर्गपालः, राष्ट्रसीमापालः, वनरक्षकश्च । स्वपक्षे तु पूर्वोक्तेषु आदिमान् त्रीन् विहाय अवशिष्टानां विषये राजा दृष्टिं निदधीत ।

कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च ।
त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ॥ इति ।

**दण्डितशत्रोर्विषये जागरूकता**

कच्चित् व्यपास्तान् अहितान् प्रतियातांश्च सर्वदा । दुर्बलाननवज्ञाय वर्तसे रिपुसूदन ॥

**नास्तिकबुद्धीनां (बुद्धिजीविनः) निन्दा**

सम्प्रति यथा बुद्धिजीविनः इति यान् वयं ब्रूमः तादृशाः जनाः रामायणकालेऽपि आसन् । नास्तिकाः ते आत्मानं पण्डितं मन्यमानाः दुर्बुधाः अनर्थकुशलाः भवन्ति । ते सर्वदा निरर्थकतर्कमुपयुज्य वृथा अपलापं कुर्वन्तः समाजस्य शान्तिं नाशयन्ति । काङ्ग्रेस्-प्रभृतीनि दलानि यथा सम्प्रति तान् सम्पोष्य स्वानुकूलतया उपयुञ्जते न तथा कर्तव्यमिति रामः तदानीमेव भरतमुपादिशत् -



ISSN : 2320-740X

कच्चिन्न लोकायतिकान् ब्राह्मणांस्तात सेवसे। अनर्थकुशला ह्येते बालाः पण्डितमानिनः॥

धर्मशस्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः। बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते॥ इति।

इत्थं स्त्रीसंरक्षणविषये, दुर्गसमृद्धिविषये, आर्याणाम् अविचार्य दण्डदानविषये, चोराणां उन्मोचनहानिविषये चेति बहुषु विषयेषु भरतम् उपदिश्य राजधर्मं बोधितवान्। रामायणस्य अयोध्याकाण्डे विद्यमाने अस्मिन् शततमे सर्गे अत्यन्तं प्रासङ्गिकाः सार्वकालिकाः राजधर्मसम्बद्धाः विषयाः सप्तदशलक्षवर्षेभ्यः प्रागेव रामेण उपदिष्टाः इति अत्यन्तं गर्वेण भक्त्या च अस्माभिः परिगृह्यन्ते।

सन्दर्भाः


1. श्रीमद्वाल्मिकीयरामायण गीताप्रेस् गोरखपुर
2. विशुद्ध मनुस्मृति, आर्ष साहित्य प्रचार ट्रष्ट दिल्ली
3. अर्थशास्त्रम्


*****



[redacted]

ISSN : 2320-740X

# अर्थान्तरस्य विन्यासे कालिदासो विशिष्यते

✍डा. चन्द्रकला आर्. कोण्डि
सहायकाचार्या, साहित्यविभागः

'उपमा कालिदासस्ये'त्युक्तिः कस्य वा श्रवणपथं नागता ? को वा सहृदयः कविकुलगुरोः परमरमणीये उपमाप्रयोगे न रमते ? यद्यपि तस्य उपमाः सर्वजनादरणीया वर्तन्त एव, तथापि तत्तु अन्यकविविलक्षणतया कविरयमुपमाप्रयोगे विशिष्यत इत्येवार्थमभिव्यनक्ति, न तूपमां विहायान्यालङ्कारप्रयोगे कालिदासोऽसमर्थ इत्यर्थम् । उपमावदन्यालङ्काराणामपि काव्यशोभाकरत्वेन रसपोषकत्वेन च प्रयोगे नितान्तं निपुणोऽयमिति तस्य काव्यानामवलोकनेन स्पष्टं ज्ञायते । तत्रापि अर्थान्तरन्यासालङ्कारप्रयोगे विशिष्टा काचिद्गतिः तस्य सर्वेष्वपि काव्येषु दरीदृश्यते।

अर्थान्तरन्यासः प्राचीनोऽलङ्कारः। अस्य व्युत्पत्तावेवास्य स्वरूपमपि समाविष्टमस्ति। अर्थान्तरं नाम वाच्यभिन्नार्थ इति सामान्यतया गृह्यते । किन्तु केषुचित्सन्दर्भेषु साक्षाद्वचनेन कविविवक्षितार्थस्य स्पष्टता न सम्पाद्यत इति अन्येन केनचिदर्थेन तस्य समर्थनद्वारा कविस्तत्सम्पादयितुं प्रयतते। तादृशसन्दर्भे प्रयुज्यमानालङ्कारोऽर्थान्तरन्यासः । अर्थाद्यद्वस्तु प्रस्तोतुमिच्छति कविः, तस्यार्थान्तरमुपन्यस्य स्वविवक्षितं परिपोषयति, कमपि चमत्कारञ्चोत्पादयति । कस्यापि विषयस्यासम्भाव्यतां दूरीकर्तुं तत्समर्थनरूपोऽन्यविषय उपस्थाप्यते । अतः समर्थ्य-समर्थकभाव एवास्यालङ्कारस्याधारः । तयोः समर्थ्य-समर्थकयोः सामान्यविशेषभावः । समर्थ्यस्य सामान्यत्वे समर्थकस्य विशेषत्वम् , समर्थ्यस्य विशेषत्वे समर्थकस्य सामान्यत्वम्। तत्रापि साधर्म्येण वैधर्म्येण चेति द्वैविध्यमित्यन्तिमरूपेणार्थान्तरन्यासः चातुर्विध्यं भजते-

१. साधर्म्यमूलकः सामान्येन विशेषस्य समर्थनरूपः।

२. साधर्म्यमूलकः विशेषेण सामान्यस्य समर्थनरूपः।

३. वैधर्म्यमूलकः सामान्येन विशेषस्य समर्थनरूपः।

४. वैधर्म्यमूलकः विशेषेण सामान्यस्य समर्थनरूपः।

इति । अस्यालङ्कारस्य प्रयोगे नितान्तं निष्णातोऽयं कविः । यद्यपि तेन विरचितेषु सर्वेष्वपि काव्येष्वस्यालङ्कारस्य प्रयोगो दृश्यत एव तथापि तद्विरचिते खण्डकाव्ये मेघदूताख्येऽस्य प्रचुरः प्रयोगः परिदृश्यते। विप्रलम्भशृङ्गारस्य कथावस्तुनश्चात्यन्तमेव योग्योऽयमलङ्कार इति प्रतिभाति तस्यावलोकनेन । उपमापेक्षयाऽपि अर्थान्तरन्यासप्रयोगोऽस्मिन् काव्ये विशिष्यते । शब्दशिल्पिना कविकुलगुरुणा प्रायः न्यूनातिन्यूनं पञ्चविंशतिस्थलेष्वय-मलङ्कारः प्रयुक्तः । मनोवृत्तेः समर्थनाय, अलोकसामान्यकार्यसमर्थनाय-एवमनेके सन्दर्भा अर्थान्तरन्यासालङ्कारविषयीकृतास्तेन।



ISSN : 2320-740X

पश्यामस्तावत् उपमाधिपतेः कविकुलगुरोः अर्थान्तरन्यासवैदुष्यम्।

**साधर्म्यमूलकः विशेषस्य सामान्येन समर्थनरूपः**

धूम-ज्योति-सलिल-मरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु। [1]

यक्षः कान्तया वियुक्तः सन्, तां प्रति स्वस्य कुशलसन्देशं प्रेषयितुमिच्छति। को वा दौत्यं कुर्यादिति चिन्तयन् सः मेघं ददर्श। स च मेघ एव दूतः कृतः। किन्तु चेतनैः क्रियमाणं दौत्यकार्यम् अचेतनो मेघः कथं कुर्यादिति न चिन्तितवान्। स विशेषः कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु इत्यनेन सामान्येन समर्थितम्।

**वैधर्म्यमूलकः विशेषस्य सामान्येन समर्थनरूपः**

गुरुः प्रगल्भेऽपि वयस्यतोऽस्यास्तस्थौ निवृत्तान्यवराभिलाषः।
ऋते कृशानोर्न हि मन्त्रपूतमर्हन्ति तेजांस्यपराणि हव्यम्॥ [2]

अत्र प्रथमपादो विधिरूपः, विशेषश्च, स च विशेषः द्वितीयपादेन सामान्येन वैधर्म्येण समर्थ्यते।

**द्वयोः अर्थान्तरन्यासयोः प्रयोगः**

सर्वः कल्पे वयसि यतते लब्धुमर्थान् कुटुम्बी
पश्चात्पुत्रैरपहृतभरः कल्पते विश्रमाय।
अस्माकन्तु प्रतिदिनमियं साधयन्ती प्रतिष्ठां
सेवाकारापरिणतिरहो स्त्रीषु कष्टोऽधिकारः॥ [3]

अत्र पूर्ववाक्यं एकं सामान्यम् आश्रमव्यवस्थां प्रतिपादयति। मध्ये कञ्चुकीजीवनस्य विशेषदशा उल्लिखिता वर्तते। अन्ते पुनः कष्टस्य तीव्रताप्रतिपादकं सामान्य-समर्थकवाक्यं वर्तते। एष एव भावः 'सेवाधर्मः परमगहनो योगिनामप्यगम्यः' (नीतिशतकम्) इत्यत्रापि विहितमस्ति।

एवं न केवलं सामान्यविशेषभावपूर्वकं, किन्तु अन्यालङ्कारानुप्राणिता-र्थान्तरन्यासस्य, अर्थान्तरन्यासालङ्कारानुप्राणितान्यालङ्काराणां प्रयोगेऽपि पाटवं दरीदृश्यते कवेः।

**अर्थापत्त्या सहार्थान्तरन्यासः**

मेघदूतस्य तृतीयश्लोके विरहिणो यक्षस्य विक्षिप्तमनोवृत्तिरूपविशेषः सामान्येनैवं समर्थितम्-

---

[1] पूर्वमेघः-५

[2] कुमारसम्भवम्-१/५२

[3] विक्रमोर्वशीयम्-३/१



ISSN : 2320-740X

[redacted]

मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ [1]

तथैव,

न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय।
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ [2]

**विरोधाभासालङ्कारेण सह**

अकिञ्चनः सन् प्रभवः स सम्पदां त्रिलोकनाथः पितृसद्मगोचरः।
स भीमरूपः शिव उत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः ॥ [3]

अत्र विरोधाभासरूपो विशेषः। अन्तिमचरणे न सन्तीत्यादिना विरोधाभासस्य निराकरणं कृतम्।

**विकल्पेन सह**

विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालम्बि दुकूलधारि वा।
कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्तेरवधार्यते वपुः ॥[4]

अर्थान्तरन्यासस्य सामान्यः सिद्धान्तः प्रायोवादमाश्रित्य तिष्ठति । कालिदासः प्रायोवादममुं सामान्यतः आक्षिप्तरूपेणैव स्थापयति । केषुचित्स्थलेषु प्रायः, प्रायेण-इत्यादिशब्दैरभिहितं करोति । हि, यतः, खलु, ननु, किल-इत्यादिनाऽपि समर्थयति।

**दीपकानुप्राणितार्थान्तरन्यासः**

इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमत्।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥ [5]

अत्र समर्थक-सामान्यवाक्ये विषयद्वयमुक्तमस्ति, मनः पयश्चेति तत्र मनः प्रस्तुतम्, पयश्च अप्रस्तुतम्। कः प्रतीपयेत् इत्यनेन सामान्यधर्मेण संयोज्य विशेषस्य समर्थनं कृतम्।

**कारणेन कार्यस्य समर्थनरूपः**

उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया।
तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः ॥

अत्र कठिनाः खलु स्त्रियः इत्यनेन कारणेन विदीर्णताभावरूपस्य कार्यस्य समर्थनं कृतम्।

**विधेः प्रतिषेधेन समर्थनम्**

---

[1] पूर्वमेघः-३

[2] तत्रैव-१७

[3] कुमारसम्भवम्-५/७७

[4] कुमारसम्भवम्-५/७८

[5] कुमारसम्भवम्-५



ISSN : 2320-740X

प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने।
विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ॥[1]

**अर्थान्तरन्यासानुप्राणितप्रेयोऽलङ्कारः**

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः॥ [2]

अत्र हिमकारणात् हिमालयस्य सौन्दर्ये न काऽपि हानिर्जातेति निषेधवाक्येन समर्थ्यं प्रतिपादितम्। द्वितीयचरणे साधर्म्यप्रतिपादकविधिवाक्येन तत् समर्थितम्।

मानवजीवनस्य अनुभूतयः कालिदासेन अर्थान्तरन्यासद्वारा अभिव्यक्ताः सन्तीति वक्तुं शक्यते। मैत्रीविषये बहुत्र तेन अर्थान्तरन्यासद्वारा अभिहितमस्ति। उदाहरणार्थम्-

**मैत्रीभावः दाम्पत्यादप्यधिकः-**

दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने। [3]

**मित्रकार्ये शैथिल्यं न सम्पादनीयम्-**

मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः।[4]

मित्रैरानीयमानः प्रियतमवृत्तान्तः प्रियेण सह सङ्गमात् किञ्चिदूनः-

कान्तोदन्तः सुहृदुपनतः सङ्गमात् किञ्चिदूनः [5]

अज्ञातहृदयेषु स्थापितं सौहार्दं शत्रुर्भवति[6]

मित्रेषु मित्राणां स्निग्ध एव कटाक्षः पतति, न दारुणम्[7]

**सज्जनानां सङ्गतिः** साप्तपदीनं भवति-

यतः सतां सन्नतगात्रि सङ्गतं मनीषिभिः साप्तपदीनमुच्यते। [8]

कालिदासस्य जीवनानुभवोऽत्यन्तं पक्वमासीत्। स चानुभवः अर्थान्तरन्यासालङ्कद्वारा रमणीयतया तेनोपस्थापिता वर्तन्ते तस्य कृतिषु।

सुख-दुःखे जीवनोदधिमथनप्राप्तो निधिः। कस्यापि जीवने केवलं सुखं केवलं दुःखं वा न भवति -

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा।

---

1 कुमारसम्भवम्-१/६०
2 कुमारसम्भवम्-१/३
3 (कुमारसम्भवम्-४/२८)
4 पूर्वमेघः-३८
5 उत्तरमेघः-३८
6 शाकुन्तलम्-५/२६
7 शाकुन्तलम्-६/२९
8 कुमारसम्भवम्-५/३९



ISSN : 2320-740X

नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥ [1]

स्वजनसमीपमागतं दुःविवृतद्वारं भूत्वा प्रकटं भवति -

स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते। [2]

दुःखानन्तरं प्राप्तं सुखमत्यन्तं आनन्ददायकं भवति-

यदेवोपनतं दुःखात् सुखं तद् रसवत्तरम्।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः॥ [3]

जगतः क्रूरव्यवहारं दर्शयन् कालिदासः वदति-

महदपि परदुःखं शीतलं सम्यगाहुः। [4]
द्वारेण बहिर्गतं श्रेयः पुनर्नायाति [5]

जीवने विषामृतयोः स्वरूपं नित्यं न तिष्ठति। ईश्वरेच्छया विषमपि अमृतं भवेत्, अमृतमपिविषं तथा -

विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया। [6]

गुणदोषविवेचनमपि कालिदासः अर्थान्तरन्यासस्य विषयं कृतवान्।

गुणदोषौ सर्वत्र सम्पृक्तौ भवतः-नैकत्र सर्वो गुणसन्निपातः इत्यस्य न्यायस्य व्याख्यानं प्रस्तुतं कविना ।

प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विशसृजः प्रवृत्तिः [7]

सुवर्णस्य शुद्धिः श्यामिका वा अग्नौ स्पष्टं भवति-

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्याम्मकाऽपि वा। [8]

बहूनां गुणानां मध्ये पतितः एकः दोषः गुणैराच्छादितो भवति, न दृश्यते-

एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेश्विवाङ्कः [9]

उत्तमैः प्राप्तं सम्माननं स्वगुणेषु विश्वासं जनयति-

प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः। [10]

अचेतनेषु गुणग्रहणशक्तिर्न भवति -

---

[1] उत्तरमेघ-४६
[2] कुमारसम्भवम्-४/२६
[3] विक्रमोर्वशीयम्-३/२१
[4] विक्रमोर्वशीयम्-४/३८
[5] शाकुन्तलम्-७/४
[6] रघुवंशम्-८/४६
[7] कुमारसम्भवम्-३/२८
[8] रघुवंशम्-१/१०
[9] कुमारसम्भवम्-१/३
[10] कुमारसम्भवम्-६-२०



ISSN : 2320-740X

अचेतनं नाम गुणं न लक्षयेत् [1]

शरीर-इन्द्रिय-मन-बुद्धि-कर्मादिदर्शन विचारानपि कविरनेनालङ्क्रेण प्रस्तुतवान् । जीवनं-मरणम्, विरहः-मेलनम्, सुखं-दुःखम्-इत्यादिविषयेषु सूक्ष्मचिन्तनप्रसूतः सङ्केतः अनेकेषु स्थलेषु विकीर्णो वर्तते।

**शरीरम्-**

एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु। [2]

शरीरमाद्यं खलु धर्मसाधनम् [3]

**इन्द्रियम्-**

स्वादुभिस्तु विषयैर्हृतस्त्तो दुःखमिन्द्रियगणो निवार्यते। [4]

**मनः-**

गतेयमात्मप्रतिरूपमेव मनो हि जन्मान्तरसङ्गतिज्ञम्। [5]

मनोरथानामगतिर्न विद्यते। [6]

क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्। [7]

**कर्म-**

परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम्। [8]
अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम्। [9]
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः।[10]
काले खलु समारब्धाः फलं बध्नन्ति नीतयः। [11]
सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम्।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः॥ [1]

---

[1] शाकुन्तलम्-६/१३

[2] रघु. २/५७
[3] कुमार. ५/३३
[4] रघु.१९/४९
[5] रघु. ७/१५
[6] कुमार. ५/६४
[7] कुमार. ५/५
[8] रघु. ८/८५
[9] रघु. १०/६
[10] पूर्वमेघः-५४
[11] रघु. १२/६९



ISSN : 2320-740X

**मरणम्-**

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः ।[2]
तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता । [3]

**कामः-**

ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ?[4]
ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते ।[5]
कामी स्वतां पश्यति । [6]
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु । [7]

**विरहः-**

मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः ।
कण्ठाश्लेषप्रणयिनि सखे किंपुनर्दूरसंस्थे ॥ [8]
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ॥[9]
कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः । [10]
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु । [11]

**लोकशिक्षणम्-**

भिन्नरुचिर्हि लोकः ।[12]
आज्ञा गुरूणां ह्यविचारणीया । [13]
प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते ।[1]

---

[1] शाकुन्तलम्-६-१
[2] रघु. ८/८७
[3] रघु. ८/८३
[4] पूर्वमेघः-४१
[5] कुमार. ५/८२
[6] शाकुन्तलम्-२/२
[7] पूर्वमेघः-५
[8] पूर्वमेघः-३
[9] पूर्वमेघः-६
[10] कुमार. ६/९५
[11] रघु. ८/४३
[12] रघु. ६/३०
[13] रघु. १४/४६



ISSN : 2320-740X

शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः । [2]

अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः । [3]

**सज्जनाः, महापुरुषाः**

स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम् ।[4]

आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् । [5]

आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि । [6]

आदानं हि विसर्गाय सतां वारिमुचामिव । [7]

अपि स्वदेहात्किमुतेन्द्रियार्थाद्यशोधनानां हि यशो गरीयः । [8]

सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः । [9]

एवंरीत्या कविकुलगुरोः अर्थान्तरन्यासालङ्क्प्रयोगपाटवदर्शनेन अलङ्क्राऽयम् उपमाया अतिरिच्यते वेति चिन्त्यति मनः । तादृशं बाहुल्यमस्यालङ्कारस्य । एतस्य सर्वस्यापि विमर्शनेन स्पष्टं ज्ञायते यत् महाकवेः प्रतिभाया अविषय इति नास्ति जगति इति । 'उपमा कालिदासस्य' इत्यस्य समानतयैव एतदपि वक्तुं शक्यते यत् 'अर्थान्तरस्य विन्यासे कालिदासो विशिष्यत' इति शम् ।

*****

---

[1] रघु. ८/४०

[2] कुमार. २/४०

[3] रघु. ९/७४

[4] कुमार. ६/१२

[5] पूर्वमेघः-५३

[6] शाकुन्तलम् २/१६

[7] रघु. ५/८६

[8] रघु. १४/३५

[9] शाकुन्तलम्-१/१९



ISSN : 2320-740X

# तन्त्रानुष्ठानविचारः

डा. सूर्यनारायणभट्टः
सहायकाचार्यः, मीमांसाविभागः

भगवज्जैमिनिमहर्षिप्रणीतद्वादशलक्षण्यां एकादशाध्यायः तन्त्राध्यायः । **प्रयोजनाभिसम्बन्धात् पृथक्सतां ततः स्यात् ऐककर्म्यमेकशब्दाभिसंयोगात्** इति सूत्रेण आध्यायोऽयं प्रारभ्यते । ततः पूर्वं दशभिरध्यायैः प्रकृतिविकृतिसाधारण्येन अनुष्ठेयपदार्थाः अवगताः । ते च पदार्थाः उत्पत्तिविधिं विनियोगविधिं चाधिकृत्य प्रवृत्ताः । यद्यपि क्रमाध्यायः वर्तते । क्रमस्तु प्रयोगविधिविधेयो भवति । परं तत्र प्रयोगविधिः नैव चिन्तितः । स इदानीम् एकादशे तन्त्राध्याये विचिन्त्यते । प्रयोत्रविधिस्तु साङ्गप्रधानभावनायाः विधायको भवति । अन्ये तु उत्पत्तिविध्यादयः प्रधानमात्रस्य अङ्गमात्रस्य वा विधायका भवन्ति । स च प्रयोगविधिः फलार्थं साङ्गप्रधानभावनां विधत्ते । अयं चानुष्ठानबोधकः कृतिसाध्यत्वबोधकश्च। उत्पत्तिविधिः स्वरूपबोधकः । विनियोगविधिः इष्टसाधनताबोधक इत्येवं तेषु विभागः दृश्यते । एवं फलार्थं साङ्गप्रधानभावनायाः अनुष्ठानं बोधयति प्रयोगविधिः । अङ्गानां साहित्यं प्रधानानां साहित्यम् अङ्गप्रधानानां च साहित्यं बोधयाति । तच्च साहित्यम् असति बाधके एकक्षणवृत्ति एव कथ्यते । अतः अनेकोद्देशेन सकृदनुष्ठानं तन्त्रमिति तन्त्रलक्षणं कथ्यते । दशपूर्णमासाभ्यां स्वर्गकामो यजेत इत्यत्र दर्शे त्रयः प्रधानयागाः पौर्णमास्यां च त्रयः प्रधानयागाः । तेषु यागत्रयोद्देशेन सकृदेव प्रयाजानुष्ठानं क्रियते । यद्यपि त्रयः प्रधाना इति त्रिवारं प्रयाजाः अनुष्ठेयाः, सर्वेषामपि प्रयाजः अङ्गं भवति । परं तु अनेकोद्देशेन सकृदष्ठानमिति तन्त्रेण अनुष्ठानं प्रयाजानां सम्भवति । सकृदनुष्ठानेन त्र्याणमपि उपकारकं भवति । यद्यपि सकृदनुष्ठानमात्रं प्रसङ्गस्थलेऽपि वर्तते । पशुयागोद्देशेन प्रयाजाः अनुष्ठिताः । परं पशुयागार्थं अनुष्ठिताः प्रयाजाः पुरोडाशयागस्यापि उपकुर्वन्तीति प्रसङ्गे निरूपिप्रम् । तत्राति प्रयाजानां सकृदनुष्ठानं वर्तते परं तु अनेकोद्देशेन सकृदनुष्ठानं नास्ति । पशुयागोद्देशेन प्रयाजः अनुष्ठितः परं तु पशु पुरोडाशयागोद्देशेन नानुष्ठितः इति प्रसङ्गे अतिपसङ्गो नास्ति । एवं दर्शेऽपि दधिपयोयागयोः प्रयाजानां सम्प्रतिपन्नदेवताकत्वात् सकृदनुष्ठानं वर्तते । तत्र तन्त्रत्वं वर्तते परं लक्षणं नैव घटत इति शङ्का । यतो हि अनेकोद्देशेन स्कृदनुष्ठानं तन्त्रमिति वक्तव्यम् । प्रकृते च इदं यागाद्वयमपि स्वर्गोद्दशेन अनुष्ठीयते । तच्च फलमेकमेव । षड्भिरभि दर्शपूर्णमाससंज्ञकैः यागैः स्वर्गाख्यमेकमेव फलं प्राप्यते । एक एव स्वर्गः उत्पाद्यते । तादृशमेकमेव स्वर्गोद्देशेन दर्शपूर्णमासः अनुष्ठीयते चेत् अनेकोद्देशेन सकृदनुष्ठानं नैव सम्भवति । एकस्वर्गोद्देशेनैव ऐन्द्रदधिपयोयागयोः अनुष्ठीयमानत्वात् लक्षणे अव्याप्तिशङ्का तु जागर्ति । परमत्र स्वर्गोद्देशेन ततः पूर्वमेव अवान्तरकार्यमुत्पयपूर्वं



ISSN : 2320-740X

[redacted]

यदास्ति तत्तु भिन्नं भिन्नमेव। अतः अनेकापूर्वोद्देशेन यागः अनुष्ठीयत इति कृत्वा नैष दोषः। तस्मात् अनेकोद्देशेन सकृदष्ठानं तन्त्रमिति लक्षणं सिध्यति।

एतावता तन्त्रं निरूप्य प्रथमाधिकरणमारभ्यते। इदमधिकरणं उपोद्घातरूपं तन्त्रस्य। तत्र संशयः - दर्शपूणमासाभ्यां स्वर्गकामो यजेत इति दशपूर्णमासयागः स्वर्गोद्देशेन विधीयते। तत्र दर्शपूर्णमासयागयोः षड् प्रधानयागाः सन्ति। तत्र षड्भिरपि यागैः एकं फलमुत्पाद्यते वा उत षट् फलानि जायन्ते वेति विचारः। तत्र एकं फलं तर्हि एकः प्रयोगः सिध्यति। यदि पृथक् पृथक् षट् फलानि तर्हि एकैकस्य यागस्य एकैकः प्रयोगः स्यात्। पृथक् प्रयोगत्वे प्रयाजादीनामपि तन्त्रत्वं नास्ति। अनेकोद्देशस्य अभावात् सकृदनुष्ठानं न विद्यते इति। अतः षड्भिरपि यागैः एकं फलं वा उत भिन्नं भिन्नं वेति विनिर्णयः कर्त्तव्यः। तदा एव प्रयाजादीनामपि तन्त्रत्वनिर्णयः सिध्यति।

**<u>पूर्वपक्षः</u>** –

दर्शपूर्णमासगतषण्णामपि प्रधानयागानाम् उत्पतिवाक्यानि भिन्नानि सन्ति। उत्पत्तिविधौ विहिताः ये यागाः करणत्वेनैव विधीयन्ते। उत्पत्तिविधौ धात्वर्थस्य करणत्वेनैव अन्वयः। उत्पत्तिविधौ इष्टसामान्यं भावनायां भाव्यत्वेन अन्वेति। विधेयस्य यागस्य करणत्वेन अन्वयः। तत्र विधानकाले इष्टसामान्यं प्रति एकैकोऽपि यागः निरपेक्षतयैव साधनतया विधीयते। यदा अधिकारवाक्येन फलविशेषसम्बधः अवगम्यते दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति तदा दर्शपूर्णमाससंज्ञकाः पूर्वविहिताः सर्वेऽपि षड्यागाः अनूद्यन्ते। तर्हि तेषामनुवाद एव। अतः फलकरणत्वं सर्वेषां समानमिति कृत्वा प्रयेकं सर्वेषां फलसम्बधः वक्तव्य इति प्रयोगोऽपि पृथगेव भवति। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति यदि प्रयोगाविधिरङ्गीक्रियते तर्हि स एक एव इति एक एव प्रयोगः स्यादिति शङ्का जायेत कदाचित्। परं अनेन वाक्येन यागः नैव विधीयते। अनेन पलविशेषसम्बन्धमात्रं विधीयते। उत्पत्तिविधावेव प्रयोगः स्वीकर्तव्यः। उत्पत्तिवाक्यं भिन्नं भिन्नमिति प्रयोगविधिरपि यागस्य भिन्नं भिन्नं स्यात्। तदा एक प्रयोगाविधिपरिग्रहीतत्वाभावात् अङ्गानां तन्त्रस्य प्रसक्तिर्नास्ति।

यदि उत्पत्तिवाक्ये एव प्रयोगविधिः स्वीक्रियते तर्हि पौर्णमास्यां पौर्णमास्या यजेत अमावास्यायां अमावास्यया यजेत इत्येतद्वाकद्वयं वस्तुगत्या यागत्रयस्य एकैकास्मिन् काले प्रयोगविधानार्थमिति वक्तव्यम्। अतोऽत्र प्रयोगविधिर्वक्तव्यः। परं तु उत्पत्तिवाक्ये एव प्रयोगः स्वीकृतः इति एतद्वाक्यद्वयं व्यर्थं स्यात् इति शङ्का न कर्तव्या। आभ्यां वाक्याभ्यां एकस्यामेव पौर्णमास्यां एकस्यामेव अमावास्यायां त्रयाणामपि यागानामनुष्ठानं कर्तव्यमिति पृथक् प्रयोगतया अनुष्ठानं बोध्यते इति शंकायाः निरासो भवति। इदानीं सिद्धान्ते त्रयाणामपि यागानां एका एव इष्टिः। पूर्वोत्तरमेकः प्रयोगः वर्तते। अत्र तु एकं प्रयोगं समापय अपरः प्रयोग इति भेदः। तदा **पूर्वाह्णो वै देवानामिति** पूर्वाह्णकालः विहितः, पृथक् पृथक् प्रयोगे स च कालः नोपलभ्येत इति, चेत् अयं विधि सामान्यः। पौर्णमास्यां पौर्णमास्या यजेत इति विशेषविधिरिति



ISSN : 2320-740X

सामान्यविहित पूर्वाह्णादि कालस्य विशेषविधिना बाधे न कोऽपि दोषः अतः पृथक् पृथगेव प्रयोगः न तु तन्त्रेणेति प्राप्ते –

अभिधीयते-उत्पत्तिविधिना उत्पन्ना हि यागाः । फलविरोषानवगमात् तत्र विनियोगस्तु नैव सञ्जातः । उत्पत्तिविधौ किञ्चित् इष्टसामान्यमस्तीति कृत्वा ऊहितम् । उत्पत्तिवाक्ये विनियोगः न सञ्जातः इति कृत्वा तत्रापि फलोद्देशेन यागः एव विधेयः। यागाः फलोद्दशेन विनियोज्याः। अत्र एकैकस्यापि उत्पत्तिवाक्ये विनियोगो न सञ्जात इति कृत्वा फलोद्देशेन याग एव विधेयः। यदा यागानां विधेयत्वं निर्दिष्टं तदा एकेन यजिपदेनोपात्तत्वात् तेषां साहित्यं प्रतीयते । तादृशं सहित्यं विधेयगतमिति पश्वेकत्वन्यायेन विवक्षितं भवति। तर्हि मिलितैरेभिः षड्भिर्यागैः एकः स्वर्गः फलमिति बोधो भवति। यदा फलविशेषोद्देशेव विनियोगो जातः तदा प्रयोगविधिव्यापारः सम्भवति। षण्णामपि एकविशेषोद्देशेन विनियोगो जात इति कृत्वा षण्णामपि एक एव प्रयोगः कल्प्यत इति यागत्रयोद्दशेन प्रयाजादीनां तन्त्रत्वं सिध्यति।

एवं च सिद्धे तन्त्रत्वे इदं वक्तव्यं यत् पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायाम् अमावास्यया यजेत इति वाक्यद्वयेऽपि प्रयोगमस्वीकृत्य भिन्नभिन्नकाले एकैकस्य यागस्य अनुष्ठानवारणं पूर्वपक्षे, सिद्धान्ते तु एतत्रयं मिलित्वैव फलसाधनं भवति इति एकस्मिन्नेव काले त्रयाणामनुष्ठानप्रयोगः ताभ्यां वाक्याभ्यां विधीयत इति तन्त्रं सिध्यति।

सम्प्रति प्रयाजानूयाजादयः अनेके आरादुपकारकाः प्रकरणे विहिताः सन्ति । तेषां क्रतूपकाख्यफलं प्रति करणत्वे सिद्धे विकल्पेन करणत्वं वा समुच्चयेन वा इति सन्देहः उत्तिष्ठति। पूर्वेषां षण्णामपि प्रधानयागानां फलं प्रति मिलित्वा करणत्वं प्रोक्तम्, अत्र तु क्रतूपकाराख्यफले मिलितानां प्रयाजादीनां कारणत्वे प्रमाणाभावात् तथा वक्तुं न शकाते इति पूर्वपक्षः। यद्यपि प्रधानयागाः पृथक् पृथक् वाक्येन उत्पन्नाः सन्ति । परन्तु विनियोगे तेषां साहित्यमगम्यते इति कृत्वा दण्डचक्रादीनामिव एकस्मिन् फले तेषां समुच्चयो भवतु। अङ्गानां तु क्रतूपकाराख्यफले तृणारणमणिन्यायेन विकल्पेनैव कारणत्वम् । प्रयाजादीनां सहितानामेव विनियोगबोधकं प्रधानवत् किमपि वाक्यं न श्रूयते । उत्पात्तिविधावेव सः विनियोगः कल्पनीयः ततः प्रयोगोऽपि वक्तव्यः । उत्पत्तिविधिवाक्यानि तु प्रयाजानां भिन्नभिन्नानि भवन्ति । अतः तत्र विनियोगः प्रयोगश्च भिन्नभिन्नरूपेण कृर्तव्यः इति विकल्प एव युक्तः न तु
समुच्चयः। अपि च भूयसां करणे फलाधिक्यं भवतीति सम्भावयितुं शक्यते। अतः विकल्प एव युक्तः।

वस्तुतः प्रधानप्रयोगविधिना अङ्गप्रयोगः न विधीयते। परन्तु प्रत्येकमङ्गानाम् अप्राप्तविधिवाक्ये एव प्रयोगविधिः कल्प्यते। अतः तन्त्रत्वं न सिध्यति इति प्राप्ते-

प्रयाजाद्यङ्गवाक्यानां पृथक् पृथक् प्रयोजनाकांक्षा वर्तते इति तु उभयसामान्यम्। परं प्रधानस्य अनेन उपकारः कर्तव्यः इति तादृशस्य उपकारस्य सकृदेव उपकारापेक्षा वर्तते, यः प्रथममन्वेति तं स्वीकृत्य प्रधानः चरितार्थो भविष्याति। पुनः उपकारान्तरं नापेक्ष्यते। अतः खलेकपोतन्यायेन सम्बन्धः



ISSN : 2320-740X

वक्तव्यः । तस्मादिदानीमित्थं वक्तव्यं यथा - अङ्गवाक्येषु वर्तते यत् प्रयोजनाकांक्षा प्रधानवाक्ये च इतिकर्तव्यताकांक्षा च वर्तते एवमाकांक्षाद्वयेन युगपदेव प्रधानवाक्येन सम्बन्धः । तर्हि प्रकरणवशात् एकवाक्यता सञ्जाता। तेन च युगपत् ग्रहणात् साहित्यं लभ्यते । एकवाक्योपादानेन सर्वेषामेकफलनिरूपितं सहित्यमवगम्य इति मिलितानामेव क्रतूपकारजनकत्वम् - यथा षण्णां प्रधानयागानामेकफलव्यक्तिं प्रति मिलितानां कारणत्वं तथैव अङ्गानामपि मिलितानामेव क्रतूपकारजनकत्वमिति सिद्धं तन्त्रानुष्ठानम्।

**आकरग्रन्थाः**

1)भाट्टदीपिका (प्रभावली सहिता)

2)जैमिनिसूत्रम्

3)तै.ब्राह्मणम्।

************



ISSN : 2320-740X

## कृत्स्नप्रसक्त्यधिकरणम्

✍डा.श्रीकरः जी.एन्
संविदध्यापकः, वेदान्तविभागः

तत्र तावत् चतुर्लक्षण्यां द्वितीयाध्याये प्रथमपादे इदं कृत्स्नप्रसक्त्यधिकरणं विद्यते। पूर्वस्मिन् अधिकरणे 'उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि'(ब्र.सू.२/१/२४) इति सूत्रेण यथा क्षीरं स्वयमेव दधिरूपेण परिणमते तद्वत् ब्रह्मणः बाह्यं साधनं विना विचित्रशक्तियोगात् विचित्रपरिणाम उपपद्यत इत्युपपादितम्। अत्र पुनः आक्षिपति पूर्वपक्षी – "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् "(श्वे.उ.६/१९)"दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः "(मु.उ.२/१/२) इत्यादिश्रुतिषु ब्रह्मणः निरवयवत्वश्रवणात् कृत्स्नस्य तस्य कार्यरूपेण परिणामः प्राप्नोति। तथा च ब्रह्मणः अव्यतिरिक्तस्य कार्यस्य अयत्नदृष्टत्वात् 'आत्मा वा अरे द्रष्टव्यः' इत्यादिद्रष्टव्यतोपदेशानर्थक्यम्।। एकदेशपरिणामाभ्युपगमे च ब्रह्मणः सावयवत्वमनिष्टं प्रसज्यते। ब्रह्मणः सावयवत्वाभ्युपगमे च तस्य निरवयवत्वप्रतिपादकश्रुतीनाम् आनर्थक्यप्रसङ्गः। अपि च सावयवत्वे यत् सावयवं तदनित्यमिति न्यायेन ब्रह्मणः अनित्यत्वमायाति। तथा च पूर्वपक्षसूत्रम् – 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' (ब्र.सू.२/१/२६) इति। अतः चेतनमेकम् अद्वितीयं ब्रह्म क्षीरादिवत् विना बाह्यं साधनं स्वयं परिणममानं जगतः कारणमित्ययं पक्षः सर्वथा न घटत इति।

ब्रह्मपरिणमः दुर्घट इति यदुक्तं तदिष्टमेवेति विवर्तवादेन सिद्धान्तितम् – - 'श्रुतेस्तु शब्दमूलत्वात् ' (ब्र.सू २/१/२७) इति। कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः नास्ति, श्रुतेः इति। यथा – "सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि "(छा.उ.6/3/2) इत्यादिषु विकृतेन ब्रह्मणा जगदुत्पत्तिः श्रूयते। तथा "सता सोम्य तदा सम्पन्नो भवति " (छा.उ.6/8/1) इत्यादिषु विकारव्यतिरेकेणापि ब्रह्मणोऽवस्थानं श्रूयते। यदि कृत्स्नस्य ब्रह्मणः परिणामः भवति, तदा अविकृतस्य ब्रह्मणः अभावात् "सता सोम्य तदा सम्पन्नो भवति" इति सुषुप्तिगतं विशेषणमनुपपन्नं स्यात्। अतः अविकृतं ब्रह्म अस्त्येव।

कृत्स्नस्य ब्रह्मणः परिणामानङ्गीकारे तस्य निरवयवत्वप्रतिपादकश्रुतीनां विरोध इति न च वाच्यम्। शब्द मूलत्वात्। शब्दैकप्रमाणगम्यं ब्रह्म न प्रत्यक्षादिप्रमाणगोचरम्। शब्दश्च ब्रह्मणः अकृत्स्नप्रसक्तिं निरवयवत्वञ्च उभयमपि प्रतिपादयति। यदि लौकिकानामेव प्रत्यक्षादिसिद्धानां मणिमन्त्रौषधीनां शक्तयः तर्कागोचराः, तर्हि शब्दैकगम्यस्य ब्रह्मणः तर्कागोचरत्वं किमु वक्तव्यम्। तथा च पौराणिकानां वचनं यथा - 'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्। प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्॥' इति।

अत्र पुनः आक्षेपः - कथं निरवयवं ब्रह्म परिणमते कृत्स्नप्रसक्तिरपि नास्ति इति विरुद्धोऽर्थः शब्देन प्रतिपादयितुं शक्यते। निरवयवस्य परिणामः कृत्स्नस्यैव स्यात्। एकदेशपरिणामश्चेत् सावयवत्वं प्रसज्यते। यथा कर्मकाण्डे 'अतिरात्रे षोडशिनं गृह्णाति ' 'नातिरात्रे षोडशिनं गृह्णाति' इत्यादिषु विकल्पाश्रयणेन विरोधपरिहार इति चेत् न, 'अविद्याकल्पितरूपभेदाभ्युपगमात्। न ह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु संपद्यते।' इत्युक्तं भाष्ये। ब्रह्मणः परिणामादिसर्वव्यवहारः अविद्याकल्पितेन रूपभेदेन सम्भवति।



ISSN : 2320-740X

परमार्थतस्तु सर्वव्यवहाररहितं ब्रह्म निर्विकारमेवावतिष्ठते। अतः अत्र न कोऽपि दोषः। अपि च यथा लोके देवादिषु स्वरूपानुपमर्देनैव विचित्राः अश्वादिसृष्टयः दृश्यन्ते। तथा एकस्मिन् ब्रह्मणि स्वरूपनाशं विना अनेकाकारा सृष्टिः सम्भवति। "न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजते"। (बृ.उ.४/३/१०) इति श्रुतेः। तथा च सूत्रम् " आत्मनि चैवं विचित्राश्च हि" (ब्र.सू.२/१/२८) इति। अतः स्वयं परिणममानं ब्रह्म जगतः कारणमिति सिद्धम्।

अपि च ब्रह्मणः कृत्स्नपरिणामप्रसक्तिरिति यः दोषो आरोपितः सः सांख्यानां प्रधानपक्षेऽपि समान इति 'यश्चोभयोः समो दोषः' इति न्यायात् अस्मान् प्रति दोषः न उद्भावनीय इत्याह सूत्रकारः - 'स्वपक्षदोषाच्च'(ब्र.सू.२/१/२९) इति। साख्यैः अपरिच्छिन्नं निरवयवं शब्दादिहीनं प्रधानं परिच्छिन्नस्य सावयवस्य शब्दादिमतः जगतः कारणमिति अभ्युपगतम्। अतः प्रधानस्य निरवयवत्वे कृत्स्नप्रसक्तिः सावयवत्वे च निरवयवत्वाभ्युपगमविरोधः स्यात्। अत्र यदि साख्यैः प्रधानस्य निरवयवत्वं नाभ्युपगतं सत्त्वरजस्तमोगुणानां साम्यावस्था प्रधानम् अतः तैः गुणैः तत्सावयवत्वम्। तथा च प्रधानस्य एकदेशेन परिणामः एकदेशेन च अवस्थानमित्यङ्गीकारात् न कृत्स्नप्रसक्त्यादिदोष इति चेत् - न गुणानां समुदायस्य सावयवत्वेऽपि प्रत्येकं सत्त्वादीनां निरवयवत्वात् तेषां च कार्यरूपेण परिणामस्वीकारात् कृत्स्नपरिणामेऽभ्युपगमविरोधः एकदेशपरिणामे सावयवत्वापत्तिः। अतः प्राधानवादे दोषद्वयं दुर्वारमिति।

वैशेषिकानाम् अणुवादेऽपि प्रधानवादवद्दोषः समानः। तद्यथा - द्वाभ्यामणुभ्यां संयुज्यमानाभ्यां द्व्यणुकमारभ्यते त्रिभिः द्व्यणुकैः संयुक्तैः त्र्यणुकं संयुक्तैः त्र्यणुकैः चतुरणुकमित्यस्यां वैशेषिकानां प्रक्रियायाम् अणुरण्वन्तरेण संयुज्यमानः कात्स्न्र्येन वा संयुज्यते एकदेशेन वेति विकल्पे सति आद्ये एकस्मिन् परमाणौ परमाण्वन्तरस्य संयोगात् तत्कार्ये द्व्यणुके परमाणोरधिकपरिमाणाभावात्तस्यापि पारिमाण्डल्यत्वप्रसङ्गात् अणुत्वादिपरिमाणान्तराङ्गीकारविरोधः भवति। द्वितीये परमाण्वोः सावयवत्वप्रसङ्गः। तस्मात् दोषस्य समानत्वात् अन्यतरस्मिन् पक्षे न उपक्षेप्तव्यः भवति।

एवमत्र सिद्धान्तपरपक्षयोः दोषसाम्यम् आपाततः उक्तं चेदपि कार्यकारणभावस्य पारमार्थिकत्वमिच्छतामेव अयं दोषः न विवर्तवादिनां सिद्धान्तिनां कार्यकारणभावं कल्पितमिच्छताम् इति शम्।

*****



ISSN : 2320-740X

## विधिविचारः

डा. गणपति वि हेगडे
संविदाध्यापकः, अद्वैतवेदान्तविभागः

श्रीमद्भिः अप्पय्यदीक्षितवर्यैः "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[1] इत्यादिजिज्ञासाधिकरणवेदान्तवाक्येषु श्रूयमाणो विधिः कीदृश इति स्वीयसिद्धान्तलेशसङ्ग्रहे आदौ विचारितम् । दर्शनप्रपञ्चे तावत् अपूर्वविधिः नियमविधिः परिसङ्ख्याविधिश्चेति विधित्रयं प्रसिद्धम् । यथोक्तम् अप्पय्यदीक्षितवर्यैः – कथमप्यप्राप्तस्य प्राप्तिफलको विधिः, अपूर्वविधिरिति । यथा 'व्रीहीन् प्रोक्षति' इति विधायकशब्दप्रमाणं विना प्रोक्षणस्य संस्कारकर्मत्वं नावगम्यते इत्यतः अयम् अपूर्वविधिः । पक्षप्राप्तस्य अप्राप्तांशपरिपूरणफलको विधिः नियमविधिः । यथा 'व्रीहीनवहन्ति' इत्यत्र आक्षेपादवहननप्राप्तिः तथा लोकावगतनखविदलनादीनामपि पक्षप्राप्तिः । तदा अवहननरूपस्य अप्राप्तांशपरिपूरणफलको विधिः नियमविधिः ।

द्वयोः शेषिणोः एकस्य शेषस्य वा एकस्मिन् शेषिणि द्वयोः शेषयोर्वा नित्यप्राप्तौ शेष्यन्तरस्य शेषान्तरस्य वा निवृत्तिफलको विधिः परिसङ्ख्याविधिः । अथवा नित्यप्राप्तयोः अन्यतरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः । यथा 'पञ्च पञ्चनखा भक्ष्याः' इति । "इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते"[2] इत्यग्निचयनप्रकरणे प्राप्तयोः अश्वरशनाग्रहणगर्दभरशनाग्रहणयोः अन्यतरस्य गर्दभरशनाग्रहणस्य निवृत्तिफलको विधिः परिसङ्ख्याविधिः ।

**अपूर्वविधिपक्षः** - एवं प्रसिद्धेषु त्रिषु विधिषु श्रवणादौ अपूर्वविधिरिति प्रकटार्थकाराः अनुभूतिस्वरूपाचार्याः मन्यन्ते । कृतश्रवणस्य वेदान्तश्रवणसत्वेऽपि ब्रह्मसाक्षात्काराभावात् अन्वयव्यभिचारः । वामदेवस्य वेदान्तश्रवणाभावेऽपि ब्रह्मसाक्षात्कारसत्वात् व्यतिरेकव्यभिचारः । तथा च अन्वयव्यतिरेकयोः अभावात् वेदान्तश्रवणं ब्रह्मसाक्षात्कारं प्रति साधनमिति कथमपि केनापि प्रमाणान्तरेण अनधिगतत्वात् अपूर्वविधिरिति प्रकटार्थकारा आहुः । अत्र भाष्यकारसम्मतिं प्रदर्शयन्ति यथा - सहकार्यन्तरविध्यधिकरणभाष्ये[3] पाण्डित्यशब्दिते श्रवणे अपूर्वविधिरेव अङ्गीकृतः इति ।

**नियमविधिपक्षः** – विवरणानुयायिनस्तावत् नित्यापरोक्षब्रह्मसाक्षात्कारं प्रति वेदान्तश्रवणं हेतुरिति अवगतमेव तस्मात् नात्र अपूर्वविधिः किन्तु नियमविधिरित्याहुः । न च प्रागुक्तरीत्या अन्वयव्यतिरेकव्यभिचारसत्वात् अपूर्वविधिरिति वक्तव्यम् । सहकारिकारणाभावे

---

[1] बृ.उ.२-४-५

[2] तै.सं. ४-१-२

[3] ब्र. सू.भा ३-४-४७



ISSN : 2320-740X

अन्वयव्यतिरेकव्यभिचारस्य अदोषत्त्वात् । यथा कुलालः दण्डादीनाम् सत्वेऽपि अदृष्टकालादिसहकारिकारणाभावात् घटनिर्माणं कर्तुं न शक्नोति तथा कृतश्रवणस्य वेदान्तश्रवणसत्वेऽपि सहकारिकारणाभावात् अज्ञानरूपप्रतिबन्धकस्य सत्वाच्च ब्रह्मसाक्षात्कारो न जायते इति नान्वयव्यभिचारः। तथैव वामदेवस्य जन्मान्तरीयवेदान्तश्रवणसत्वात् साक्षात्कारप्राप्तिरिति न व्यतिरेकव्यभिचारः। श्रवणं नाम विचारः। विचारस्य विचार्यनिर्णयहेतुत्वसम्भवात् श्रवणं ब्रह्मसाक्षात्कारहेतुरिति प्राप्तम्। तस्मात् नात्र अपूर्वविधिः।

यथा घटसाक्षात्कारे चक्षुरिन्द्रियातिरिक्तस्पर्शेन्द्रियस्यापि कारणत्वं तथा ब्रह्मसाक्षात्कारे वेदान्तश्रवणातिरिक्तानां लिखितपाठस्वप्रयत्नादीनामपि कारणत्वप्रसक्तिः । तस्मात् पक्षप्राप्तांशाः लिखितपाठादयः, अप्राप्तांशः वेदान्तश्रवणं, तन्निरूपको विधिः नियमविधिरिति विवरणानुयायिनः सङ्गिरन्ते।

**परिसङ्ख्याविधिपक्षः**- वार्तिकवचनानुसारिणः केचन परिसङ्ख्याविधिम् अभ्युपगच्छन्ति। यथा चिकित्साज्ञानार्थं प्रवृत्तस्य चरकसुश्रुतादिश्रवणसम्भवात् व्यापारान्तरेऽपि प्रवृत्तिस्स्यात् तथा ब्रह्मज्ञानार्थं वेदान्तश्रवणे प्रवृत्तस्य मध्ये व्यापारान्तरेऽपि प्रवृत्तिस्स्यात् तन्निवृत्तिफलकः 'श्रोतव्यः' इति परिसङ्ख्याविधिः। तथा च वार्तिकम् –

नियमः परिसङ्ख्या वा विध्यर्थोऽत्र भवेद्यतः।
अनात्मादर्शनेनैव परमात्मानमुपास्महे॥ इति।

**विध्यभावपक्षः** – भामतीकारास्तु न कोऽपि विधिरित्याहुः। यथा मनननिदिध्यासनयोः आत्मा विषयः तथा श्रवणस्यापि आत्मा विषयः। श्रवणं नाम आगमाचार्योपदेशजन्यज्ञानमेव न तु तात्पर्यविचाररूपम्। तस्मात् न तत्र कोऽपि विधिः । यथा श्रवणादिविधौ भाष्यसंमतिर्दर्शिता तथैव विध्यभावपक्षोऽपि समन्वयाधिकरणभाष्यसम्मतः । तर्हि कथं विरुद्धपक्षद्वयं भाष्यसम्मतं स्यात् इति चेदुच्यते – विधिरस्तीतिवादिनां मते विध्यभावभाष्यम् अपूर्वविधिनिराकरणपरम् । विध्यभाववादिनां मते ब्रह्मज्ञाने विध्यभावपरं , न श्रवणादिविध्यभावपरम् इत्ययं विवेकः । अर्थात् ज्ञाने एव विधिः निराकृतः , न श्रवणादिविधौ इति फलितोऽर्थः।

अत एव समन्वयसूत्रे आत्मज्ञानविधिनिराकरणं कृत्वा भाष्यकाराः "किमर्थानि तर्हि आत्मा वा अरे द्रष्टव्यः' इत्यादीनि वचनानि विधिच्छायानि ? स्वाभाविकप्रवृत्तिविषयविमुखीकरणानीति ब्रूमः "[1] इत्याहुः। विध्यभाववादिनां मते विधिभाष्यं तु "विष्णुरुपांशु यष्टव्यः" इत्याद्यर्थवादस्यैव सतो वाक्यस्य प्रशंसाद्वारेण प्रवृत्यतिशयकरत्वरूपविधिसरूपत्वपरम् । यथा कश्चन एकः मुमुक्षुः श्रवणादीनि आत्मदर्शनसाधनानीति

[1] ब्र.सू.भा.१-१-४



ISSN : 2320-740X

ज्ञात्वापि बह्वायाससाध्यसन्यासब्रह्मचर्यादौ सोत्साहेन न प्रवर्तते किन्तु यथाप्राप्तवर्णाश्रमानुष्ठानं कृत्वा आत्मदर्शनमलभमानः तिष्ठति तं प्रति आत्मदर्शनश्रवणादिप्रशंसार्थं उच्यते "आत्मा वा अरे द्रष्टव्यः" इत्यादिविधिच्छायावचनानि । तदुक्तं भाष्यकारैः – "स्वाभाविकात् कार्यकरणसङ्घातप्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः" इत्यादीनि इति[1] ।

यदि श्रवणस्य फलं वेदान्ततात्पर्यविचारः तर्हि तात्पर्यनिर्णयद्वारा वेदान्ततात्पर्यभ्रमसंशयरूपप्रतिबन्धकनिरास एव फलम् न तु प्रतिबन्धकान्तरनिरासो ब्रह्मज्ञानं वा। वेदान्तश्रवणस्य प्रतिबन्धकनिरासरूपफलं तु लोकतः प्राप्तम् , अतः अत्र न कोऽपि विधिः ।

**परिसङ्ख्याविधिखण्डनम् –** श्रवणे प्रवृत्तस्य व्यापारान्तरनिवृत्यर्थं परिसङ्ख्याविधिरिति न च वाच्यम् । "ब्रह्मसंस्थोऽमृतत्वमेति"[2] "तमैवैकं जानथ अन्या वाचो विमुञ्चत"[3] "आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया" इत्यादिश्रुतिस्मृतिभ्यां सन्यासिभिः कर्तव्यस्य कर्मणः सिद्धत्वात् पुनः श्रोतव्यवाक्येन व्यापारान्तरस्य निवृत्युपदेश आनर्थक्यं भजते । तस्मात् सन्यासिनः व्यापारान्तरनिवृत्तेः श्रुत्यन्तरसिद्धत्वात् असन्यासिनः व्यापारान्तरनिवृत्यभावाच्च न परिसङ्ख्याविधिः ।

**नियमविधिखण्डनम्** – विचारविध्यभावेऽपि विचारविषयवेदान्ते नियमविधिर्भवतु लिखितप्रबन्धादीनां पक्षप्राप्तत्वात् अप्राप्तांशवेदान्तश्रवणबोधकत्वात् नियमविधिरिति यदुक्तं तन्न समीचीनम् । "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविधिना ब्रह्मज्ञानाय वेदार्थस्य एव ज्ञातव्यत्वात् भाषाप्रबन्धादीनां पक्षप्राप्तिरेव नास्तीति न नियमविधिः । किमर्थं तर्हि सहकार्यन्तरविध्यधिकरणभाष्ये विधिः स्वीकृत इति चेदुच्यते । विचारेण विचार्यस्य तात्पर्यनिर्णय इति लोकसिद्धत्वात् न कोऽपि विधिः । किन्तु विधिच्छायस्य अर्थवादस्येव प्रशंसाद्वारा प्रवृत्यतिशयकरत्वमात्रेण तत्र विधिरिति भाष्यकारैः व्यवहारः कृतः ।

*****

[1] ब्र.सू.भा.१-१-४
[2] छा.उ.२-२३-१
[3] मुं .उ. २,२.५



ISSN : 2320-740X

# महिमभट्टकाव्यलक्षणम्

✍डा. कोम्पेल्लि विनयकुमारः
संविदध्यापकः, साहित्यविभागः

किं तावत् काव्यमिति विचारचर्चायाम् अनेकानि काव्यलक्षणानि दृष्टिपथम् अवतरन्ति । परमद्यापि नैकमपि लक्षणं निर्दुष्टं सर्वसम्मतं वा । चिरं परम्परावाहिनि काव्यसंसारे लोकोत्तरवर्णननिपुणकर्म काव्यम् इति काव्यस्य सामान्यं स्वरूपम् । अलङ्कारशास्त्रग्रन्थेषु स्थितेषु विशेषलक्षणेषु कानिचन लक्षणानि शब्दमात्रगतानि, कानिचन शब्दर्थोभयगतानि सन्ति। तदनु महिमभट्टेन विरचिते व्यक्तिविवेकाख्ये काव्यालङ्कारे[1] स्थितस्य काव्यलक्षणस्यापि वर्तते किञ्चिद्वैशिष्ट्यम्। अयं व्यक्तिविवेकालङ्कारशास्त्रग्रन्थः मौलिकैः काव्यशास्त्रीयैः भाषाशास्त्रीयैश्च विचारैः सुसम्पन्नो भवति । ध्वनिप्रभेदानामनुमाने अन्तर्भावप्रकाशनमेव ग्रन्थस्यास्य मुख्यं प्रयोजनमस्तीति [2] एते मौलिकाः विचारा अत्र क्रमबद्धाः नोपलभ्यन्ते । परन्तु ध्वनिलक्षणाक्षेपे शब्दानौचित्यविचारे ध्वनेरनुमानेऽन्तर्भावोपदर्शने च तत्र तत्र इमे विचाराः क्रमरहिताः सन्ति । महिमभट्टस्य काव्यलक्षणविषयका विचाराः व्यक्तिविवेकेऽस्मिन्ग्रन्थे प्रस्तूयन्ते।

व्यक्तिविवेके प्रथमविमर्शे ध्वनिलक्षणे 'काव्यविशेषः' इत्यत्र विशेषशब्दोपादानं व्यर्थमिति प्रतिपादयितुं किं तावत् काव्यम् इति महिमभट्टः कथयति । तद्यथा – **कविव्यापारो हि विभावादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी काव्यमुच्यते** इति[3] । काव्यकौतुके भट्टतौतेनाप्युक्तं भवति **तस्य कर्म स्मृतं काव्यम्** इति कविशब्दसन्निधानेन चायं व्यापारः न सामान्यः अपि तु विभावादिघटनासु अभाव एव । तेन चायं नियमेन रसापेक्षी एव भवति[4] । विभावादिसंयोजनत्वेनैव शब्दर्थयोः काव्ये प्राधान्यम् । तेन न केवलेन शब्दार्थसंयोजनेन व्यापारेण कवित्वसिद्धिः परं विभावादिसंयोजनात्मना व्यापारेणैवेति निष्कर्षो जायते । विभावादिसंयोजनस्यापि परमं प्रयोजनम् अव्यभिचारेण रसाभिव्यक्तिः भवति । आनन्दवर्धनाचार्यमतेन तावत् वस्तुमात्रेण अलङ्कारादिना वा ध्वनिना काव्यत्वं कथञ्चित् वक्तुं शक्यते । महिमभट्टमतेन तु रसेन विना काव्यं कदापि न जायते । **काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद्विमतिः**[5] इति निःसन्देहं प्रख्यापयता महिभट्टेनैव अलङ्कारशास्त्रस्येतिहासे सर्वप्रथमं रसस्य सर्वाधिकं महत्वं प्रदाय काव्यलक्षणमुक्तम् । एतदेव काव्यलक्षणं महिमभट्टपरवर्तिना विश्वनाथकविराजेन साहित्यदर्पणे भङ्ग्यन्तरेण कथितम् [6] ।

अन्वयव्यतिरेकाभ्यां रसस्य काव्यात्मत्वं ग्रन्थे तत्र तत्र स्पष्टतया उपपादितं वर्तते । ध्वनिकारस्यापि एष एव सिद्धान्तः इष्टः स्यादिति महिमभट्टो वदति । तद्यथा – "काव्यमात्रस्य



[redacted]

ISSN : 2320-740X

ध्वनिव्यपदेशविषयत्वनेष्टत्वात् तस्य रसात्मकत्वोपगमात् इति। यत् स एवाह –

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः"**[7] ॥ इति।

व्यतिरेकेणापि रसस्य काव्यात्मत्वं महिमभट्टेन बहुत्र निरूपितमस्ति। तत्रैकत्र यथा- "अत एव च न गुणालङ्कारसंस्कृतशब्दार्थमात्रशरीरं काव्यम्....... तस्य रसात्मकताभावे मुख्यवृत्त्या काव्यव्यपदेश एव न स्यात् किमुत विशिष्टत्वम्"[8] इति।

महिमभट्टेन ध्वनिलक्षणे समुद्भावितानां दोषाणां परिहारानन्तरं निर्दुष्टं यल्लक्षणमुक्तं तदपि काव्यलक्षणमेवास्ति। तद्यथा – **वाच्यस्तदनुमितो वा यत्रार्थोऽर्थान्तरं प्रकाशयति।**
**सम्बन्धतः कुतश्चित् सा काव्यानुमितिरित्युक्ता**[9] **॥** इति।

रसाभिव्यक्त्यभिचारी कविव्यापारः काव्यम् इत्युक्तम्। अस्मिन् तावत् लक्षणे रसस्य नामापि न विद्यते। एतत् कथं सङ्गच्छते किं रसेन विनापि काव्यं महिमभट्टस्य सम्मतं वा? यदि पूर्वोक्तं लक्षणं सम्पूर्णं चेत् किमर्थमिदं नूतनं लक्षणमुक्तम्?

वस्तुतः विचार्यमाणे एतादृशसन्देहानाम् अवसर एव नास्ति। तथाहि लक्षणमिदं महिमभट्टेन ध्वनिलक्षणविचारप्रसङ्गे लिखितं वर्तते। आनन्दवर्धनेन यः ध्वनिसिद्धान्तः आविष्कृतः तस्य अनुमाने अन्तर्भावप्रकाशनमेव व्यक्तिविवेकस्य मुख्यं प्रयोजनं वर्तते। एतदर्थञ्चासौ ध्वनिलक्षणे दश दोषान् उद्भावयति। उद्भावितानाञ्चैतेषां दोषाणां परिहारेण निर्दुष्टं तल्लक्षणमेव अनेन अत्र प्रदर्शितम्।

महिभट्टमतानुसारेण वेदादिशास्त्रेभ्यः इतिहासपुराणादिभ्यश्च रसात्मकत्वमेव काव्यस्य व्यावर्तको धर्मः इति तदेव काव्यलक्षणमस्ति।

प्रयोजनमुखेन चिन्त्यते चेत् काव्यमपि शास्त्रमेव भवतीति महिमभट्टस्य अपूर्वः सिद्धान्तः। वेदादिशास्त्रस्य इतिहासपुराणादेः काव्यमात्रस्य किं बहुना सर्वस्यापि शब्दप्रयोगजातस्य विधिनिषेधविषयव्युत्पत्तिरेव फलं भवति।

असाधुशब्दानाम् अपशब्दानाञ्च स्वरूपनिरूपणप्रसङ्गे काव्यस्य शास्त्रत्वम् अनेन सुस्पष्टमुक्तं भवति। तद्यथा – "त्रिविधं हि शास्त्रं शब्दप्रधानम्, अर्थप्रधानम्, उभयप्रधानं चेति। तत्र शब्दप्रधानं वेदाध्ययनादेव अभ्युदयश्रवणात् मनागपि पाठविपर्यासे प्रत्यवायश्रवणाच्च। अर्थप्रधानम् इतिहासपुराणादीनाम् अर्थवादमात्ररूपत्वात्। उभयप्रधानं सर्गबन्धादि काव्यं तस्य रसात्मकत्वात् रसस्य चोभयौचित्येन परिपोषदर्शनात्। काव्यस्यापि शास्त्रत्वमुपपादितमेव"[10]। इति।

मम्मटादयस्तावत् काव्ये शब्दार्थयोः गुणभावमङ्गीकुर्वन्ति। तदुक्तं मम्मटेन – **शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यम्**......... [11] इति। परन्तु



ISSN : 2320-740X

महिमभट्टः काव्ये शब्दार्थयोः प्राधान्यम् अङ्गीकरोति । अत एवासौ शब्दार्थयोः अनौचित्यस्य सर्वथा परिहरणीयत्वमवदत् । ध्वन्यालोके अर्थानौचित्यानां प्रतिपादनमस्ति। परं शब्दानौचित्यस्य निरूपणं न दृश्यते । अतः महिमभट्टः व्यक्तिविवेकस्य द्वतीयविमर्शे शब्दानौचित्यप्रकाराणां विस्तरेण निरूपणमकरोत् । तदुक्तं तेन व्यक्तिविवेकस्य द्वितीये विमर्शे – "इह खलु द्विविधमनौचित्यमुक्तम् अर्थविषयं शब्दविषयञ्चेति । तत्र विभावानुभावव्यभिचारिणामयथायथं रसेषु यो विनियोगः तन्मात्रलक्षणम् एकमन्तरङ्गमाद्यैरेवोक्तमिति नेह प्रतन्यते" [12] इति ।

वेदेतिहासपुराणादिभ्यो यथा विधिनिषेधविषयव्युत्पत्तिर्जायते तथैव काव्यादपि इत्यतः काव्यस्यापि वेदेतिहासपुराणादितुल्यत्वम् ।

एवं त्रिविधमपि शास्त्रं विधिनिषेधविषयव्युत्पत्तिफलम्। रसानुभूतिश्च अन्याभ्यां शास्त्राभ्यां काव्यस्य व्यवच्छेदको धर्मः । आनन्दस्वरूपरसानुभूतेः सद्भावेन सुकुमारमतीनामस्मिन् प्रवृत्तिर्जायते ।

काव्यलक्षणविषये महिमभट्टसिद्धान्तस्य अयं निष्कर्षः । विधिनेषेधविषयव्युत्पत्तिफलमिति काव्यं त्रिविधेषु शास्त्रेषु अन्यतमं भवति । एतच्च काव्यं विभावादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी कवेः कर्म भवति । 'तस्य कर्म स्मृतं काव्यम्' इति प्राचीनानामपि वचनमस्ति । काव्यञ्च अभिनेयार्थम् अनभिनेयार्थम् इति द्विविधम्। तदुक्तम् –

**अनुभावविभावानां वर्णनं काव्यमुच्यते ।**
**तेषामेव प्रयोगस्तु नाट्यं गीतादिरञ्जितम्।।** इति ।

सुकुमारमतयः शास्त्रश्रवणादिविमुखाः सुखिनः राजपुत्रादयः काव्यस्य अधिकारिणः । ततोऽपि जडमतयः स्त्रीनृत्यातोद्यादिप्रसक्ताः नाट्यस्य अधिकारिणः । ध्वनिकारेण रसस्य प्राधान्यं स्वीकृतमपि वस्तुमात्रमलङ्काराः रसादयश्चेति त्रयाणामपि काव्यात्मत्वमुक्तम् । परं कुशाग्रीयधिषणाशालिना महिभट्टेन स्पष्टमुद्धोषितं यत् रसेन विना वस्तुमात्रस्य अलङ्काराणां वा सद्भावमात्रेण काव्यं न भवति इति । 'वाक्यं रसात्मकं काव्यम्' इति ब्रुवता विश्वनाथेन महिमभट्टस्यैव सिद्धान्तः स्वीकृतः ।

पादटिप्पण्यः

1. इति श्री राजानकमहिमभट्टविरचिते व्यक्तिविवेकाख्ये काव्यालङ्कारे ध्वनिलक्षणाक्षेपो नाम प्रथमो विशर्शः इत्यादि । व्यक्तिविवेकः – पृ.सं.1
2. व्यक्तिविवेकः – श्लो.सं.1
3. व्यक्तिविवेकः – पृ.सं.101
4. कविव्यापारश्च न सामान्येन किन्तु विभावादिघटनास्वभावः । अत एव नियमेन रसापेक्षी इति । व्यक्तिविवेकः – पृ.सं.101(रय्यकः व्याख्यायां स्पष्टयति)
5. व्यक्तिविवेकः – पृ.सं.111



ISSN : 2320-740X

6. वाक्यं रसात्मकं काव्यम् इति साहित्यदर्पणे विश्वनाथः ।
7. व्यक्तिविवेकः – पृ.सं.98
8. व्यक्तिविवेकः – पृ.सं.103
9. व्यक्तिविवेकः – पृ.सं.111
10. व्यक्तिविवेकः – पृ.सं.483
11. काव्यप्रकाशः वृत्तिः 1-2
12. व्यक्तिविवेकः – पृ.सं.179

*****



ISSN : 2320-740X

## विनापदसमभिव्याहृतद्वितीयाविभक्त्यर्थविचारः

✍डा. नवीनः आर्
संविदध्यापकः, न्यायविभागः

“दण्डं विना न घटः उत्पद्यते” “रासभं विनापि घटः उत्पद्यते” इत्यादौ विनापदार्थः अभाववान्। “दण्डं विना न घटः उत्पद्यते” इत्यादौ विनापदसमभिव्याहृतद्वितीयायाः अनुयोगित्वमर्थः। तस्य च विनापदार्थैकदेशे अभावे आश्रयतया अन्वयः। विनापदार्थस्याभाववतः धात्वर्थे उत्पत्तौ आधेयतासम्बन्धेनान्वयः।तथा च दण्डनिरूपितानुयोगिताश्रयाभाववद्वृत्त्युत्पत्तिकत्वाभाववान् घटः इति बोधः जायते। “रासभं विनापि घटः उत्पद्यते” इत्यादौ च रासभनिरूपितानुयोगिताश्रयाभाववद्वृत्त्युत्पत्ति-कत्वाश्रयः घटः इति बोधो जायते।

न च निपातार्थेन समं नामार्थस्य भेदेनान्वयस्य सम्भवात् निपाताख्यविनापदार्थेन समं नामार्थस्य दण्डस्य भेदेनान्वयः अस्तु। किं द्वितीयायाः अनुयोगित्वार्थकत्वेनेति वाच्यम्। विभक्तेः सम्भवति सार्थकत्वे निरर्थकत्वमनुचितमिति न्यायेन द्वितीयायाः अनुयोगित्वार्थकत्वे न किञ्चित्बाधकम्।

एवं “दण्डं विना न घटः” इत्यादौ दण्डाभाववन्निष्ठः घटाभावः इत्याकारकबोध - सम्भवात् घटाभावानुयोगितावच्छेदकत्वं दण्डाभावे भासते इत्युपगन्तव्यम्। अर्थात् दण्डाभावव्यापकत्वं घटाभावे भासते। यदि व्यापकत्वभानं नानुमन्यते तर्हि रासभं विना न घटोत्पत्तिः द्रव्ये न गन्धः इत्यादिप्रयोगापत्तिः। तथा हि रासभाभाववति क्वचित् घटोत्पत्त्यभावदर्शनात् द्रव्यत्ववति जलादौ गन्धाभावसम्भवाच्च “रासभं विना न घटोत्पत्तिः” “द्रव्ये न गन्धः” इत्यादिप्रयोगापत्तिः। एतादृशप्रयोगानां प्रामाणिकतावारणाय विनापदसमभिव्याहारस्थले व्यापकत्वभानमङ्गीकर्तव्यम्। तथा च निरुक्तस्थले घटोत्पत्त्यभावे रासभाभावव्यापकत्वविरहात् गन्धाभावे द्रव्यत्वव्यापकत्वविरहाश्चेति न तत्र रासभं विना न घटोत्पत्तिः द्रव्ये न गन्धः इत्यादिप्रयोगापत्तिः।

अथवा अभाव एव विनापदार्थः न तु अभाववानिति। “दण्डं विना न घटः” इत्यादौ विनापदसमभिव्याहृतद्वितीयायाः अनुयोगित्वमर्थः।तस्य च विनापदार्थाभावे आश्रयतया अन्वयः। तादृशदण्डाभावस्य प्रयोज्यतासम्बन्धेन घटाभावे अन्वयः। तथा च प्रयोज्यतासम्बन्धेन दण्डाभावविशिष्टः घटाभावः इत्यन्वयबोधः निरुक्तवाक्यात् जायते। रासभाभावप्रयोज्यतायाः घटोत्पत्त्यभावे विरहात् रासभं विना न घटोत्पत्तिरित्यादिप्रयोगस्य न प्रामाणिकता। यद्यत्र प्रयोज्यप्रयोजकभावभानं नोपगम्यते। तर्हि दण्डाभाववत्यपि प्रदेशे घटस्य सत्वात् घटोत्पत्त्यनन्तरं जायते इत्यस्याध्याहारं विना “दण्डं विना न घटः” इति प्रयोगोपपत्तिः न स्यात्। विनापदसमभिव्याहारस्थले प्रयोज्यप्रयोजकभावभानोपगमादेव दण्डाभाववति घटादेः वृत्तावपि जायते इत्यस्याध्याहारं विनैव दण्डं विना न घटः इति प्रयोगोपपत्तिः।



ISSN : 2320-740X

एवं विनापदस्य अभावार्थकत्वे दीधितिकृतामपि सम्मतिरस्ति। तथा हि तत्त्वचिन्तामणिदीधितौ अविनाभावो व्याप्तिः इत्यत्र साध्यं विना साध्याभाववति यो अभावः इति व्याख्यातम्। तत्र सप्तम्यन्तेन मतुपा संसर्गविधया भासमानं तदधिकरणनिष्ठत्वमेवोपात्तम्। न तु विनापदार्थत्वेन अधिकरणं, यदि साध्याभाववति इति व्याख्यायां अभावाधिकरणपर्यन्तं विनापदार्थः इति दीधितिकृतां सम्मतं स्यात् तर्हि मतुपा अपदार्थविवरणं कृतं स्यादिति आपद्येत। तथा च दीधितिकृतामपि विनापदस्य अभावार्थकत्वे निर्भर इति यावत्।न च विनापदोत्तरलुप्तसप्तम्यर्थ एव अभाववति इति सप्तम्या विवृत इति वाच्यम्। विनापदस्य निपातत्वात् निपातोत्तरविभक्तेः निरर्थकत्वात्। अत एव सर्वत्र निपातोत्तरं साधुत्वार्थं प्रथमैवेति शाब्दिकाः।

“विना वातं वृक्षः पतितः” इत्यादौ विनापदसमभिव्याहृतद्वितीयायाः अनुयोगित्वमर्थः। तस्य च विनापदार्थाभावे आश्रयतया अन्वयः। तस्य च अभावस्य आश्रयतया वृक्षे अन्वयः। तथा च वाताभावविशिष्टःवृक्षः पतनाश्रयाभिन्नः इति शाब्दबोधः।

“पुत्रं विना पिता गतः” इत्यादौ पुत्रपदस्य पुत्रगमने लक्षणा।पुत्रमित्यत्र द्वितीयायाः अनुयोगित्वमर्थः। तस्य च विनापदार्थाभावे आश्रयतया अन्वयः। तस्य च अभावस्य समानकालीनत्वसम्बन्धेन गतः इति पदघटकधात्वर्थे गमने अन्वयः। तथा च समानकालीनत्वसम्बन्धेन पुत्रगमनाभावविशिष्टगमनकर्त्रभिन्नः पिता इति शाब्दबोधः।

*****



ISSN : 2320-740X

[redacted]

## न्यायनये वृत्तिपदार्थविमर्शः

✍श्री.श्यामसुन्दरभट्टः
संविदाध्यापकः, न्यायविभागः

लोके हि प्रेक्षावतदनुभवसिद्धप्रत्यक्षानुमित्युपमितिशाब्दबोधाख्यचतुर्विधप्रमित्यनुरोधेन प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वारि प्रमाणान्यङ्गीकृतानि प्रमाणपटुभिर्नैयायिकैः, सूत्रितञ्च भगवता गौतमेन **'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'** इति (गो.न्या.सू.) । चतुर्विधप्रमासु प्रत्यक्षादिविलक्षणा शाब्दप्रमा च वृत्तिज्ञानसहकृतपदज्ञानेन पदार्थोपस्थितिद्वारा जायमाना तथोपस्थितपदार्थानां परस्परसंसर्गावगाहिनी प्रतीतिः । तत्र पदज्ञानं करणं, पदज्ञानजन्यपदार्थोपस्थितिः अवान्तरव्यापारः, वृत्तिज्ञानं सहकारिकारणम् इति विवेकः । तदुक्तम्-

**'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥' इति ॥ (का-८१ पृ सं २६५)**

शाब्दबोधे च वृत्या पदज्ञानजन्यैवपदार्थोपस्थितिः कारणं (व्यापारः) न तु यथाकथञ्चित् पदार्थोपस्थितिः । अन्यथा घटादिशब्दश्रवणात् समवायेन तदाश्रयस्य आकाशस्योपस्थितौ घटशब्दजन्यशाब्दबोधे आकाशस्यापि भानप्रसङ्गः । वृत्या तु घटादिशब्दात् आकाशस्य भानं न सम्भवतीति न दोषः । वृत्तिश्च शाब्दबोधहेतुभूतपदार्थस्मरणानुकूलः पदपदार्थयोः सम्बन्ध एव । सा च मुख्यवृत्तिः, जघन्यावृत्तिरितिद्विविधा । मुख्यावृत्तिरेव शक्तिः, अभिधा इति, जघन्यावृत्तिश्च लक्षणा भक्तिरिति चाभिधीयते । घटपटादिपदेभ्यः, पाणिन्याद्याधुनिकसङ्केतितनदी-वृध्यादिपदेभ्यश्च शाब्धबोधः तत्सङ्केतज्ञादेव भवितुमर्हति नान्यथेति सर्वानुभवसिद्धम् ।

स च सङ्केतो आधुनिकसङ्केतो नित्यसङ्केतश्चेति द्विविधः, आधुनिकसङ्केत एव परिभाषेत्युच्यते । तया चार्थबोधकं पदं पारिभाषकं यथा पाणिन्यादिसंकेतितं 'यूस्त्र्याख्यौ नदी', 'वृद्धिरेचि' इत्यादौ श्रूयमाणं नदी वृध्द्यादिपदम् । नित्यसङ्केतस्तु शक्तिरित्यपरपर्यायः **"अस्मात्पदात् अयमर्थो बोद्धव्यः"** इत्याकारकः अर्थविशेष्यकैतत्पदजन्यबोधविषयत्वप्रकारकः, **""इदं पदममुमर्थं बोधयतु""** इत्याकारक एतत्पदविशेष्यकैतदर्थविषयकबोधजनकत्वप्रकारको वा ईश्वरसङ्केत एव । विशेष्यतासम्बन्धेन तत्पदजन्यबोधविषयत्वप्रकारकेश्वरेच्छावत्वमेव तत्पदशक्यत्वम् । यथा **"घटः घटपदजन्यबोधविषयो भवतु"** इत्याकरकः ईश्वरसङ्केतः घटपदशक्तिः । विशेष्यतया तादृशसङ्केतवत्वात् घटः शक्यः, तद्वाचकं घटपदं च शक्तम् ।

**आक्षेपसमाधाने**


[redacted]
ISSN : 2320-740X

ननु तत्पदबोद्धव्यत्वप्रकारकेश्वरेच्छाविशेष्यत्वस्य तत्पदशक्यत्वे, एकस्याः एव ईश्वरेच्छायाः घटपटादिनिखिलजगद्विषयकत्वेन घटादिपदबोद्धव्यत्वप्रकारकेश्वरेच्छा विशेष्यत्वस्य पटादावपि सत्वात् पटादीनामपि घटादिपदशक्यत्वापत्तिः । अपि च तादृश शक्तेः पद-पदार्थसम्बन्धत्वमेव न घटते तस्याः द्विनिष्ठत्वादिरूपसम्बन्धस्वरूपत्वाभावात् । **"सम्बन्धो हि सम्बन्धिभ्यां भिन्नो द्विनिष्ठो विशिष्टबुद्धिनियामकश्च"** इति भाष्यवचनात् इति चेत् न |

ईश्वरेच्छायाः ऐक्येपि, न सा पटांशे घटपटबोधव्यत्वमवगाहते, किन्तु घटांशे एव अन्यथा तस्याः विसंवादित्वापत्तेः । तत्पदबोद्धव्यत्वनिष्ठप्रकारतानिरूपितभगवादिछीयविशेष्यतावत्वं एव तत्पदशक्यत्वम् । घटपदबोद्धव्यत्वनिष्ठप्रकारतानिरूपितत्वस्य पटवृत्तिभगवदिछीयविशेष्यतायां विरहान्न दोषः । अपि च यथा आधेयता-आधारता-तदुभयान्यतमस्वरूपाणां आधाराधेयभावादीनां, अभेदादीनां च द्विनिष्ठत्वाभावेऽपि सम्बन्धत्वं तथैवात्रापि निर्वाहात् । यथा वा आधारतादीनां स्वरूपेण आधारे, निरूपकतासम्बन्धेन चाधेये च वृत्तित्वं, तथा भगवदिच्छायाश्च विशेष्यतया अर्थे, परम्परया च पदेऽपि सत्वात् इति द्विनिष्ठत्वं सम्भवत्येव । वस्तुतः सम्बन्धस्य द्विनिष्ठत्वं नापेक्षितम् अपि तु द्विसम्बन्धित्वमेव । तदपि न सर्वत्र यतो हि द्विसम्बन्धित्वाभावेऽपि अभेदस्य सम्बन्धत्वस्वीकारात् । नापि विशिष्टबुद्धिनियामकत्वरूपं वा तत् । किं तत्र नियामकत्वं जनकत्वस्वरूपम् आहोस्वित् विषयत्वरूपम् । आद्ये परमाणुसंयोगे अव्याप्तेः, अतीन्द्रिययोः परमाण्वोः विशिष्टप्रत्यक्षासम्भवेन, अनुमित्यात्मकपरमाणुद्वयविशिष्टबुद्धिजनकत्वस्य संयोगे विरहात् । नापि विषयत्वरूपं तत्, तस्य वस्तुमात्रसाधारणत्वात् सर्वत्रातिव्याप्तेश्च । यदि विषयत्वं चात्र प्रकारतानिरूपितं विशेष्यताभिन्नविषयत्वं, तदा संयोगेन द्रव्यत्वप्रकारकभ्रममादाय संयोगस्य द्रव्यत्वसम्बन्धत्वापत्तेः । प्रमाम्न्तर्भाव्य विषयतानिर्वचने सति तेन सम्बन्धेन तद्वद्विशेष्यकत्वे सति तेन सम्बन्धेन तत्प्रकारकत्वरूप प्रमात्वस्य सम्बन्धत्वघटितत्वेन अन्योन्याश्रयप्रसङ्गः । अतः तस्य सम्बन्धत्वं तत्प्रतियोगिकत्वस्वरूपं, तस्मिन् सम्बन्धत्वं च तदनुयोगिकत्वस्वरूपं वाच्यम् । अत एवोक्तं भट्टाचार्यैः सिद्धान्तन्यप्तिलक्षणविचारावसरे **"दर्शितं च नियमाघटितं सम्बन्धत्वम्"** इति । ईश्वरेच्छायाम् अर्थानुयोगिकत्वस्य पदप्रतियोगिकत्वस्य च सत्त्वात्, न दोषः ।

अयमत्र विशेषः, ईश्वरसङ्केत एव शक्तिः, न तु ईश्वरज्ञानं, गौरवात् । ईश्वरसङ्केतस्य शक्तित्वेऽपि संकेतत्वेनैव तज्ज्ञानं कारणं, अनीश्वरवादिनां शाब्दबोधोदयात्, तथा च परिभाषाज्ञानसाधारणी शक्तिज्ञाननिष्ठकारणता, इति शक्तिज्ञानशाब्दबोधयोः नातिरिक्तकार्यकारणभावः । पाणिन्यादि सङ्केतितनदीवृध्द्यादिपदजन्यबोधस्थले आधुनिकसङ्केतात्मकपरिभाषाज्ञानकारणत्वस्य सर्वानुभवसिद्धत्वात् । ईश्वरज्ञानस्य शक्तित्वाङ्गीकारे, शाब्दबोधं प्रति शक्तिज्ञानस्यातिरिक्तं कारणत्वं कल्पनीयं, तत्कारणत्वस्याक्लृप्तत्वात् ।



ISSN : 2320-740X

ननु आधुनिकेच्छायाः इव आधुनिकज्ञानस्यापि परिभाषात्वम् अङ्गीक्रियते, तज्ज्ञानकारणत्वस्य नदीवृध्द्यादिपदज्ञानजन्यबोधस्थले क्लृप्तत्वात् । ईश्वरज्ञानात्मकशक्तिज्ञानस्यापि आधुनिकज्ञानरूप परिभाषाज्ञानसाधारणकारणत्वाङ्गीकारेण नातिरिक्तकारणत्वकल्पनमिति चेत् न, आधुनिक ज्ञानस्य परिभाषात्वं न सम्भवति । अन्यथा अस्मदादीनामपि "नदीवृध्द्यादिशब्दाः ईदूदन्तनित्यस्त्रीलिङ्गशब्दबोधकाः"इति ज्ञानसम्भवेन, तादृशार्थे नद्यादिशब्दाः अस्मदादिभिः परिभाषिताः इति व्यवहारस्य प्रामाणीकत्वापत्तेः । "ते च शब्दाः निरुक्तार्थे पाणिनिनैव परिभाषिताः" इत्येव प्रामाणिको व्यवहारः । एवं "घटशब्दो घटबोधकः" इति ज्ञानसम्भवेन वाचकानामपि घटादिशब्दानां परिभाषात्वापत्तिः । अतः आधुनिकज्ञानं न परिभाषा अपि तु आधुनिकसङ्केत एव । एवं ईश्वरज्ञानं न शक्तिः किन्तु ईश्वरसङ्केत एव, अन्यथा अतिरिक्तकार्यकारणभावकल्पनाप्रयुक्तगौरवात् ।

**लक्षणावृत्तिविचारः** –

जघन्या वृत्तिरेव "लक्षणा" इत्यभिधीयते । सा च शक्यार्थसम्बन्धरूपा । 'गङ्गायां घोषः' इत्यादि वाक्यात् "तीरवृत्तिर्घोषः" इत्याकारकः शाब्दबोधो जायते । तत्र तीरवाचकपदाभावेऽपि तस्य शाब्दबोधे प्रकारतया भानात् तद्वाक्यघटकगङ्गापदस्यैव तदर्थोपस्थापकत्वमङ्गीक्रियते गत्यन्तराभावात्, पदादनुपस्थापितस्यार्थस्य शाब्दबोधे संसर्गविधया भानसम्भवेऽपि प्रकार-विशेष्यविधया भानासम्भवाच्च । तथा च गङ्गापद-तीरयोः शाब्दबोधौपयिकतीरोपस्थितिप्रयोजकः कश्चन सम्बन्धो वक्तव्यः, पदज्ञानस्य "एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकम्" इति विधयैव पदार्थोपस्थापकत्वनियमात् । स च सम्बन्धः शक्यार्थसम्बन्धरूपः शाब्दबोधानुकूलपदार्थोपस्थितिप्रयोजकत्वेनाभिमतः, सैव लक्षणेत्युच्यते । 'गङ्गायां घोषः' इत्यत्र गङ्गापदस्य स्वशक्यार्थप्रवाहसामीप्यं लक्षणा । तया वृत्या गङ्गापदात् तीरस्योपस्थितिर्जायते, एकसम्बन्धिज्ञानविधया । अत्र गङ्गापदस्य बहुष्वर्थेषु सम्बन्धग्रहात् तेषां सर्वेषां उपस्थितिसम्भवेऽपि तच्छक्यार्थप्रवाहे घोषपदार्थान्वयानुपपत्त्यादिप्रतिसन्धाने सति लक्षणयोपस्थापिते तीरे प्रकरणादिना वक्तृतात्पर्यं अवधार्यते । ततः गङ्गापदात् तीरविषयकः शाब्दबोधो जायते ।

तात्पर्यानुपपत्तिरेव लक्षणाबीजं नत्वन्वयानुपपत्तिः, अन्यथा यष्टिधरबोधतात्पर्येण प्रयुक्ते 'यष्टीः प्रवेशय' इत्यादिवाक्यघटकयष्टिपदे लक्षणानुपपत्तेः, यष्टिषु प्रवेशान्वयानुपपत्तेरभावात् । किन्तु यष्टीनां प्रवेशे भोजनतात्पर्यानुपपत्या यष्टिपदस्य यष्टिधरेषु लक्षणा अङ्गीक्रियते । अत एवोक्तम् - "लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः" इति ।

सा च त्रिविधा – जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति । यस्मिन् लक्ष्यार्थविषयकशाब्दबोधे शक्यार्थस्याविषयत्वं तच्छाब्धप्रयोजिका लक्षणा जहल्लक्षणा (लक्ष्यतावच्छेदकरूपेण लक्ष्यार्थमात्रबोधप्रयोजिका लक्षणा) । यथा – "मञ्चाः क्रोशन्ति", "यष्टीः प्रवेशय" इत्यादौ मञ्चयष्टिपदयोः पुरुषत्वावच्छिन्ने लक्षणा ।



ISSN : 2320-740X

यत्र लक्ष्यार्थविषयकशाब्दबोधे वाच्यार्थस्यापि विषयत्वं तद्बोधप्रयोजिका अजहल्लक्षणा (लक्ष्यतावच्छेदकरूपेण लक्ष्य-शक्योभयार्थ बोधप्रयोजिका) । यथा – "छत्रिणो यान्ति" इत्यत्र छत्रपदस्य एकसार्थे (एकसंघे) लक्षणेति एकसार्थत्वेन छत्रि-अच्छत्रि उभयविषयको बोधः । 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र काकपदस्य दध्युपघातुकत्वावच्छिन्ने लक्षणा। तत्र तेन रूपेण काक-तदितरेषां शाब्दे भानं सम्भवति।

यत्र वाच्यार्थैकदेशपरित्यागेन एकदेशान्वयबोधः (शक्यतावच्छेदकपरित्यागेन व्यक्तिमात्रबोधः) तत्प्रयोजिका जहदजहल्लक्षणा । यथा ""तत्त्वमसि"" इत्यादौ सर्वज्ञत्वविशिष्टचैतन्यं तत्पदार्थः, अल्पज्ञत्वविशिष्टचैतन्यं त्वं पदार्थः । तत्र शक्यतावच्छेदक सर्वज्ञत्वाल्पज्ञत्वयोः परित्यागेन चैतन्ययोरभेदबोधो जायते।

वाक्ये तु शक्तेरभावात् शक्यसम्बन्धरूपलक्षणापि नाङ्गीक्रियते नैयायिकैः। "गभीरायां नद्यां घोषः" इत्यादौ विशेष्यवाचक नदीपदस्यैव गभीरनदीतीरे लक्षणा, गभीरपदं तात्पर्यग्राहकम् इति पदलक्षणयैवोपपत्तौ वाक्ये न लक्षणा । अत एव समासस्यापि शक्तिर्नाङ्गीक्रियते । तद्घटकपदेषुलक्षणास्वीकारणैव सर्वसामञ्जस्यात्।

**<u>व्यञ्जनायाः अतिरिक्त वृत्तित्वाभावः</u> -**

आलङ्कारिकास्तु व्यजनाख्यामातिरिक्तां वृत्तिमुररीकुर्वन्ति । व्यजना नाम तात्पर्यविषयातिरिक्तार्थबोधानुकूलः व्यापारविशेषः। शब्दैः प्राकरणिकार्थबोधानन्तरं तैरेवशब्दैः उत्पद्यमानः अप्राकरणिकार्थविषयकः शाब्दबोधः न शक्तिसाध्यः अपि तु व्यजनानिर्वाह्यः।

गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान्॥

इत्यादौ शक्त्या तत्तच्छब्दैः वाक्यार्थबोधानन्तरं 'इतस्तव गमने ममापि मरणं भविष्यति' इति अप्राकरणिकार्थबोधस्तु व्यञ्जनयैव निर्वाह्यः। एवं "गतोस्तमर्कः" इत्यादि वाक्यप्रयोगे कृते मानिनीं प्रति 'हठं मागाः' इति, ब्राह्मणान् प्रति सन्ध्या उपास्यताम् इति, वणिजः प्रति पण्यान्यपसार्यन्तामिति च बहूनां बहुविधार्थप्रत्ययो जायते । स च व्यजनावृत्यैव, न तु शक्त्या नापि लक्षणया । अतः व्यजनाख्या अतिरिक्तवृत्तिरप्यवश्यं स्वीकरणीया इति चेत् न,

व्यजनायाः शाब्दबोधानुकूलपदार्थोपस्थितिजनकज्ञानविषयीभूतपद-तदर्थसंबन्धत्वरूपवृत्तिलक्षणानाक्रान्तत्वात् । यतो हि शक्तिलक्षणान्यतरसम्बन्धज्ञानसहकारेण पदज्ञानात् यथा शाब्दानुकूल पदार्थोपस्थितिः जायते। तथा व्यञ्जनाज्ञानेन तादृशपदार्थोपस्थितिः न जायते। 'गच्छ गच्छसि चेत् कान्त' इत्यादौ तादृश बोधस्तु अनुमित्यात्मकः एव न शाब्दः। व्यञ्जनायाः अनुमानेन अन्यथा सिद्धत्वात्। इयं मद्गमनोत्तरकालिकप्राणवियोगवती विलक्षणशब्दप्रयोक्तृत्वात् मरणं विना पुनर्जन्मासम्भवाद् वा इत्याद्यनुमानेन मरणस्यानुमेयत्वाच्च । अतः अनुमानादिना व्यङ्ग्यार्थबोधस्य निर्वाहसम्भवात्



ISSN : 2320-740X

व्यञ्जनायाः अतिरिक्तवृत्तित्वकल्पनं नावश्यकम् । नानार्थकस्थलेऽपि शक्त्यादिना प्रकृतार्थकशाब्दबोधे जाते सति तदुत्तरं जायमानः अप्रकृतार्थ विषयकः चमत्कारजनकः प्रत्ययः मानससाक्षात्कार एव न तु शाब्दबोधः प्रमाणाभावात् । तथा च शाब्दबोधजनकपदार्थोपस्थित्यनुकूलपद-पदार्थसम्बन्धरूपा वृत्तिः शक्ति-लक्षणा भेदेन द्विविधैवेति न्यायसिद्धान्तः ।

*****



ISSN : 2320-740X

## श्रीपतेः प्रस्तुतिमाधुर्यम्

**डा. रामकृष्णपेजत्तायः**
संविदध्यापकः, ज्यौतिषविभागः

सार्धनवदशशतततमासन्ने (९५०) शकवर्षे लब्धसत्ताकः श्रीपतिनामा कश्चन गणकाग्रणीः ज्योतिषस्य त्रिष्वपि स्कन्धेषु प्रामाणिकान् ग्रन्थान् विरचय्य निजकीर्तिमाचन्द्रार्कस्थायिनीं चकारेति विदितमेव विपश्चिताम्। अनेन प्रणीतेषु ग्रन्थरत्नेषु सिद्धान्तशेखरो बहुभिः कारणैर्विशिष्टं गौरवादरादिकं भजते गणकप्रपञ्चे। गणकचक्रचूडामणिं ब्रह्मगुप्तमनुसृत्य लिखितोऽप्यसौ ग्रन्थः स्वोपज्ञैर्विषयविशेषैः कमनीयतमया प्रस्तुतिकलया च श्रीपतिना सुरुचिरः सर्वोपयुक्तश्च सम्पादयामासे। ग्रन्थेऽस्मिन्नयमंशो विशेषेण हृद्यो मान्यश्च भवति यत् सर्वस्याप्यध्यायस्य अवान्तरविषयस्य वा प्रस्तुतौ प्रतिपिपादयिषितं विषयमादौ सामान्यतः परिचाय्य पश्चात् तत्सम्बद्धायां प्रक्रियायामवतरतीति । इयं विषयावतरणरीतिरस्मान् नितरामाह्लादयति विषयान् सुललितमवगमयति आसक्तिं वर्धयति च। तत्र तत्र सदृष्टान्तं सोपमं च कथनमप्यस्यापरं वैशिष्ट्यम्। सर्वैरमीभिर्गुणैस्तदुक्ता विषयाः श्लोका वा चिराय हृदिस्था भवन्ति। सोऽयं गुणविशेषस्तत्पूर्वतनेषु ग्रन्थेषु नैवं गोचरीभवतीत्येतदप्यवश्यमवधेयम् । तदस्य प्रभावः पश्चाद्वर्तिनामपि, विशेषतो भास्कराचार्याणां ग्रन्थेष्ववलोक्यते। सोऽयं विषय इह सदृष्टान्तं प्रदर्श्यते।

कक्षाप्रकारेण ग्रहमध्यमानयनम् इत्थमुपस्थापयति श्रीपतिः –

**श्रीमदार्यभटजिष्णुनन्दनश्रीत्रिविक्रमसुतादिसूरिभिः।**
**सिद्धिरम्बरचरस्य कक्षया या कृताऽथ मयकाऽपि सोच्यते॥**[1] इति।

आर्यभटादिभिः पूर्वसूरिभिः कक्षया ग्रहस्य सिद्धिर्या कृता सा मयाप्युच्यते इत्यर्थः।

अथ स्पष्टाध्यायस्यारम्भे स्फुटीकरणस्य प्रयोजनं परिभाषां च कथयित्वाऽग्रे पदं निदधौ । तत्रारम्भवचनं यथा –

**विलोक्यते मध्यसमो भवृत्ते नभश्चरेन्द्रः प्रतिवासरं न।**
**यस्मादतः स्पष्टमिहाभिधास्ये मध्यस्य दृक्तुल्यकरं स्फुटत्वम्॥**[2] इति।

अस्यार्थः। ग्रहः प्रतिदिनं नक्षत्रचक्रे मध्यसम एव न विलोक्यते। अर्थात्, मध्यमाध्यायोक्त-गणितेन यद् ग्रहस्थानम् अस्माभिर्निर्णीयते तत्रैव ग्रहो न विलोक्यते गगने। कदाचित्तस्मादग्रे दृश्येत, कदाचित्तु पृष्ठतः । तस्मात् तद् ग्रहस्थानं मध्यममित्युच्यते । तस्य स्पष्टीकरणमिह वक्ष्ये इत्यर्थः । अथ किं नाम स्फुटीकरणमिति चेदुक्तं चरमपादेन 'मध्यस्य दृक्तुल्यकरं स्फुटत्वम्' इति । अस्यार्थः – मध्यमग्रहस्य

[1] सि.शे. २-५८
[2] सि.शे. ३-१



ISSN : 2320-740X

दृक्तुल्यताकरणं स्फुटीकरणमिति । एतदुक्तं भवति । मध्यमाध्यायोक्तगणितेन साधितो ग्रहो मध्यमग्रहः । यन्त्रवेधविधिना विद्धो ग्रहो राशिचक्रे यत्र दृश्यते स दृग्ग्रहो दृश्यग्रहो वा । दृग्ग्रहो वास्तविकः । स एव स्फुटग्रहः । मध्यमग्रहस्य स्फुटत्वमस्माभिर्गणितेन प्रापणीयम् । एवं ,च यासु गणितक्रियास्वनुष्ठितासु मध्यमग्रहो दृश्यग्रहतुल्यतां प्राप्नोति तद्गणितक्रियाकलापः स्फुटीकरणम् इत्युच्यते । अयमेवाशयस्तस्य चरमपादस्य ।

श्रीपतिवचनमिदं ब्रह्मगुप्तोक्तेरेव छन्दोऽन्तरेणानुवादः । तथा च ब्रह्मगुप्तोक्तिः –

**यस्मान्न मध्यतुल्यः प्रतिदिवसं दृश्यते ग्रहो भगणे ।**

**तस्माद् दृक्तुल्यकरं वक्ष्ये मध्यस्फुटीकरणम् ॥**[1] इति ।

एतदुभयमनुसरन्त एव भास्कराचार्याः –

**यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम् ।**

**स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृद्या ॥**[2] इत्यूचुः ।

ज्याकथनावसरे श्रीपतेरवतरणिका –

**स्नायुभिर्वपुरिवेह निबद्धं ज्याभिरेव निखिलं ग्रहकर्म ।**

**ता वदाम्यहमतः खलु सिद्धाः साधनं तु पुरतः कथयिष्ये ॥**[3] इति ।

अयमर्थः – यथा शरीरं स्नायुभिर्निबद्धं तद्वत् सर्वमपि ग्रहकर्म ज्याभिर्निबद्धम् । तस्माद्गणितेन सिद्धाः ता ज्याः कथयिष्यामि इति । ज्याविषयेऽग्रेऽपि षोडशेऽध्याये जगाद श्रीपतिः –

**अर्धज्याग्रे सन्निविष्टं ग्रहेन्द्रं कक्षावृत्तान्तःस्थितो वीक्षते हि ।**

**द्रष्टा यस्माज्ज्यादलैरेव तस्मात् कर्म प्रोक्तं न ह्यखण्डज्यकाभिः ॥**[4] इति ।

कक्षावृत्तान्तःस्थितो द्रष्टा अर्धज्याग्रे संस्थितं ग्रहं वीक्षते । तस्मादर्धज्याभिरेव सर्वं ग्रहगणितं साधनीयं न तु पूर्णज्याभिरित्यर्थः ।

एतमेवार्थमभिदधत् प्रायेणैतदाकारक एव श्लोको भास्करेणाप्युक्तः । तथा च तद्वाक्यम् –

**अर्धज्याग्रे खेचरो मध्यसूत्रात् तिर्यक्संस्थो जायते येन तेन ।**

**अर्धज्याभिः कर्म सर्वं ग्रहाणाम् अर्धज्यैव ज्याभिधानात्र वेद्या ॥**[5] इति ।

अथ चन्द्रग्रहणाध्यायस्यावतरणिका –

**प्रायेण कालावगतिः श्रुतिज्ञैः पर्वावबोधार्थमिह प्रदिष्टा ।**

[1] ब्रा.स्फु.सि. २-१

[2] सि.शि. २-१

[3] सि.शे. ३-२

[4] सि.शे. १६-१८

[5] सि.शि. २-२



ISSN : 2320-740X

**तद्वृत्तिरुक्ता ग्रहणे रवीन्द्वोर्व्यक्ते ततस्तद्ग्रहणे प्रवच्मि ॥**[1] इति।

अयमर्थः – वेदविद्भिः प्रायेण पर्वज्ञानार्थं कालज्ञानं निर्दिष्टम्। वेदोक्तकर्मानुष्ठानार्थम् आवश्यकः पूर्णिमावास्यादिः पर्वकालः । तेषां तथैव विहितत्वात् । तयोः पूर्णिमामावास्ययोर्वृत्तिः रवीन्द्वोर्ग्रहणकाले भवत्येव । तस्माद् ग्रहणस्य दृश्यत्वात् तत्सम्भवकालस्याप्यभिव्यक्तिः पूर्णरूपेण तस्मिन्काले भवति । ग्रहणेनास्माभिर्निर्णीतस्य पूर्णिमाऽमावास्यारूपकालस्यापि साधुत्वं परीक्षितुं शक्यमिति भावः । एवं च पर्वज्ञानात् कालज्ञानम्, कालज्ञानात् पर्वज्ञानं चेत्युभयविधोऽप्यर्थः सिद्ध्यति।

इदं श्रीपतिवचनं ब्रह्मगुप्तीयस्यैव छन्दोऽन्तरेण अनुवादः। तथा च ब्रह्मगुप्तः –

**कालज्ञानं प्रायः पर्वज्ञानार्थमिष्यते सद्भिः ।**
**शशिभास्करग्रहणयोस्तदभिव्यक्तिः स्फुटाभेदैः ॥**[2]

अथ पाताध्यायस्य अवतरणिका –

**भवनदलसमासे क्रान्तिसाम्ये रवीन्द्वोर्नियतमयनभेदे गोलयोर्दिक्समत्वे।**
**दिनमणिमणिनीलात् सोमसूर्याश्मयोगादपि दहन इवाशु स्याद्व्यतीपातनामा ॥**[3] इति।

अयमर्थः - सूर्यचन्द्रयोरयनभेदे गोलैकत्वे च, योगे षड्राशितुल्ये च उभयोः क्रान्त्योः साम्ये च सति चन्द्ररूपेण सूर्यप्रस्तरेण युक्तात् सूर्यरूपान्नीलमणेरग्निरिव व्यतीपातनामा योगो भवतीति। सोऽयं व्यतीपातः सर्वविनाशक इत्यर्थं व्यञ्जयितुं 'दिनमणिमणिनील'मित्याद्युपमानम् आख्यातमाचार्येण। शुभफलानि विशेषेण अतिपातयति नाशयति इति व्युत्पत्तिरप्येतमर्थं पुष्णाति।

अथ तत्रैव वैधृतं विवृणोति –

**अयनकृतसमत्वे गोलयोर्भिन्नदिक्त्वे दिनकरशशियोगे चक्रतुल्ये च जाते।**
**तदपमसमतायां मङ्गलोन्मूलनार्थं विषमिव मधुसर्पिःसाम्यतो वैधृतः स्यात् ॥**[4] इति।

अयमर्थः – रविचन्द्रयोरयनयोः समत्वे, गोलयोर्भिन्नदिक्त्वे च, योगे द्वादशराशितुल्ये च जाते, क्रान्त्योरपि समत्वे, मधुनः सर्पिषश्च तुल्यपरिमाणयोर्योगेन विषमिव, शुभकार्याणां विनाशाय वैधृतो योगविशेष उत्पद्यते इति।

अत्र प्रदर्शितमुपमानम् अत्यन्तं मनोज्ञम् । वस्तुतो मधु सर्पिश्चेत्युभयं पृथक् प्रशस्तमेव । परमनयोस्तुल्यपरिमाणयोर्योगो विषाय कल्पते । तद्वद् रविचन्द्रावुभौ पृथक् शुभावेव । परन्त्वनयोः क्रान्तिसाम्यरूपो योगो मङ्गलानां विनाशको भवति इति।

---

[1] सि.शे. ५-१
[2] ब्रा.स्फु.सि. ४-१
[3] सि.शे. ८-१
[4] सि.शे. ८-२



ISSN : 2320-740X

रविचन्द्रयोरयनभेदे गोलैकत्वे व्यतीपातः। तयोरेवायनैकत्वे गोलभेदे वैधृतश्चेति परिभाषा। अयमर्थः श्रीपतिना हृद्याभ्यां पद्याभ्यां सरसं निरूपितः।

अथ उदयास्ताध्यायस्योपक्रमं वीक्षामहे। तदाह –

**प्राक् खेचरार्कविवरप्रभवैर्यतोंऽशैः पश्चात् सहस्रकिरणद्युचरान्तरस्थैः।**

**तिग्मांशुसन्निधिवशात् स्युरदृश्यदृश्यास्तस्माद् ब्रवीम्यथ तदानयनं स्फुटार्थम्॥**[1] इति।

अयमर्थः – ग्रहास्तिग्मांशुसन्निधिवशाद् अदृश्यदृश्याः स्युः। तन्नाम, ग्रहा यदा रविसामीप्यं यान्ति तदा दिनकरप्रखरकरैस्तिरोहिताः कतिपयेषु दिनेष्वदृश्यतां प्राप्नुवन्ति। एवंविधत्वामापन्नास्ते पश्चाद् यदा रवितो दूरं यन्ति तदा रविकराच्छादनाद् विमुक्ता दृश्या भवन्ति। तत्र च पूर्वक्षितिजे यस्मिन् दिने ग्रहोदयानन्तरं कालांशघटीभिः सूर्योदयः तस्मिन्दिने स ग्रहो रात्रिशेषे दृश्यः अदृश्यश्च भवति। एवं यस्मिन् दिने पश्चिमक्षितिजे सूर्यास्तानन्तरं कालांशघटीभिर्ग्रहस्यास्तमयः तद्दिने सायंकाले ग्रहः अदृश्यो दृश्यश्च भवति। तस्मात् तदानयनं स्फुटतया कथयामि इति।

अथ चन्द्राध्यायस्यादौ –

**शापाद्यदीन्दोः सितवृद्धिहानी कथं तु जाते गणितावगम्ये।**

**ऊर्ध्वं यदीन्दू रवितस्तदाऽर्धमर्वाक्तनं हन्त सदैव शुक्लम्॥**[2] इति।

अयमर्थः – चन्द्रे यत् शौक्ल्यं तस्य वृद्धिर्हानिश्च यदि शापेन हेतुना भवतः तर्हि तयोर्गणितेन ज्ञानं कथं स्यात्? यदि चन्द्रो रवित उपर्येव स्यात्तर्हि तस्य पूर्वार्धं सर्वदापि शुक्लमेव भवेत्। इति।

चन्द्रशुक्लस्य हेतुं विवक्षुरादौ तत्र पौराणिकानां मतं प्रतिक्षिपत्यनेन श्लोकेन। पौराणिकास्तु दक्षश्चन्द्रमसं शशाप।[3] तेन तच्छौक्ल्यस्य वृद्धिहानित्वमित्याचक्षते। अथ च रवेरुपरि चन्द्रोऽस्तीत्यपि किञ्चन मतमस्ति। एतन्मतद्वयं खण्डयितुमारेभेऽदो वचनं श्रीपतिः। यदि शापेन शौक्ल्यवृद्धिहानी तर्हि तयोर्गणितेन ज्ञानमसम्भाव्यम्। यदि तु चन्द्रो रवेरुपरि स्थितस्तर्हि तस्य पूर्वार्धं सर्वदापि नृदृश्यं जायेत। एवं च चन्द्रशुक्लोपचयापचययोर्गणितावगम्यत्वात्, चन्द्रबिम्ब-पूर्वार्धस्य सर्वदापि शुक्लत्वं न भवतीत्यतश्च पुराणोक्तमेतन्मतद्वयं निरस्तमित्यर्थः।

अथ तत्र वास्तविकं हेतुं ज्ञापयितुकाम आह –

**धाम्ना धामनिधेरयं जलमयो धत्ते सुधादीधितिः**

**सद्यः कृत्तमृणालकन्दविशदच्छायां विवस्वद्दिशि।**

---

[1] सि.शे. ९-१

[2] सि.शे. १०-१

[3] दक्षप्रजापतेः सुताः सप्तविंशतिस्ताराः चन्द्रस्य भार्याः। परं चन्द्रो रोहिण्यामधिकं रमते स्म। तेन कुपितो दक्षश्चन्द्रस्य क्षयरोगः स्यादिति शशाप – इति पुराणकथा।



ISSN : 2320-740X

**हर्म्ये घर्मघृणेः करैर्घट इवान्यस्मिन् विभागे पुन-**

**बालाकुन्तलकालतां कलयति स्वस्यास्तनोश्छायया ॥**[1] इति।

अस्यार्थः – अयं जलमयश्चन्द्रमाः सूर्यकिरणेन सूर्याधिष्ठितदिशि तत्क्षणे एव लूनो बिसकन्द इव दृश्यते। अन्यस्यां दिशि तु निजमूर्तेश्छायया बालायाः कुन्तलानां यत् कार्ष्ण्यं तत्सदृशमेव कार्ष्ण्यं धारयति। यथा आतपस्थो घटो रविदिशि प्रकाशते, अन्यस्यां दिशि स्वच्छायया कार्ष्ण्यं विन्दति च तथैवेति।

उभाभ्यां श्लोकाभ्यामुक्तोऽर्थः श्रीपतिना ब्रह्मगुप्तात्स्वीकृतः। द्वितीयश्लोके तु लल्लो-ऽप्यस्यादर्शः। द्वितीयश्लोके प्रदर्शितो घटदृष्टान्त एव एतैः सर्वैरपि गृहीतः। परन्तु 'बालाकुन्तलकालतां कलयति' इति यदुपमितं तत्तु श्रीपतिकवित्वप्रभवम्। भास्करोऽप्यनेनाकृष्टः स्वीयपद्ये न्यवेशयत्। तथा चात्यन्तं प्रसिद्धस्तस्य वाकः –

**तरणिकिरणसङ्गादेष पीयूषपिण्डो**

**दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति।**

**तदितरदिशि बालाकुन्तलश्यामलश्री**

**र्घट इव निजमूर्तिच्छाययैवातपस्थः ॥**[2] इति।

अत्र भास्करोक्तौ वृत्तं शब्दाश्चाधिक्येन लल्लप्रभाविताः।[3] 'बालाकुन्तलश्यामलश्रीः' इति यदाह भास्करस्तत्रासौ श्रीपतेरधमर्ण इति स्फुटमेव।

एवमुक्तमर्थं पुनर्विशदीकुर्वन्नाह –

तरणिकिरणा अमलदर्पणे प्रतिफलिताः गृहाभ्यन्तरगतमन्धकारं यथा नाशयन्ति तथैव जलमये चन्द्रबिम्बे विमूर्च्छितास्ते तमस्विन्यास्तमो नाशयन्तिइति।[4]

अत्रापि दृष्टान्तान्तरेण पूर्वोक्तमर्थं विशदीचकार। वस्तुतस्त्वेतद् वराहमिहिरप्रभावितम्। तस्य नितान्तं प्रसिद्धस्य 'सलिलमये शशिनी'[5]त्यादिपद्यस्यैवानुवाद एषः। अथापि श्रीपतेः पद्यं लालित्यमयमिति विशेषः।

चन्द्रशुक्लस्य वृद्धिहान्योरुपपादनं तत्कृतं यथा – रवितलं त्यजतश्चन्द्रस्य शौक्ल्यं पश्चिमदिशि अवलम्बते। तथा चासौ प्रत्यहं निजगतिवशाद् यथा यथाग्रे याति तथा तथा तस्य शौक्ल्यस्योपचयो भवति इति।[6]

[1] सि.शे. १०-२

[2] सि.शि.गो. ९-१

[3] शि.धी.वृ. गोलाध्याये मध्यगतिवासना ३७

[4] सि.शे. १०-३

[5] बृ.सं. ४-२

[6] सि.शे. १०-४



ISSN : 2320-740X

अत्रापि कमनीयमस्य पदलालित्यम् । चन्द्रगतिवशात् जायमानस्यास्योपपादनार्थं 'रथोद्धता' स्वीकृतेत्यपि औचित्यमर्हति।

अथ शृङ्गोन्नतेर्गणितावगम्यतोपपादनं यथा –

यस्यां दिशि वर्तते विवस्वान् तत्र चन्द्रस्य शुक्लशृङ्गोन्नतिर्नूनमालोक्यते । पक्षान्तयोः पूर्णिमामावास्ययोस्तस्य कृत्स्नं शुक्लत्वं कृष्णत्वं च दृश्यत एव। अतः शृङ्गोन्नतिर्गणितावगम्येति।[1]

एवं सूर्यचन्द्रयोरन्तरं स्थानं चानुसृत्य क्रमिक उपचयोऽपचयश्च चन्द्रबिम्बे प्रत्यक्षोऽस्माकम् । तस्मादसौ शृङ्गोन्नतिर्नूनं गणितावगम्येति तदाशयः।

अथ व्यक्तगणिताध्यायस्यादौ –

**जानाति विंशतिमिमां परिकर्मणां यश्छायाष्टमीर्व्यवहृतीरपि मिश्रिताद्याम्।**
**व्यक्तं स वेत्ति गणितं गणितप्रवीणगोष्ठीषु वैष भजते गणकाग्रणीत्वम्॥**[2] इति।

अस्यार्थः – सङ्कलितपूर्विकामिमां परिकर्मणां विंशतिम्, मिश्रत आरभ्य छायापर्यन्तमष्टौ व्यवहारांश्च यो जानाति स व्यक्तं गणितं पाटीगणिताख्यं वेत्ति। स एव विद्वद्गोष्ठीषु गणकाग्रणीत्वं भजत इति।

एवम् अध्यायादावभिधाय पश्चात् तानि विंशतिं परिकर्माणि मिश्रादीन् अष्टौ व्यवहारांश्च निरूपयामास श्रीपतिः।

वस्तुतोऽसौ श्लोको ब्रह्मगुप्तोक्तिमनुसरति। तथा च ब्रह्मगुप्तः –

**परिकर्मविंशतिं यः सङ्कलिताद्यां पृथग् विजानाति।**
**अष्टौ च व्यवहारान् छायान्तान् भवति गणकः सः॥**[3] इति।

अथाव्यक्तगणिताध्यायस्यादौ -

**वस्वर्णकुट्टककृतिप्रकृतिप्रभेदानव्यक्तवर्णसदृशीकरणे च बीजे।**
**ते मध्यमाहरणभावितके च बुद्ध्वा निःसंशयं भवति दैवविदां गुरुत्वम्॥**[4] इति।

अस्यार्थः – धनर्णं कुट्टकं वर्गप्रकृतिश्चैषां सर्वान् प्रकारान्, एकवर्णसमीकरणम्, अनेकवर्णसमीकरणम्, मध्यमाहरणं भावितं च ज्ञात्वा कोऽपि दैवविदां गुरुत्वं प्राप्नोति इत्यर्थः । अत्रापि श्रीपतेः अध्यायविषयोपस्थापनरीतिः स्तुत्या।

अस्मिन्नेवाध्याये करणीपरिभाषामाह यथा –

**ग्राह्यं न मूलं खलु यस्य राशेस्तस्य प्रदिष्टं करणीति नाम।**

---

[1] सि.शे. १०-५
[2] सि.शे. १३-१
[3] ब्रा.स्फु.सि. १
[4] सि.शे. १४-१



[redacted]

ISSN : 2320-740X

**विभाजको वा गुणकोऽथवाऽस्या: कृतिर्निरुक्ता कृतिभि: करण्या: ॥**[1] इति ।

अस्यार्थः – यस्य राशेर्निरग्रं मूलं ग्रहीतुं न शक्यते तस्य करणीतिति नाम इति । युक्ता रम्या चासौ परिभाषोक्तिः । तत्रैव वर्गप्रकृतेः परिभाषा –

**कृतेर्गुणो यः प्रकृतिर्हि सोक्ता ।**[2] इति ।

अस्यार्थः – वर्गस्य यो गुणकः सैव प्रकृतिरिति कथिता । इति ।

अथ गोलाध्यायस्यादौ –

**उडुग्रहाणां भ्रमणं न तुल्यं सर्वत्र भूगोलनिवासिनां हि ।**
**तत्तत्त्वबोधावगतिस्तु गोलादत: स्फुटं गोलमिहाभिधास्ये ॥**[3] इति ।

अयमर्थः – भूगोलनिवासिनां सर्वत्र नक्षत्राणां ग्रहाणां च भ्रमणं समं न भवति । अस्य भ्रमणवैषम्यस्य यत्तत्त्वं तस्य ज्ञानं गोलज्ञानादेव भवति । अतो गोलं निःसंशयतया स्पष्टोक्तिभि-र्वक्ष्याम्यहमिति ।

अथ यन्त्राध्यायस्यादौ –

**शक्य: परिच्छेदविधिर्विधातुं यन्त्रैर्विना नो समयस्य तज्ज्ञै: ।**
**तेषां स्वयंवाहकपूर्वकाणामत: प्रवक्ष्ये खलु लक्षणानि ॥**[4] इति ।

अस्यार्थः – यन्त्रैर्विना ज्यौतिषिकैः समयः सूक्ष्मतया स्फुटतया च विज्ञातुं न शक्यः । तस्मात् स्वयंवाहकादीनि कालपरिच्छेदार्थं कल्पितानि यानि यन्त्राणि सन्ति तेषां लक्षणानि प्रवक्ष्य इत्यर्थः । अत्राप्यध्यायप्रयोजनमादावुपोद्घाततया प्रकीर्तितं श्रीपतिना । एवंविधं कथनं भास्करीयेऽपि दृश्यते –

**दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रै: ।**
**वक्ष्ये यन्त्राणि तत: स्फुटानि संक्षेपत: कतिचित् ॥**[5] इति ।

अथ प्रश्नाध्यायस्यादौ –

**प्रणम्य देवं द्युमणिं ग्रहेशं नि:शेषिताशेषतम:समूहम् ।**
**प्रश्नान् प्रवक्ष्ये विविधान् हितार्थं वृत्तैर्विचित्रैर्गणकोत्तमानाम् ।**[6] इति ।

- स्पष्टार्थ एव श्लोकः ।

इत्थं स्पष्टं विषयावतरणेऽध्यायोपक्रमे वा श्रीपतेः कौशलमन्यादृशमिति । तिक्तौषधं गुडलेपेनेति न्यायेन, दुरवगमा अप्यर्थाः सरलैर्दृष्टान्तैर्निरूपणकौशलेन वा सुबोधाः सञ्जायन्ते । तन्नैपुणी ग्रन्थस्य

---

[1] सि.शे. १४-७
[2] सि.शे. १४-३२
[3] सि.शे. १५-१
[4] सि शे. १९-१
[5] सि.शि.गो. १०-१
[6] सि.शे. २०-१



ISSN : 2320-740X

[redacted]

प्रणेतरि पाठयितरि वा यदि स्यात् स विशेषतः पुरस्क्रियते । अनेनापि हेतुनासौ श्रीपतिर्विशिष्यते । अत्र क्वचिद् ब्रह्मगुप्तस्यानुसरणं दृश्यत इत्यपि तत्तत्प्रसङ्गे दर्शितम् । न तेन कापि क्षतिः श्रीपतेर्वैशिष्ट्यस्य । यतो ब्रह्मगुप्तेन तथाऽकृतेष्वपि प्रसङ्गेषु श्रीपतिः श्रद्धया आत्ममार्गमनुससार, यश्च भास्करस्याप्यनुसार्यो बभूवेति प्रकटमेव । इत्थमनेनापि हेतुना श्रीपतिग्रन्थो वैशिष्ट्यं भजत इत्यलम् ।

*****



ISSN : 2320-740X

## हस्तलेखग्रन्थेषूपयुक्ताः लिपयः

✍डा. मुरलिकृष्ण टि.
संविदध्यापकः,ज्यौतिषविभागः

❍ **प्रस्तावना -** स्वभावाभिव्यक्तेः स्थिरीकरणाय पुरा अक्षरसङ्केताः सृष्टाः । अक्षरसङ्केतस्यैव अपरं नाम लिपिः । अक्षरसङ्केताः वा लिपयः सर्वा अपि सोद्देश्यं लोकव्यवहाराय मनुजनिर्मिताः एवेति आधुनिकाः प्राच्यपाश्चात्याः विपश्चिदः अभिप्रयन्ति । किन्तु भारतीयानां तावत्स्वपरम्पराप्राप्तः विश्वासोऽयं वर्वर्ति यत्परस्सहस्रं वर्षेभ्यः प्राक् लोकव्यवहाराय सृष्टिकर्ता ब्रह्मा काञ्चित् लिपिं ब्राह्मी इत्यभिधीयमानां ससर्जेति । आह्निकतत्वे ज्योतिस्तत्वे च यथोक्तम् –

**षाण्मासिके तु समये भ्रान्तिः सञ्जायते यतः ।**
**धात्राक्षराणि सृष्टानि पत्रारूढान्यतः पुरा ॥**

तथैव नारदस्मृतावपि –

**नाकरिष्यद्यदि ब्रह्म लिखितं चक्षुरुत्तमम् ।**
**तत्रेयमस्य लोकस्य नाभविष्यच्छुभा गतिः ॥**

❍ **लिपिः (Script) लिपिशास्त्रं (Paleography) च -** लिप्यते इति लिपिः । लिप उपदेहे इत्यस्माद्धातोः इकि च लिपिः, लेपः क्रियत इत्यर्थः । **लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ** इत्यमरः । अर्थात् लेखनं, लेपनम्, अक्षरविन्यासः, आलेखः इत्यर्थेषु लिपिरिति । आङ्ग्लभाषायामस्य पदस्य पर्यायः Script इति यस्यार्थः कर्षणं घर्षणमिति वा । तदा Script पदस्य संस्कृतपर्यायः भवति कृष्टम् इति । कृष विलेखने धातोः भावार्थे क्तप्रत्यये पदमिदम् उत्पद्यते । अक्षराणि केनचिद्वस्तुना लेपनेन कर्षणेन वा लिख्यन्ते । भूर्जपत्र-वस्त्र-चर्म-कर्गजादिषु मृद्वीषु सामग्रीषु लेपनेन लिप्यः लिप्यन्ते । शिलालेख-तालपत्रादिषु घनवस्तुषु कर्षणेन च लिप्यः उत्किरन्ति ।

प्राचीनलिपिविषयकं समग्रमध्ययनं यस्मिन् शास्त्रे क्रियते तदेव लिपिशास्त्रम् इत्युच्यते । आङ्ग्लभाषायाम् अस्य Palaeography / Paleography इति नाम । आङ्ग्लशब्दकोशानुसारेणास्य निर्वचनम् यथा –***Palaeography*** (*Palaeo* ~ Old, *Graphis* ~ write) is the study of ancient scripts to decipher (गूढलिपिलेखनं पठनञ्च) and understand the writings of the people of the past eras.

❍ **लिपीनामुद्भवकालः -** क्रि. पू. चतुर्थशतमाने ग्रीक् इतिहासविदौ नर्चस्-कर्टिसाख्यौ वृक्षत्वचि लिखन्तौ आस्तामिति पाश्चात्याः । पाणिनेः अष्टाध्याय्यां **यवनाल्लिप्याम्** इति सूत्रस्थाने यवनानी (ग्रीक्लिपिः)



ISSN : 2320-740X

इत्याख्यायाः लिप्याः उल्लेखः लभ्यते। यस्तु क्रि. पू चतुश्शततमे वर्षे ववृते। सम्राट् अशोकस्य कालादपि पूर्वं जैनानां पन्नवणासूत्रे ब्राह्म्या सह अष्टादशलिपयः स्मृताः। ललितविस्तराख्ये बौद्धग्रन्थे अपि लिपीनाम् उल्लेखः अस्ति। अशोकशासने लिपिः, लिबिः, डिपिः इति शब्दाः उपलभ्यन्ते। अशोकस्य कालः क्रिस्तोः पूर्वं तृतीयशतकम्।

❍ **हस्तलेखग्रन्थेषु प्राप्यमाणाः काश्चन प्रसिद्धाः लिपयः -** भारते मुद्रणयन्त्राणां प्राचुर्यात्प्रागेव संस्कृतभाषामयाः भूरिशः ग्रन्थाः हस्तेनैव लिख्यन्ते स्म। किन्तु तत्र लिपयस्तु प्रदेशानुगुणं लेखनसामग्रीसौकर्यानुगुणं विविधाश्च भवन्ति स्म। वस्तुतः ब्राह्मीलिपिः शिलालेखेष्वेव दरीदृशीति, न तु हस्तलेखग्रन्थेषु। अथापि सर्वासां लिपीनां जननी इयमित्यतः लेखेऽस्मिन् तस्याः परिचयः प्रदीयते। अत्र निरूपितासु लिपिषु शारदा नेवारी च उत्तरदेशेषु, नन्दिनागरी मध्य-दक्षिणदेशेषु, ग्रन्थः तिगलारी च दक्षिणदेशेषु हस्तलेखग्रन्थेषु प्रयुज्यन्ते स्म। यद्यपि बह्व्यः लिपयः हस्तलेखग्रन्थेषूपलभ्यन्ते अथापि प्रसिद्धानां कतिपयानां लिपीनामेव परिचयः कार्यते। यथा -

1. **ब्राह्मीलिपिः -** ईसवीयपूर्वं षष्ठ-पञ्चमशताब्दयोः (6 – 5 BCE) पूर्वमेव ब्राह्मीलिपिः भरतखण्डे प्रचारे अवर्तत इति मन्यन्ते। सम्राट् अशोकः (272-232 BCE) इमां लिपिं धम्मलिपिः (धर्मलिपिः) इत्याह। ललितविस्तराख्ये बौद्धग्रन्थे अस्य नाम बंभीलिपिः ब्राह्मीलिपिः इति वा निर्दिश्यते। 64 लिपिषु प्रथमस्थाने अस्याः लिप्याः नाम उल्लिखिता। अशोकात्पूर्वं प्रवर्तिते जैनमतस्थानां पन्नवणासूत्राख्ये ग्रन्थे अष्टादशसु लिपिषु बंभीलिपये (ब्राह्मीलिपये) प्रथमं स्थानम् उपकल्पितम्। सम्राडशोकः स्वीयान् आदेशान् सामान्यजनेषु प्रसारयितुं लेखान् ब्राह्मीलिप्यां लेखयामास। ईसवीयपूर्वं तृतीयशताब्दस्य (3rd BCE) मध्यकालं यावदियं सर्वत्र भरतखण्डे सिंहल(श्रीलङ्का)पर्यन्तं च प्रयुज्यते स्म। विशेषतः आभारते बौद्धधर्मस्य प्रचाराय प्रसाराय च इमां लिपिमाश्रित्य संस्कृतेन प्राकृतेन च भाषया शिलालेखान् लेखयति स्म। ब्राह्मीलिपिरियं व्यवस्थिता, विकसितवर्णमालामयी, उच्चारण-ध्वनि-अर्थानां परस्परं सम्बन्धेन परिपूर्णा च। प्राकृत-संस्कृतवर्णमालयोरभिव्यक्तये एव सर्वादौ सम्प्रयुक्ता इत्युच्यते। भारतीयाः सर्वाः लिपयः (औत्तराः शारदादयः वा दाक्षिणात्याः मलयालम्-तमिळ-तेलुगु-कन्नडलिपयः वा भवतु) ब्राह्मीलिप्या विकसिताः। अतः सर्वासां लिपीनां जननी इयं ब्राह्मी इति मन्यते।

   कश्चन कालः भारते आसीत् यथा प्राचीनाः लिपयः विस्मृताः अभूवन् इति इतिहासविदः कथयन्ति। भारते बहुत्र विद्यमानान् अशोकब्राह्मीशिलालेखान् सुस्पष्टं पठितुं क्रिस्तोः परं 1356 ईसवीतः क्रिस्तोः परं 1837 (क्रि. श. 1356-1837) पर्यन्तं कालेषु महान् यत्नः विहितः। किन्तु तत्पठितुं कोऽपि न शक्तवान्। फिरोज् शा तुग्लक् (क्रि. श. 1355-1388) तोप्रास्थानके (साम्प्रतं हर्याणस्थे) विद्यमानं ब्राह्म्या लिखितं शिलालेखम् उत्पाट्य दिल्लीमनैषीत्। तस्य पठने तदनीन्तनाः विद्वांसः विफलाः अभूवन्।



ISSN : 2320-740X

जेम्स् प्रिन्सेफाख्यः (क्रि. श. 1799-1840) क्रि. श. 1837तमे वर्षे अशोकशिलालेखान् पठित्वा ततः ब्राह्मी वर्णमालायाः सम्यक् अभिज्ञानमकरोत् । एषः पुरातत्वाधिकारी (Archeologist), कोल्कतस्थायाः एशियाटिक् सोसायिटी (Asiatic Society) इत्याख्यायाः संस्थायाः कार्यदर्शी (General Secretary) च आसीत्।

ब्राह्मीलिपिः वामतः दक्षिणपार्श्वे (Left to Right) लिख्यते। ब्राह्मीलिप्या लिखिताः हस्तलेखग्रन्थाः न वर्तन्ते। शिलालेखेषु बौद्धस्थूपेषु (साञ्चीस्थूपसदृशेषु) एव अधिकतया ब्राह्मीलिप्याः लेखनं दृश्यते। अस्याः लिप्या उत्पत्तिविषये विवदन्ते विद्वांसः। किन्तु परम्परया सश्रद्धम् उच्यते यदियं लिपिः ब्रह्मणा लोकव्यवहाराय सृष्टा इति। एवं ब्रह्मणा सृष्टत्वात् लिपिरियं ब्राह्मी।

2. **शारदालिपिः -** विद्याधिदेवता शारदा काश्मीरदेशवासिनी इति स्तूयते यथा - **नमस्ते शारदादेवी काश्मीरपुरवासिनी** । शारदादेशमिति काश्मीरस्य नामान्तरम् । शारदादेशस्य लिपिरित्यतः इयं शारदालिपिः । विद्यायाः प्रचाराय प्रसाराय च उपयुज्यमाना लिपिः शारदा इति वा मन्यन्ते लिपिशास्त्रवेत्तारः । मम्मट-रुद्रटाद्यालङ्कारिकाणां, प्रत्यभिज्ञादर्शनप्रवक्तुः उत्पलस्य च जन्म काश्मीरदेशे एव जातः । एवमेतादृशैः संस्कृतभाषायां लिखिताः विविधाः उद्ग्रन्थाः शारदालिप्यामेव सर्वादौ लिखिताः स्युरिति मन्वते लिपिशास्त्रज्ञाः।

ईसवीयपूर्वं द्वितीयशताब्दे (2 BCE) लेखनार्थं शारदालिपिः काश्मीरदेशेषु उपयुज्यते स्म इत्यत्र दृढं प्रमाणानि उपलभ्यन्ते । हस्तलेखग्रन्थाः सप्तदशशतकपर्यन्तमपि अस्यां लिप्यां लिख्यन्ते स्म । दशमशतकपर्यन्तं विविधानां शास्त्रग्रन्थानां प्रणेतृभिः लिपिकारैश्च अवश्यं शारदालिपिरध्येतव्या इति राजशासनमासीदिति श्रूयते।

शारादालिप्याः अक्षरविन्यासे ब्राह्मीलिप्या साक्षात्सम्बन्धः दृश्यते। काश्मीरदेशे देवनागरीलिप्याः प्रवेशकालं यावदियं लिपिः व्यवहारपथेऽवर्तत। गुरुमुखी, टाकरी, डोगरी, तिब्बती, जापानी, सिद्धा (बालीद्वीपे प्रसिद्धा) इत्यादीनां लिपीनां विन्यासस्याध्ययनेन ज्ञायते यदेताः लिपयः शारदालिप्या साक्षात्सम्बद्धाः अथवा शारदायाः प्रभावात् समुद्भताः इति।

शारदालिप्याम् आकारमात्रा समानाकारेण प्रयुज्यते । किन्तु 'जा' वर्णस्य (जकारे आकारमात्राप्रयोगे) लेखने विशिष्टः अक्षरविन्यासः दृश्यते। अतोऽत्र केचित् चवर्गे षडक्षराणि भवन्ति इति मन्यन्ते यथा – च, छ, ज, **जा**, झ, ञ। संयुक्ताक्षराणां लेखने त्रयोदशाक्षराणि विशिष्टं स्वरूपं प्राप्नुवन्ति।

3. **नेवारीलिपिः -** नेवा अथवा नेवारी शब्दः नेपालदेशे वसतां वर्गविशेषस्य वाचकः। एतैः प्रयुक्ता लिपिः नेवारीलिपिः इत्युच्यते । षष्ठे शतके प्रसिद्धायाः कुटिललिप्याः अनुसरणशीला एषा नेवारीलिपिः,



ISSN : 2320-740X

[redacted]

क्रिस्तोः परं नवमशतके (9 CE) स्वतन्त्ररूपेण प्रयोगपथे समागता। दशमे शतके एषा लिपिः पूर्णतया विकसिता। सम्प्रत्यपि एषा लिपिः प्रचलितनेवारी नाम्ना लेखने प्रयुज्यते।

नेवारी, रञ्जना, गोलमोल, भूजिमोल, पंचुमोल, कुंमोल, क्वेमोल, हिंमोल तथा तिलिमोल – एताः नवसङ्ख्यकाः नेपालदेशे प्रयुज्यमानाः लिपयः नेवारीलिप्याः परिवारीयाः एवेति मन्यते। प्रथमायाः नेवारीलिप्याः अक्षरविन्यासक्रमस्यैव रूपान्तरेणावशिष्टानां रञ्जनादीनामुत्पत्तिः। अतस्तेन नेवार्याः एव अष्टौ प्रभेदाः रञ्जनादयः इत्यपि केचित्पक्षः। किन्तु देवनागर्यक्षराणां साम्यं वहन्ती वर्तमाना नेवारी लिपिरेव अधिकतया हस्तलेखग्रन्थेषु प्रयुक्ता। सम्प्रति नेपालस्थे त्रिभुवनग्रन्थालये एतस्यां लिप्यां लिखिताः भूरिशः हस्तलेखग्रन्थाः प्राप्यन्ते।

4. **नन्दिनागरी -** वाकटकराजानां, राष्ट्रकूटानां च मूलस्थानं **नन्दिनागरम्** (सम्प्रति नान्देड नामकं स्थानम्)। स्थानेऽस्मिन् इयं लिपिः सर्वादौ प्रयुक्ता इत्यतः **नन्दिनागरी** इति विख्याता। प्राचीननागरलिपेः दक्षिणदेशीयः भेदः अस्ति नन्दिनागरीलिपिः। **नन्दिनागरकलिपि**ः इत्यपि संज्ञान्तरेण उच्यते। अन्यदपि कारणमुच्यते यथा - विजयनगरराज्ञां नन्दिरूपं लाञ्छनमासीत्। तल्लाञ्छनयुक्तैः राजभिः प्रयुक्ता देवनागरीलिपिः **नन्दि**नागरी इति वा उच्यते। विजयनगरराजानाम् अत्यन्तं प्रियतमा लिपिः इयम् आसीत्। एतैरेव शासनलिपित्वेन सम्पोषिता।

नन्दिनागरलिपिः सप्तमशताब्दे (7 CE) दृग्गोचरतां यातम् इति विमर्शकानां मतम्। सप्तमशतकतः आरभ्य षोडषशतकपर्यन्तं नन्दिनागर्या लिखिताः शिलालेखाः ताम्रशासनानि च प्राप्यन्ते। देवनागरी-नन्दिनागर्योः सत्यपि बहुभेदे, बहुष्वंशेषु देवनागरीवर्णसमाना एव। अस्यां लिप्यां लिखिताः भूरिशः हस्तलेखग्रन्थाः पूर्वान्ध्रभागे, कर्णाटकराज्यस्य दक्षिणोत्तरभागयोः, दक्षिणमहाराष्ट्रेषु, विदर्भप्रान्ते च प्राप्ताः। लेखनपरम्पराभेदात् शैलीभेदात् च केषाञ्चिदक्षराणां लेखने महान् भेदः दृश्यते। विदेशीयैः बर्नल् प्रभृतिभिः अन्वेषकैः लिपिरियं मलयाललिपिसमुद्भूतत्वेन निर्दिष्टा।

5. **ग्रन्थलिपि**ः **-** तमिळनाडुदेशीयानां मातृभाषालिपिः तमिळलिपिः। किन्तु संस्कृतग्रन्थानां लेखनाय अपेक्षितानि कतिपयानि व्यञ्जनाक्षराणि तमिळलिप्यां न सन्ति। अतः लिप्याम् अस्यां संस्कृतग्रन्थानां लेखनं दुश्शकम्। इयं लिपिः संस्कृतग्रन्थानां लेखनाय तद्देशीयैः (तमिळनाडुदेशीयैः) अन्विष्टा इत्युच्यते। अतः संस्कृत**ग्रन्थानां** लिपिः **ग्रन्थलिपि**ः।

पल्लवराजस्य महेन्द्रवर्मणः (600-630 CE) काले वा ततः किञ्चित्पूर्वं ग्रन्थलिपेः आविर्भावः इति मन्यन्ते। दक्षिणब्राह्मीलिपितः अथवा गुप्तब्राह्मीलिपितः वा पल्लवग्रन्थलिपिः समुत्पन्ना। दक्षिणदेशेषु विद्यमानासु मातृकाग्रन्थालयेष्वधिकतया अस्यां लिप्यां हस्तलेखग्रन्थाः प्राप्यन्ते। पञ्चलक्षाधिकाः मातृकाः (हस्तलेखग्रन्थाः) अस्यां लिप्यां सन्तीति सर्वेक्षकाणामभिप्रायः। जावा-सुमात्रा-काम्बोडिया-मलया-श्रीलङ्काप्रभृतिषु देशेषु पल्लवग्रन्थलिप्याम् उत्कीर्णाः शिलालेखाः प्राप्ताः।



ISSN : 2320-740X

तमिळनाडुस्थात् कुम्भकोणंनामकात् स्थानात् स्वरसहिताः वैदिकग्रन्थाः (ऋग्वेदसंहितादयः) अस्यां लिप्यां प्रकाश्यन्ते स्म। एवं न केवलं हस्तलेखेषु शिलालेखेषु च अस्याः लिप्याः प्रयोगः अपि च मुद्रणयन्त्रेऽपि अस्याः लिप्याः प्रयोगः जातः।

6. **तिगलारी -** अस्याः लिप्याः तुलुलिपिः इति नामान्तरम्। इयं लिपिः दर्शनेन मलयाललिपिसदृशी भासते। मलयाल-ग्रन्थ-तमिळलिपीनां सम्बन्धेन उत्पन्ना इयं लिपिः इति लिपिशास्त्रज्ञानामभिप्रायः। मलबारसमुद्रप्रान्ते संस्कृतग्रन्थानां लेखनाय अन्विष्टेयं लिपिः (केरलकर्णाटकयोः समुद्रप्रान्तभागस्य मलबार् इति नाम)। येयं लिपिः ग्रन्थलिपिरिव संस्कृतभाषायाः सर्वान् उच्चारणीयान् ध्वनिसङ्केतान् निर्देष्टुं समर्था, विकसितवर्णमालामयी च वर्तते। प्रायः अष्टमशताब्दतः इयं लिपिः प्रचारे अवर्तत। किन्तु सप्तदशशताब्दात् परं प्रचारात् निर्गता इत्यपि कथयन्ति तज्ज्ञाः।

कर्नाटकेषु - मैसूरुस्थे प्राच्यविद्यासंशोधनालये, शिवमोग्गस्थे केळदिसंशोधनविद्यालये; केरलेषु - एरनाकुलंस्थे सुकृतीन्द्रसंशोधनसंस्थाने – इत्येवं केरलकर्नाटकयोः स्थितेषु विविधेषु मातृकालयेष्वस्यां लिप्यां लिखिताः सर्वविधग्रन्थाः उपलभ्यन्ते।

❍ **उपसंहारः –** ब्राह्मीलिप्यारभ्य तिगलारीलिपिपर्यन्तमिह षण्णां लिपीनां वैशिष्ट्यं निरूपितम्। एताः एव लिपयः हस्तलेखेषु प्राप्यन्ते इति न। तदन्याः मोडी, टाकरी, गुरुमुखीत्याद्याः लिपयः हस्तलेखेषु प्रयुक्ताः। किन्तु इमाः लिपयः पूर्वोक्तानां लिपीनामपेक्षया न्यूनतया एव प्राप्यन्ते। एवमेव मलयाल-कन्नड-तेलुगु-ओडिया-बाङ्ग्लादिलिपिषु लिखिताः हस्तलेखा अपि प्राप्यन्ते। किन्तु एताः लिपयः सम्प्रत्यपि लेखनार्थमुपयुज्यन्त इत्यतः एतासां लिपीनां विचारोऽपि अत्र न कृतः। लिपीनामध्ययने कश्चित्परिश्रमं करोति तर्हि सः अवश्यं तत्तल्लिप्यां लिखितानाम् अप्रकाशितानां हस्तलेखग्रन्थानां पठने, पठित्वा प्रकाशने च शक्तः भविष्यति।

❍ **आकराः**


1. Murthy Shivaganesa R. S., **Introduction to Manuscriptology**, Sharada Publishing House, New Delhi, 1996
2. ओझा गौरी शंकर हीराचन्द्र, **प्राचीनभारतीय लिपिमाला**, मुन्शीराम मनोहर लाल, १९९३
3. मुले गुणाकर, **भारतीय लिपियों की कहानी**, राजकमल प्रकाशन, नई दिल्ली, २००४
4. Prof. Viroopaksha V Jaddipal, Dept. of Research & Publications, Rashtriya Sanskrit Vidyapeetha, Tirupati; - **various .ppt presentations and research**




ISSN : 2320-740X

**papers** (like १. मातृकाशास्त्रपरिचयः, २. पाण्डुलिपिविज्ञानम्, ३. Ancient as well as modern scripts: Regions & States)

5. Yadavalli Lakshmi Srikanth, **ग्रन्थाक्षरमाला**
6. Ex-Prof. Trilokinath Ganju, **शारदालिपिमाला**

*****



[redacted]

ISSN : 2320-740X

## स्त्रियाः पुंवदित्यादिसूत्रार्थविचारः

✍डा . प्रमोद भट्टः
अतिथ्युपन्यासकः, व्याकरणविभागः

**[सारांशः -** सप्तविधेषु सूत्रेषु इदं सूत्रं रूपातिदेशविधायकमस्ति । भाषितपुंस्कादनूङ् इति समस्तं पदम् । चित्रगुः, रूपवद्भार्यः इत्यादीनि सूत्रस्यास्य उदाहरणानि भवन्ति । केचित्तु मते चित्राजरतीगुः, जरतीचित्रागुः इति वा रूपम् । उत्तरपदं नाम **समासस्य चरमावयवे रूढम्** । पूर्वपदं नाम **समासस्याद्यवयवे रूढम्** । होतृपोतृनेष्टोद्गातारः इति **"आनङ् ऋतो द्वन्द्वे"** सूत्रे भाष्यप्रयोगात् समासचरमावयवस्यापि आनङ्ङादेशकृतत्वात् इदं केचित्तु मतमयुक्तमिति प्रतिपादनम् । जरती चासौ चित्रा च इति विग्रहे कर्मधारयसमासे पुंवद्भावे च कृते जरच्चित्रा इति जाते ततः गोशब्देन **"अनेकमन्यपदार्थे"** इत्यनेन बहुव्रीहिसमासे चित्रा इत्यस्य स्त्रियाः पुंवदित्यनेन पुंवद्भावे जरच्चित्रगुः इत्यपि रूपम् । एवमेव अस्य सूत्रस्य यानि प्रत्युदाहरणानि कौमुद्यादिषु प्रदर्शितानि तानि च अत्र लेखे यथामति प्रस्तूयते । **]**

"स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे श्त्रियाम् अपूरणीप्रियादिषु" इति इदं सूत्रं पाणिनीयाष्टके षष्ठाध्याये तृतीयपादे चतुस्त्रिंशत्तमं वर्तते ।

**कार्यरूपनिमित्तार्थशास्त्रतादात्म्यशब्दिताः ।**
**व्यपदेशश्च सप्तैतानतिदेशान् प्रचक्षते ॥ इति ॥**

सप्तविधेषु सूत्रेषु अतिदेशेषु रूपातिदेशविधायकं सूत्रमिदं वर्तते । भाषितपुंस्कादनूङ् इति समस्तं पदम् । भाषितः पुमान् येन तद्भाषितपुंस्कम्, तदस्यास्तीति **"अर्श आदिभ्यो अच्"** (5-2-12) इति सूत्रेण मत्वर्थीयः अच्प्रत्ययः । तस्मात् भाषितपुंस्कात् । ऊङः अभावः अनङ् । भाषितपुंस्कादनूङ् यस्याम् इति **"अनेकमन्यपदार्थे"** (2-2-24) इति सूत्रेण वहुव्रीहिसमासः । अत्र भाषितपुंस्कात् इति पञ्चम्याः अलुक् निपातनात् । तथैव भाषितपुंस्कादनूङ् इत्यत्र बहुव्रीहिसमासादुत्पन्नायाः षष्ठ्याश्च अपि निपातनादेव लुक् । स्त्रियाः इति षष्ठीविभक्त्येकवचनम् । पुंवदिति प्रथमाविक्त्येकवचनं विधीयमानम् । समानाधिकरणे इति सप्तमीविभक्त्येकवचनम् । स्त्रियामित्यपि । प्रियादिः एषां ते प्रियादयः, पूरणी च प्रियादयश्च पुरणीप्रियादयः, न पूरणीप्रियादयः अपुरणीप्रियादयः, तेषु अपुरणीप्रियादिषु इति, सप्तमीविभक्तिबहुवचनम् । **"अलुगुत्तरपदे" (6-3-1)** इति सूत्रादुत्तरपदे इत्यनुवर्तते । एवं च सूत्रार्थः **तुल्ये प्रवृत्तिनिमित्ते यद्भाषितपुंस्कं तस्मात्परः ऊङभावः यत्र तथा भूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे परे न तु पूरण्यां प्रियादौ च परतः इति फलति** । चित्रगुः, रूपवद्भार्यः इत्यादीनि सूत्रस्यास्योदाहरणानि भवन्ति । चित्राः गावः यस्य इति विग्रहे चित्रा जस् गो जस् इत्यवस्थायाम्



ISSN : 2320-740X

**"अनेकमन्यपदार्थे"** इति सूत्रेण समासे **"सुपो धातुप्रातिपदिकयोः" (2-4-71)** इति सत्रेण सुपः लुकि **"कृत्तद्धितसमासाश्च" (6-2-46)** इत्यनेन विशिष्टात् प्रातिपदिकसंज्ञायां चित्रा गो इति स्थिते अनेन सूत्रेण पुंवद्भावप्रवृत्तिः। अत्र चित्राशब्दः पुल्लिङ्गोऽप्यस्तीति भाषितपुंस्कः सः, समानाधिकरणे स्त्रीलिङ्गे गोशब्दे उत्तरपदे परे तस्य पुंवद्भावः । चित्रगो इति दाशायां **"गोस्त्रियोरुपसर्जनस्य" (1-2-48)** इति ह्रस्वे विभक्तिकार्यादिषु कृतेषु चित्रगुः इति रूपम्। एवमेव रूपवती भार्या यस्य सः इति विग्रहेऽपि दृष्टव्यम्।

चित्रा जरती गौः यस्य इति विग्रहे **"अनेकमन्यपदार्थे"** इति सूत्रेणैव बहूनां पदानां बहुव्रीहिः । अस्मिन्नुदाहरणे पुंवद्भावः कस्य इति संशयः । यतो हि उत्तरपदे परे पूर्वयोः द्वयोः पदयोः स्त्रीवाचकयोः सत्वात् संशयोत्पत्तिः।

केचित्तु अत्र एवं कथयन्ति चित्राजरतीगुः, जरतीचित्रागुः इति वा रूपम्। एवं दीर्घातन्वीजङ्घः, तन्वीदीर्घाजङ्घः इति च। पूर्वोक्तयोः लक्ष्ययोः त्रिपदो बहुव्रीहिः, स्त्रियाः पुंवदिति पुंवद्भावः विधीयते उत्तरदे परे। **उत्तरपदं नाम समासचरमावयवे रूढम्**। तच्च इह तृतीयपदमेव। **एवमेव पूर्वपदमित्युक्ते समासस्य प्रथमावयवे रूढम्** । पूर्वपदस्य मध्यमपदेन व्यवधानात् उत्तरपदपरकत्वाभावाच्च पुंवद्भावः न भवति । मध्यमपदस्यापि न पुंवद्भावः यतो हि उत्तरपदपरकत्वेऽपि पूर्वपदत्वाभावात् इति।

इदं केचित्तु इति मतं न युक्तम्। कुतः इति चेत् स्त्रियाः पुंवदिति सूत्र उत्तरपदे इत्यस्य सत्वेऽपि पूर्वपदं न आक्षिप्यते । अत्र सूत्रे उत्तरपदशब्दसत्वेऽपि पूर्वपदादिति अर्थात्सिध्यतीति न च वाच्यम्, **"आनङ्तो द्वन्द्वे" (6-3-25)** इत्यत्र इव पूर्वपदमित्यस्य इह नाश्रीयते । तथा च विद्यायोनिसबन्धवाचिनां द्वन्द्वे आनङ् विधीयते उत्तरपदे परे **"आनङ् ऋतो द्वन्द्वे"** इति सूत्रेण। होतृपोतृनेष्टोद्गातारः इति उदाहरणम्। होता च पोता च नेष्टा च उद्गाता च इति चतुर्णां **"चार्थे द्वन्द्वः" (2-2-29)** इति सूत्रेण द्वन्द्वसमासः होतृपोतृनेष्टोद्गातृ इति स्थिते **"समर्थः पदविधिः (2-1-1)** इति सूत्रभाष्ये उत्तरपदे परे उपान्त्यस्य आनङ् भाष्यकारैः कृतः। उपान्त्यशब्दः नेष्टृशब्दः वर्तते। तस्यानङि होतृपोतृनेष्टोद्गातारः इति रुपम्। एवं च पूर्वपदं आक्षेपेण न लभ्यते इति तु स्पष्टमेव। अनेन जरती चित्रा गौः यस्येति त्रिपदबहुव्रीहौ उत्तरपदे परे विधीयमानः पुंवद्भावः उपान्त्यस्य भवतीति चित्राजरद्गुः, जरतीचित्रगुर्वा इति रूपं सिध्यति। एवं च चित्राजरत्यौ गावौ यस्य इति द्वन्द्वगर्भे बहुव्रीहौ अपि चित्राजरद्गुः इति रूपं भाष्यसंमतं भवति। जरच्चित्रगुः इत्यत्र उभयत्रापि पुंवद्भावः । तथा हि जरती चासौ चित्रा च इति विग्रहे **"विशेषणं विशेष्येण बहुलम्" (2-1-57)** इति सूत्रेण कर्मधारयसमासः । पूर्वपदस्य जरतीशब्दस्य पुंवद्भावे जरच्चित्रा इति जाते ततः गोशब्देन **"अनेकमन्यपदार्थे"** इति बहुव्रीहिः, चित्राशब्दस्य स्त्रियाः पुंवदित्यनेन पुंवद्भावः।

कर्मधारयोत्तरपदे बहुव्रीहौ तु चित्राजरद्गवीकः इति रूपम् । तथा चाह जरती चासौ गौश्च इति कर्मधारये **"गोरतद्धितलुकि" (5-4-92)** इति टचि अवादेशे जरतीशब्दस्य **"पुंवत्कर्मधारयजातीयदेशीयेषु" (6-3-42)** इति पुंवद्भावे जरद्गव इति जाते टचः टित्त्वात् **"टिड्ढाणञ्"** इत्यादिना ङीपि जरद्गवी, ततः चित्रा



[redacted]

ISSN : 2320-740X

जरद्गवी यस्य इति बहुव्रीहौ **"नद्यृतश्च" (5-4-153)** इति कप्रत्यये चित्राशब्दस्य स्त्रियाः पुंवदित्यनेन पुंवत्वे चित्रजरद्गवीक इति रूपं सिध्यति।

अस्मिंश्च सूत्रे पुंवद्भावः स्त्रियाः भवतीत्युक्तत्वात् ग्रामणि (कुलम् ) दृष्टिः अस्य ग्रामणिदृष्टिः इत्यत्र ग्रामणिशब्दस्य नपुंसकलिङ्गस्य पुंवत्वं न भवति। अन्यथा ग्रामणि इति ह्रस्वेकारस्थाने दीर्घश्रवणापत्तिः। अपि च भाषितपुंस्कादित्युक्तेः गङ्गाभार्या: इत्यत्र गङ्गापदे न पुंवत्। गङ्गा भार्या यस्येति बहुव्रीहौ गङ्गापदं न भाषितपुंस्कं किन्तु स्त्रियामेव नियतम्। वामोरूभार्यः इत्यादौ ऊङन्तविषये पुंवद्भावनिवृत्तये अनूङ् इत्युक्तम्। अयं च पुंवद्भाव: समानाधिकरणविषय एव। अनेन कल्याण्या: माता कल्याणीमाता इत्यत्र पुंवद्भावः न। अत्र **"षष्ठी" (2-2-8)** इति सूत्रेण षष्ठीतत्पुरुषसमासः। अस्य पुंवद्भावस्य प्राप्तौ उत्तरपदमपि स्त्रीलिङ्गे एव स्यात्। अत एव समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे परे इत्येवार्थ: कौमुद्यां वर्णितः। तेन कल्याणी प्रधानं यस्य सः कल्याणीप्रधानः इत्यत्र पुंवत्वं नास्ति उत्तरपदे स्त्रीत्वं नास्ति इति हेतोः।

पूरणप्रत्ययान्ते प्रियादौ च परतः नायं पुंवद्भावः, अपूरणीप्रियादिषु इति निषेधात्। कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमाः रात्रयः। एवमेव कल्याणी प्रिया यस्य सः कल्याणीप्रियः। पूरणप्रत्ययान्ते परे विहितः अयं पुंवद्भावप्रतिषेधः प्रधानपूरण्यामेव भवति। तेन कल्याणपञ्चमीक: पक्ष: इत्यत्र पुंवद्भाव एव। ननु कल्याणीपञ्चमा: इत्यत्र बहुव्रीहित्वात् बहुव्रीहेः अन्यपदार्थप्रधानात् कथं वर्तिपदार्थस्य पूरणस्य प्राधान्यम्? इति चेदाहात्र पञ्चानां पूरणी रात्रिः वर्तिपदार्थः भवति इति तु युक्तमेव। किन्तु अन्यपदार्थसमुदायघटकतयापि सा स्वीक्रियत इति प्राधान्यमस्ति तस्य। अत्र उद्भूतावयवस्य रात्रिसमुदायस्य अन्यपदार्थत्वम्। तद्घटकाः यथा प्रथमा, द्वितीया , तृतीया, चतुर्थी इत्येवं चतस्रः रात्रयः तथैव पञ्चम्यपीति अन्यपदार्थे तस्याः प्रवेशात् प्राधान्यमस्त्येव इति निषेधः सिध्यति।

*****



ISSN : 2320-740X

[redacted]

## रसाभासः

✍डा. श्रीनिवासमूर्तिः
अतिथ्युपन्यासकः , साहित्यविभागः

'असत् सदिव' इत्याभासशब्दार्थः । अद्वैतसिधान्तानुसारं दृश्यमानमिदं चराचरजगत्सर्वम्  असदेव । एतन्मिथ्या इति वेदान्तिभिः बोधिता अपि वयं जगदिदं सत्यं शाश्वतमियेव मत्वा संसारे डोलायमानाः स्मः । यावल्लभ्यते तावत सुखमनुभवामः । अनिवार्यतया दुःखमपि अनुभावमः । प्रत्य क्षानुभूतम् एतत् सुखदुःद्वयं मिथ्येति, असदिति बोध्यते चेदपि ओमिति नाङ्कीकुर्मः । भ्रमस्यास्य कारणम् अस्माकं प्रत्यक्षानुभवः । अनेनैव आभासं सत्यत्वेन स्वीकुर्मः ।

काव्येष्वपि रसविषयिक  एतादृश आभासो  भवति । अभासोऽयं सर्वरसेषु भवितुमर्हति । किन्तु साहित्य शास्त्रग्रन्थेषु सर्वेबु रसाभसः श्रृङ्गारपरतयैव विवृणुतः ।

अन्योन्यानुरागरहिरतौ स्त्रीपुरूषौ आलम्बनत्वेन स्वीकृत्य लिखितेन काव्येन जायमानानन्दः श्रृङ्गारस्य आभासादेव न तु रसात् । तत्र एकत्रैवनुराग इत्युच्यते । द्वितीयः आभासः – म्लेच्छालम्बनान्वितः श्रृङ्गारः । म्लेच्छगत इत्युच्यते । पशुपक्ष्याद्यालंबनान्वितः श्रृङ्गाराभासः तिर्यग्गत इत्युच्यते ।

एकत्रैवानुरागाभासे – इव, म्लेच्छ – तिर्यग्गताभासयोरपि काव्यपठनवेलायां त्वभ्यमानानन्दः श्रृङ्गाराभास एवेति , न तु रसः इति सिद्धान्तः कृतः। अर्थात् यद्यपि तत्र रसस्थितिः नास्ति तथापि अस्तीतिवत् काव्ये भासात् तदाभास एव रसत्वेन अनुभूयत इति तात्पर्यम् ।

आभासनाम्ना अतिरस्कृत्य शास्त्रेणास्मै रससमानस्थानमेव प्रदत्तम् । अर्नौचित्यात् रसभङ्गापेक्षया अप्रवृत्तोऽपि प्रवर्तमान इव आनन्दप्रदो रसः श्रेष्ठतरः । अतः रसभङ्गमिव रसाभासं तुच्छत्वेन निराकर्तुं न शक्यते । एकत्रैवानुरागे स्त्रीपुरूषरूपोभयालम्बनयोः एकस्मिन् आलम्बने एव प्रीतिः भवति । द्वितीयालम्बने तद्विपरीतवैमुख्य रूपविरोधभावः भवति । साधारणतया उभयानिष्ठा प्रीतिरेव सामाजेकेवु रतिनामकं स्थायिभावं व्यकीकृत्य चरमदशायां श्रृङ्गाररसरूपानन्दं दातुं प्रभवति । यद्यपि एकनिष्ठा प्रीतिः श्रृङ्गाररूपेणानन्दं प्रदातुं न पारयति तथापि स्थायिनं अंकुरितं कर्तुं समर्थैव भवति । कविः तादृशम्  असंपूर्णम् आलम्बनं स्वीकृत्य, तद्दवारा स्थायिनः सहजशक्त्यपेक्षया अधिकशक्तिमापाद्य स्थायिनं प्रदीपयति । तस्मात् एतत् आभासो वा रसो वा इति परीक्षाम् अकृत्वैव सामजिकः आनन्दमनुभवति । एतदाभासं रसत्वेनैव प्रकाशयितुं कवेरसाधारणी प्रतिभा भवेत् ।

सिदि्धं प्राप्तुमवकाशरहितस्य रसस्य काव्ये अङ्गित्वेन प्रतिपादनं न सामञ्जस्यं भजत इति हेतोः यदा एतादृशं  एकत्रैवानुरागात्मिका कथा रचनीया भवति तदा महाकवयः एतदाभासरसं अङ्गं कृत्वा,



ISSN : 2320-740X

द्वितीयालम्बनगतभावं अङ्गिरसस्य स्थायिनं कृत्वा तस्य जयं प्रदर्शयन्ति । प्रबलं तद्विरोधभावं प्रतिद्यटयितुं रसाभासस्य कारणभूतः प्रथमभावः अत्युत्कटं विजृम्भणं प्राप्य सामाजिकेषु – अतिमात्राह्लादं जनयति । स एव रसत्वेनास्वाद्यते । प्रतिद्यटनरहिते स्थले उत्कटविश्रृंभणमेव न भवति । तद्विजृंभणमेव पराकष्ठां प्राप्तः रसपरिपोषः । तद्रसपरिपोष एव आभासरूपोऽनन्दजनकःकाव्यांशः ।

द्वितीयः म्लेच्छगतः । अत्र म्लेच्छशब्द अनागरकः, पामर इत्यर्थे ग्राह्यः । अनागरकत्वं पामरत्वञ्च कुलानुसारं, मतानुसारञ्च नागच्छतः । अतः अत्र म्लेच्छशब्दार्थः भरतोक्ताः नीयप्रकृतय इति । तादृशानां चित्तगतकामोद्रिक्तता तत्क्षणशरीरिकप्रृप्तिमेवाभिलषति ; निर्वेदादि व्यभिचारिभावोत्पत्तिपर्यन्तं, भावतीव्रतया जयमान सात्त्विकभावोत्पत्तिपर्यतञ्च आवश्यकं निग्रहं प्रदर्शयितुं न शक्नोति । तादृशनीचपात्राणि स्वीकृत्य कविः रसपरिपोषणं कर्तुं न शक्नोति । तथापि यावत्पर्यन्तं वर्ण्यते तावत्पर्यन्तं तेषां कामोद्रेक एव आनददायकः भवति ।

तिर्यग्गतोऽपि श्रृङ्गार आभासत्वेनैव गृह्यते । तत्र कारणं तिर्यञ्चोऽपि म्लेच्छपात्राणीव नीचप्रकृतय एवेति नास्ति । तिर्यक्षु उत्तमप्रकृतयः जीविनः न सन्तीति कथं वक्तुं शक्यते ?! तेषां भाषणशक्तिः नास्तीत्यतः, तेषां वाक्यैः – अस्मासु व्यक्तीभवनीय रसभावस्फुरणस्य, तत्परिपोषणस्य च अवकाशः न भवतीति हेतोः तिर्यञ्चः – आलम्बनत्वेन नोपादेया इति शास्त्रकारैः चिन्तितं स्यात् ।

तिरश्चः पुरस्कृत्य रसभावप्रधानानि काव्यानि लेखितुं न शक्यते । तथापि काव्यवर्णनेषु तेषां प्रवेशावकाशः यदा लश्यते तदा तेषां चेष्टाः वर्णयित्वा उद्दीपनविभावस्य पोषकत्वं कल्प्यते । तेषां चेष्टावर्णनं नितरां मनोहरं भवति । तत्र आभासः वा रसो वा – इति तर्कं विना परमानन्दः जायते । कालिदासस्य कुमारसम्भवे स्थाणुवने अकालमधुविजृंभणवर्णनसन्दर्भे तिर्यञ्च उपकारका अभवन् इत्यत्र सर्वेषामालङ्कारिकाणामङ्गीकारः दृश्यत एव ।

तिर्यग्गताः केचन भावाः मानवहृदयभावा इव परिपुष्टिं प्राप्य आनन्दप्रदा भवन्तीति भावनया केचन कवयः तिरश्चामपि वाकच्छक्तिं प्रकल्प्य, तैः भाषयित्वा, भावप्रपञ्चे सर्वेऽपि प्राणिनः समाना एवेति तात्त्विकसत्यम् उपादिशन् । चेष्टावर्णने पशुपक्ष्यादयः पशुपक्ष्यादिरूपेणैव दृश्यन्ते । मानवभाषापादनेन तिर्यञ्चः न केवलं मानवसदृशत्वेन दिव्यत्वेनापि च विभान्ति । पञ्चतन्त्रागतानि, गोव्याघ्रसंवादगतानि च पात्राणि-अत्र समीचीनोदाहरणानि । गोव्याघ्रसंवादे गोः वचनेषु धीरत्वं, पुत्रवात्सल्यञ्च गोगततिर्यग्भावनां नाशयित्वा, सर्वप्राणिसाधारणीं मातृमूर्तिभावनाम् अस्मासु जनयति । एतादृशस्थलेषु तिर्यग्गतभावोऽपि रसत्वेन-आनन्दं जनयति ।

यद्यपि प्रीतिः – उभयालम्बननिष्ठा भवति तथापि आलम्बनम् अनुचितं चेत् तत्र जायामानः – आनन्दः रसाभास एव न तु रसः – इति केषाञ्चन- आलङ्कारिकाणामभिप्रायः । परकीयासंयोगादिषु- अनुचितालम्बनत्वम् उभयनिष्ठं भवतीति सूचितम् ।



ISSN : 2320-740X

अत्र विचारणेन ज्ञायते यत् तत्र रसः नास्तीति न-इति । उचितालम्बनपुरस्कृतात् श्रृङ्गारादपि-अधिकतया-उत्कटरस एवास्ति । किन्तु तद्रसस्फुरणम् आलम्बनसंस्मरणमनुसरति चेत् तत् काव्यं न केवलं जुगुप्सात्मकम् अश्लीलमपि च भवति । अतः तादृशकाव्यैः पाठकेषु जायमाना जुगुप्सा एव आभा स इति तत्तदालङ्कारिकाणां तात्पर्यं स्यात्, न तु-असत् सदिव-इति ।

*****



ISSN : 2320-740X

## दार्शनिकप्रत्यक्षाधिगमः

✍ **डा. प्रमोद कुमार बुटोलिया**
अतिथ्यध्यापकः,शिक्षाशास्त्रविभागः

सुविदितमेव तत्र विदुषां यत् जन्मनः आरभ्य मानवस्य सर्वविधप्रवृत्तयः इन्द्रियाश्रिताः भवन्ति। अपि च ज्ञानार्जनेऽपि इन्द्रियाणां साहाय्यं नितरामपेक्षितम्। ज्ञानोत्पत्तौ च इन्द्रियजन्यसंयोगात् समुत्पन्नस्य प्रत्यक्षरूपज्ञानस्य प्राथम्यम् । इदञ्चानुमानादिप्रमाणमूलं प्रत्यक्षं सर्वेष्वपि प्रमाणेषु प्रप्रथमं स्थानं धत्ते । ज्ञानोत्पत्तौ प्रत्यक्षमिदं महदुपकारकं प्रमुखसाधनमिति अङ्गीक्रियते दार्शनिकैः । ज्ञानञ्च विविधैर्प्रमाणैः जायते। ज्ञानार्जनप्रक्रिया तु इन्द्रियं, पदार्थः, तयोः सन्निकर्षः, मनोयोगः, पदार्थप्रकाराः इति बहून् विषयान् अभिव्याप्य वर्तते। मनोविज्ञाने कीर्त्यमानः अधिगमः प्रमाणैरुत्पद्यमानं ज्ञानमेव। सः च अधिगमः शिक्षकः, अधिगन्ता, विषयः, पारस्परिकान्तःक्रिया इति विविधविषयावलम्बिनीं जटिलप्रक्रियाम् आश्रयते । एवम् उभयत्र प्रमाणैः एव ज्ञानम् अथवा अधिगमः जायते इति तु निर्विवादम्।

कुत्रचित् दर्शनेषु बुद्धिरपि ज्ञानत्वेनाभिधीयते। यथा न्याये-"बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्1"। वैशेषिके यथा - "बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः2" इति। यद्यप्येतानि महर्षभिः सूत्रितानि तथापि लोके तावत् 'बुद्धिमान्' इति प्रसिद्धस्य 'ज्ञानी' इति व्यवहारः न दृश्यते। 'बुद्धिमान्' इति पदं वस्तुविषयं ज्ञानवन्तं बोधयति 'ज्ञानी' इति पदं तु तत्त्वज्ञानवन्तमेव बोधयतीति। अतः सूक्ष्मेक्षिकया द्वयोरन्तरमस्त्येव। अतः सांख्येऽपि बुद्धिज्ञानयोः पर्यायत्वं नैवाङ्गीकृतम्। सांख्यमते महत्तत्वनाम्ना अन्तःकरणविशेषः यश्च सत्वरजस्तमोगुणरूपप्रकृतेः प्रथमपरिणामः सैव बुद्धिरिति। तस्याः बुद्धेः विषयाकारपरिणामः एव ज्ञानमित्युच्यते।

एवं दर्शनेषु सूक्ष्मतया ज्ञानविषयकचिन्तनं विहितमस्ति । प्रकृतकाले षड्दर्शनेषु निरूपितप्रत्यक्षप्रमाणस्यानुगुणा अधिगमप्रक्रिया निरूप्यते -

1. न्याये प्रत्यक्षाधिगमः - चक्षुरादिभिरिन्द्रियैः यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षमित्यभिधीयते। प्रत्यक्षं निरूपयन् महर्षिगौतमस्त्वाह - "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्3" इति।

अस्य लक्षणस्य घटकीभूतानि त्रीणि पदानि सन्ति -

(i) इन्द्रियाणि

(ii) अर्थाः

(iii) सन्निकर्षश्च।



ISSN : 2320-740X

[redacted]

अ) इन्द्रियाणि - इन्द्रियाणि द्विप्रकाराणि - ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि च। शरीरस्य ये अवयवाः क्रियाणामनुष्ठाने साधकाः भवन्ति तानि कर्मेन्द्रियशब्देनाभिधीयन्ते । ये चावयवाः ज्ञानवाप्तौ साधकानि भवन्ति तानि ज्ञानेन्द्रियशब्देनाभिधीयन्ते । तत्र चक्षुषा रूपस्य, रसनया रसस्य, घ्राणेन गन्धस्य, त्वचा स्पर्शस्य श्रोत्रेण च शब्दस्य ज्ञानं जायते ।

आ) अर्थाः - प्रत्यक्षज्ञानाय प्रत्यक्षविषयभूतानां वस्तूनामप्युपस्थितिरावश्यकीया भवति। प्रत्यक्षविषयं विना प्रत्यक्षज्ञानस्यासम्भवात् । अत एव ज्ञानेन्द्रियाणि यान् विषयान् विषयीकुर्वन्ति तान्येवार्थशब्देनाभिधीयन्ते। ते च प्रत्यक्षस्य विषयाः सन्ति - पृथिव्यप्तेजोवाय्वाकाशाख्यानि पञ्चद्रव्याणि। मुख्यरूपेण तु एतेषां द्रव्याणामेव प्रत्यक्षं भवति गौणरूपेण च तेषां गुणानां - रूपरसगन्धशब्दस्पर्शाख्यानां प्रत्यक्षं जायते।

इ) सन्निकर्षः - तत्र पदार्थानामिन्द्रियैस्साकं यो हि सम्बन्धो भवति स एव सन्निकर्ष इत्यभिधीयते । कस्यचन वस्तुनः प्रकाशे सर्वप्रथमम् आत्मनः मनसा सह संयोगो भवति । मन इन्द्रियेण सह संयुज्यते । इन्द्रियं च स्वविषयेण सह संयुक्तं सत् तं प्राप्यविषयं प्रकाशयति ।

सत्यपि इन्द्रियार्थसन्निकर्षे कदाचित् विषयाणां प्रत्यक्षो न भवति । यथा अध्ययने संलग्नस्य पुरुषस्य समक्षतः एव किमपि वस्तु आयाति चेदपि तस्य वस्तुनः उलब्धिर्नहि भवति । अत एव कस्यचनापि वस्तुनः साक्षात्कारे त्रीणि कार्याणि अपेक्षितानि -

(i) आत्मा मनसा संयुज्यते

(ii) मनः इन्द्रियेण संयुज्यते

(iii) इन्द्रियमर्थेन संयुज्यते । यदा अनया क्रियया इन्द्रियार्थयोः संयोग भवति तदैव कस्यचनापि वस्तुनः साक्षात्कारो भवति ।

एवमत्र जायमानायां ज्ञानप्रक्रियायां मन-आत्मा-इन्द्रियाणां प्रामुख्यं वरीवर्ति ।

2) वैशेषिके प्रत्यक्षाधिगमः - यद्यपि महर्षिकणादेन प्रत्यक्षलक्षणं नोक्तं, तथापि विषयान्तरनिरूपणसन्दर्भे प्रत्यक्षलक्षणमपि सूचितं तेन। तथा हि - "आत्मेन्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्[4]" इति । तत्र च इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमनुमानादन्यदिति वदन् सूत्रकारः इन्द्रियार्थसन्निकर्षजन्यज्ञानत्वं प्रत्यक्षमिति निरूपयति ।

भाष्यकारेण प्रशस्तपादेन ज्ञानं विद्या अविद्या चेति द्विधे इत्युक्तम् । अत्र यथार्थज्ञानरूपा विद्या चतुर्विधा - प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा इति । तत्र प्रत्यक्षं तावत् - "तत्राक्षमक्षं प्रतीत्योत्पद्यत इति प्रत्यक्षम् । अक्षाणीन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि षट्[5]" इति ।

नाम इन्द्रियजन्यं विद्यारूपं ज्ञानं प्रत्यक्षमिति भाष्यकारस्याशयः । किञ्च अनेन संशयविपर्ययोश्च अविद्याप्रभेदभूतयोः विद्यारूपत्वं नास्ति इति सिद्ध्यति।



ISSN : 2320-740X

3) सांख्ययोगे प्रत्यक्षाधिगमः - सांख्ये तावत् इन्द्रियैः वस्तुना सह सम्बन्धोत्तरं प्रथमं केवलं वस्तुविषयकं ज्ञानमेवोत्पद्यते, तत् निर्विकल्पकज्ञानम्। तदनन्तरमेव तस्य वस्तुनः नामरूपजात्यादिभिः सविकल्पकं ज्ञानं जायते । निर्विकल्पकसविकल्पकरूपं द्विविधमप्यैन्द्रियकं ज्ञानमालोचनसंज्ञकमित्यत्र । इन्द्रियाणि बाह्याभ्यन्तरभेदात् द्विविधानि । द्वयोर्बाह्याभ्यन्तरयोर्मध्ये बुद्धिरेव प्रधानम्[6] । यथा भृत्यवर्गेषु कश्चिदेव व्यक्तिविशेषः प्रधानः, अन्ये च ग्रामाध्यक्षादयः तदुपसर्जनीभूताः । तद्वत् चक्षुरादिभिः इन्द्रियाणि सर्वान् विषयान् बुद्धये प्रयच्छन्ति। बुद्धिश्च तं विषयं निश्चयपूर्वकमवधारयति।

महर्षिकपिलेन प्रत्यक्षं तत्तद्वस्त्वाकारमिति निरूपितम् - "यत्सम्बन्धसिद्धं तदाकारोल्लेखि विज्ञानं तत्प्रत्यक्षम्[7]" इति । नाम प्रत्यक्षमिति बुद्धिवृत्तिः वस्तुसामीप्यात् तद्वस्त्वाकारमेव प्राप्नोति । तदाकारविशिष्टा सा बुद्धिवृत्तिः न तादृशवस्तुनः संयोगाज्जायते, अपि तु तद्वृत्तिना तेन तस्याः अवस्थाविशेषः एव जन्यते।

ईश्वरकृष्णमते तु विषयेन्द्रियसन्निकर्षोत्पन्नं निश्चयात्मकं ज्ञानं (अध्यवसायः) प्रत्यक्षप्रमाणमिति[8]।

योगदर्शनमपि प्रायः सांख्यदर्शनोक्ताम् अधिगमप्रक्रियामेव अभ्युपगच्छति।

4) मीमांसायां प्रत्यक्षाधिगमः - मीमांसादर्शनं तावत् प्रामुख्येण सम्प्रदायद्वये विभज्यते - भाट्टसम्प्रदायः प्राभाकरसम्प्रदायश्च। तत्रादौ -

(i) भाट्टसिद्धान्तः - मीमांसासूत्रकारस्य जैमिनेः मतानुरोधम् इन्द्रियाणां विषयैः सति संयोगे पुरुषस्य जायते या बुद्धिः तत्प्रत्यक्षमुच्यते । तथा च सूत्रम् - "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भत्वात्[9] इति। अस्मात् सूत्रादवगम्यते यत् इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति। तथा सति भ्रमात्मकज्ञानेऽपि अतिव्याप्तेः वारणाय "तत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत्प्रत्यक्षम्[10]" इत्युक्तम्।

(ii) प्राभाकरसिद्धान्तः - प्राभाकरैः नैयायिकोक्तं प्रत्यक्षलक्षणं नाभ्युपगतम् । तन्मते "साक्षात्प्रतीतिः प्रत्यक्षम्[11]" इति प्रत्यक्षलक्षणम्। अत्रोक्तं प्रत्यक्षलक्षणघटकं साक्षात्त्वं प्रभाकरविजये नन्दीश्वरस्तावत् त्रिधा निरूपयति। यथा -

क) "साक्षात्प्रतीतिः स्वरूपप्रतीतिः। स्वस्यैव रूपं स्वरूपम्, असाधारणरूपमित्यर्थः"।

ख) "यद्वा, अव्यवहितप्रतीतिः साक्षात्प्रतीतिः । अव्यवहितत्वं नाम स्वविषयानन्तर्गतज्ञानान्तराव्यवहितत्वमभिप्रेतम्"।

ग) "साक्षात्त्वं स्वकालाकलितवस्तुसत्त्वावबोधकत्वं, यत्कालीनं ज्ञानं तत्कालसम्बन्धिवस्तुविषयमित्यर्थः[12]" इति।

इत्थं नैयायिकोक्तं प्रत्यक्षलक्षणमेव भाट्टमीमांसकैः सर्वथा अनुसृतमिति वक्तुं शक्यते। प्राभाकरास्तु नैयायिकानां वा भाट्टानां वा मतमननुगच्छन्तः अन्यं पन्थानमनुसरन्ति।



ISSN : 2320-740X

[redacted]

6) वेदान्ते प्रत्यक्षाधिगमः - "तत्र प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम् । प्रत्यक्षप्रमा चात्र चैतन्यमेव13" इति प्रत्यक्षनिरूपणम् । तत्र साक्षिद्वैविध्येन प्रत्यक्षज्ञानस्य द्वैविध्यम् - ज्ञेयगतं ज्ञप्तिगतञ्चेति । प्रकारान्तरेणापि प्रत्यक्षं द्विविधम् - "इन्द्रियजन्यं तदजन्यं चेति । तत्रेन्द्रियजन्यं सुखादिप्रत्यक्षं, मनस इन्द्रियत्वनिराकरणात् । सर्वाणि चेन्द्रियाणि स्वस्वविषयसंयुक्तान्येव प्रत्यक्षज्ञानं जनयन्ति14" इति ।

एतेषां मते अन्तःकरणम् इन्द्रियद्वारा बहिर्विषयदेशं गत्वा घटादिविषयाकारेण परिणमते । अयं परिणाम एव अन्तःकरणवृत्तिरित्युच्यते। अन्तःकरणस्य घटादिविषयस्य चैकदेशस्थत्वात् एकदेशस्थिताभ्यां ताभ्यामवच्छिन्नं चैतन्यमेकमेव। इत्थं रीत्या प्रत्यक्षत्वमुपपादनीयमिति वेदान्तिनः आमनन्ति ।

**पादटिप्पणी**

1. न्या.द.1.1.15
2. प्रश.भा.चौ.सं.सं.पृ.136
3. न्या.द.1.1.4
4. वै.सू- 3.1.18
5. प्रश.भाष्यम्
6. द्वयोः प्रधानं मनो लोकवद् भृत्यवर्गेषु । (सां.द.2.40)
7. सां.प्रवचनसूत्रम्, 1-89
8. प्रतिविषयाध्यवसायो दृष्टम् (सां.का)
9. मी.द- 114
10. शास्त्र.दी.48
11. प्रकरण प. 146
12. प्रभाकरविजयम्,26
13. वेदा. परि,चौ.विद्या पृ.20
14. तत्रैव, पृ.142

**उपयुक्तग्रन्थाः (Bibliography)**

1. प.र.तङ्गस्वामिशर्मा, "भारतीयदर्शनेषु प्रत्यक्षप्रमाणविमर्शः", मद्रास : अडयार पुस्तकालयः, 1995.
2. "भारतीयदर्शनेषु प्रत्यक्षम्", बेङ्गलूरु : पूर्णप्रज्ञासंशोधनमन्दिरम्, 2000.
3. एस.बि.रघुनाथाचार्यः, "न्यायमीमांसादर्शनयोः प्रमाणविचारः", तिरुपति : पद्मश्री पब्लिकेशन्स, 1983.



ISSN : 2320-740X

4. डा. रामचन्द्रुलबालाजी, "न्यायमनोविज्ञाननयेन प्रत्यक्षविमर्शः", तिरुपति : रा.सं.विद्यापीठम्, 2011.

5. रमाशङ्करत्रिपाठी, "भारतीय दर्शन का परिशीलन", वाराणसी : भारतीय विद्या संस्थान, वि.सं.2057.

6. डा. एम्.ए.आलवार् "प्रत्यक्षम्" तिरुपति : रा.सं.विद्यापीठम्,2010

7. जयदेव वेदालङ्कार, "भारतीयदर्शन में प्रमाण", दिल्ली / वाराणसी : भारतीय विद्या प्रकाशन, 1998.

*****



ISSN : 2320-740X

[redacted]

## ज्योतिषशास्त्रे रोगनिर्णयः

श्री अनिरुद्ध नारायण शुक्ल
अतिथ्युपन्यासकः,ज्यौतिषविभागः

अतिप्राचीनकालादेव होराशास्त्रे रोगस्य चर्चा वर्तते। ख्यातरोगाणां चर्चा वेदेषु पुराणेषु च प्राप्यते। तथैव ज्योतिषशास्त्रेऽपि प्राच्यकालीन - रोगव्ययाधिनां लक्षणस्थितियश्च वर्णिताः दृश्यन्ते। यद्यपि बहूनां रोगाणां लक्षणपुरस्सरं विवेचनं लभ्यते, तथापि अनेके रोगाः एतादृशाः वर्तन्ते येषां नामानि न सन्ति। आधुनिकसमये ये रोगाः ख्याताः तेषां रोगाणां नामानि प्राच्यकाले नोपलभ्यतन्ते, परन्तु तेषां रोगाणां लक्षणानि ज्यौतिषशास्त्रे प्रतिपादितानि सन्ति। उपलब्धेषु ग्रन्थेषु प्रश्नमार्गे रोगाणां वर्गीकरणं दृश्यते, एवं रोगाणां द्वैविध्यं वर्तते, एकस्तु निजशरीरचित्तभेदात्- द्वितीयस्तु आगन्तुकः दृष्टादृष्टनिमित्त भेदात्। तद्यथा –

रोगस्तु द्विविधाज्ञेया निजागन्तुकभदेतः
निजागन्तुकश्चापि प्रत्येकं द्विविधा पुनः।
निजशरीरचित्तोत्था दृष्टादृष्टनिमित्तजाः –
तथैवागन्तुकश्चैव व्याधयः स्युश्चतुर्विधा॥[1]

एवं जन्मनां गृहीतो रोगः सहजरोगः जन्मतः पश्चाद् यो रोगः भवति सागन्तुकः रोगः। यथा अन्धकत्वमूकत्व – नपुंसकत्वादयः रोगाः शारीरिकाः सहजरोगाः सन्ति, तथा जडतोन्मादमानसिकाः सहजरोगाश्च। तत्र सहजरोगस्य द्वैविध्यं मानसिक - शारीरिकभेदात्, तथा आगन्तुकरोगस्याऽपि द्वैविध्यं वर्तते। तच्च दृष्टादृष्टनिमित्तभेदात्। एवं येषां रोगाणां प्रत्यक्षरूपेण कारणं ज्ञायते ते रोगाः दृष्टिजन्यरोगाः यथाः ज्वरातिसारः, तथा येषां रोगाणां प्रत्यक्षकारणं न ज्ञायते ते रोगाः अदृष्टजन्यरोगाः भवन्ति। यथा-शापाभिचारादयः।

जन्मकुण्डल्यां यो ग्रहः अशुभः निर्बलश्च भवति सः स्वाङ्गगतधातुदोषाद् विकारं ददाति। वस्तुतः भारतीयज्यौतिषशास्त्रे विस्तृतरूपेण वर्णनं रोगोपरि नोपलभ्यते, तथाऽपि जन्मकालिकः प्रश्नकालिको वा स्फुटग्रहाणामाधरेण दशाक्रमाधरेण च (वर्तमाने भविष्ये च) ग्रहजन्यसमेषाम् आधिव्याधिरोगाणाण् चर्चा प्राप्यते।

मानवस्य पूर्वार्जितकर्मप्रभाववशात् बहवः रोगाः जायन्ते तत्तद् पूर्वार्जितकर्मप्रभावाद् कः रोगः कस्मिन् काले कस्मिन्नङ्गे वा भविष्यति एतस्य विस्तृतवर्णनं कर्मविपाकसांहितयां द्वितेयोऽध्याये वर्णितः[2]।

---

[1] -प्रश्नमार्गः 12/18-19

[2] लोहमूल्यापहारी च पाण्डुरोगी भवेन्नरः।
दधिदुग्घहरो यस्तु कुक्षिरोगी भवेन्नरः॥ कर्मविपाक सं। 2/36,



ISSN : 2320-740X

[redacted]

वस्तुतः रोगाणां कारणं संचित-प्रारब्ध-क्रियमाणाख्यत्रिविधकर्माणि सन्ति । रोगकारणप्रसङ्गे डॉ.शुकदेवचतुर्वेदी “ज्योतिषशास्त्र में रोग विचार” इति ग्रन्थे त्रिविध-कर्माणि गृहीतानि सन्ति । परन्तु “धर्माभावः अपस्मारः । कुष्ठाद्युत्पत्तिश्च भवति” इति वाक्येन धर्माभाव रूप रोगस्य कारणं चाणक्यमहाभागेनोक्तम्[1] । ज्योतिषशास्त्रे रोगानिर्धारणप्रकारः द्विधा विहितः ।

प्रथमप्रकारः आधानकालजन्मकालाधारितकुण्डल्या, द्वितीयप्रकारः प्रश्नकालाधारितप्रश्नकुण्डल्या । तच्च आधानकालेन आधानकुण्डल्या जन्मकुण्डल्या च, प्रश्नकालेन प्रश्नकुण्डल्या विचारो भवति । तत्र प्रथमं जन्मकुण्डल्या आधानकुण्डल्या वा कुष्ठरोग- काणरोग- मूकूरोगाणाम् अन्धकत्वदोषं एवं शारीरिक-विकलाङ्गत्वादिनां रोगव्रणदोषानां विचारः भवति । यतोऽहि एते रोगाः सहजरूपेण जन्मकालाद् स्वतः उत्पद्यते । एतादृशरोगाणां अवस्थितिः शरीरे सम्पूर्णजीवने भवति । द्वितीयः गोचरेण प्रश्नकालेन वा ग्रहाणां या स्थितिः दृश्यते तद्वशात् शरीरे वर्तमानग्रहप्रभावेण नैकेदोषाः व्याधयश्च भवान्ति । ये दोषव्याधयः वर्तमानग्रहप्रभावेण गोचेरण वा भवति ।

जन्मकुण्डल्यां द्वादशभावेषु षष्ठाष्टव्ययभवाः रोगाणां विचारणीभावाः कथ्यन्ते । षष्ठभावस्यापरपर्यायः रोगभावः । द्वादशभावेषु सर्वाधिककष्टं रोगाञ्च अयमेव भावः ददाति, अतएव द्वादशभावरूपीशरीरे षष्ठभावः रोगाणां मन्दिरम् इति सार्थकत्वं “शरीरंव्याधिमन्दिरम्“ इत्युक्त्या भवति । अष्टमभावेनापि रोगस्य विचारः भवति, वस्तुतः अष्टमभावस्य विचारः विशेषरूपेण आयुमृत्योः कृते भवति, तथापि अष्टमेशे पापगृहगे पापग्रहसहिते च रोगप्रदः भवति[2] । इति वचनानुसारेण रोगविचारोऽपि भवति, तथा द्वादशभावेनापि रोगविचारः भवति, मूलरूपेण भावोऽयं व्ययभावस्य परन्तु जातकः यदि रोगलक्षणैर्युक्तः भवति तदा द्वादशभावेन रोगविचारोऽपि भवति ।

रोगनिर्धरणप्रसङ्गे आचार्यमन्त्रेश्वरः फलदीपिकायां लिखितमस्ति -

(क)यो ग्रहः षष्ठभावे स्यात्

(ख)यो ग्रहः अष्टभावेस्यात्

(ग)यो ग्रहः द्वादशभावे स्यात्,

(घ)यो ग्रहः षष्ठेशः स्यात्

(ड)यो ग्रहः षष्ठेशेन सह सम्बन्धितः स्यात् इति, एवं ग्रहविचारेण वा त्रय प्रकारेण यदा एक एव रोगः निर्दिष्टः स्यात्तदा तद्रोगस्यादेशः करणीयः[3] ।

---

[1] कैटिलीयमर्थशास्त्रम्-3.पृष्ठ.189,सं। सं। वि। वि। वाराणसी,

[2] पापरन्ध्रगते तु पापसहिते रोगप्रमादाकरः । -जातकालङ्काराः 3/12,

[3] फलदीपिका- अध्याय-14-श्लो 01



ISSN : 2320-740X

**ग्रहनिर्दिष्टरोगाः –**

**सूर्यः** – सूर्यः यदा रोगकारकग्रहः स्यात् (अर्थात् षष्ठाष्ट-द्वादशभावे सूर्यः स्थितः स्याद्वा अधिपतिः स्यात्) तदा पित्तोष्णज्वरदेहताप – अपस्मार-हृद्-नेत्र-चर्म-अस्थिरोगाणां कारको सूर्यः भवति।

**चन्द्रः** - निद्रा-आल्स्य-कफ-अतिसार-(संग्रहणी) पिटक-शीतज्वर-मंदाग्नि –अरुचि-(भोजने अरुचि) पीलिया-रक्तविकार-पित्तास्थीरादिरोगाणां कारकग्रहचन्द्रः भवति।

**भौमः** – तृष्णा-(पिपासुः)वायुजनितपित्तप्रकोप – पित्तज्वर-कुष्ठ-नेत्र-गुल्म-(एपिडिसाइटीज-अपस्मार-मज्जा-(आस्थिमध्ये मज्जाभावः) कंडून-देहभंगादि-रोगाणां कारकग्रहः भौमः आस्ति।

**बुधः** – भ्रान्ति-(विचारे तर्कशक्त्याभावः) व्यर्थचिन्ता-नेत्र-गण्ड-नासिका-त्रिदोषोत्पन्नज्वर-(वातपित्त-कफ) चर्म-पीलिया-कंड्वादिरोगाणां कारकग्रहबुधः भवति।

**गुरुः** - गुल्म-(एपेडिंसाइटीज)अन्त्रज्वर-मूर्द्धा-कर्ण-कफादिरोगाणां कारकग्रहो गुरुः वर्तते।

**शुक्रः** – रक्ताभाव-कफवायुदोषेण नेत्रविकार-मूत्र-प्रमेह-जननेन्द्रिय (प्रोस्टेट) बीर्याभाव-शरीरबलक्षय-मुखकान्तिहीनता-शोष-(शुष्कशरीर) आदिरोगाणां कारकग्रहः शुक्रः भवति।

**शनिः** – वातकफोत्पन्नविकार-पादखञ्ज-श्रमश्रान्ति-भ्रान्ति-कुक्षि-अन्तश्शरीरे उष्ठाता-मानसिकाचिन्ता-इत्यादिरोगाणां कारकग्रहशनिः वर्तते।

**राहुः** - हृदयताप-कुष्ठ-दुर्मति-भ्रान्ति-अस्थिरता-पादपीडा इत्यादिरोगाणां कारकग्रहराहुः वर्तते।

**केतुः** – शारीरिक-मानसिक-वायु-क्लेशरोगाणां कारकग्रहः केतुः वर्तते।

"ज्योतिषशास्त्र में रोग विचार" नामके ग्रन्थे वर्णितमस्ति यत् कुण्डल्यां वार्णितद्वादशभावाः मानवस्य विभिन्नाङ्गेषु प्रतिनिधीत्वं कुर्वन्ति। तद्यथा-[1]

**प्रथमभावः** - शिरः ललाटः,

**द्वितीयभावः** - नेत्रं, कर्णौ, नासिका, गण्डः, ओष्ठौ, दन्ताः, मुखम्,

**तृतीयभावः** – कण्ठः ग्रीवा, भुजौ, वक्षस्तनौ,

**चतुर्थभावः** - श्वासनलिका,हृदयः,

**पञ्चमभावः** – उदरः,गुर्दा(किडनी),नाभि

**षष्ठभावः** - कटिः नितम्बः

**सप्तमभावः** – वस्ति,मूत्राशयः,गर्भा शयस्योपरिभागः,

**अष्टमभावः** – गर्भाशयोपरिभागः, जननेन्द्रियः,

---

[1] ज्योतिशास्त्र में रोगा विचार,प्रासं.(डा.शुकदेव चतुवैदी)



ISSN : 2320-740X

**नवमभावः** – उरुद्वयम्-

**दशमभावः** - जानूद्वयम्।

**एकादशभावः** - जंघौ,

**द्वादशभावः** - पादौ तल्वादिभागः, अङ्गुल्यादिः,

**प्रसङ्गेडिस्मिन्** – आधुनिकदैवज्ञः पं । मुकुन्ददैवज्ञैः कालपुरूषाङ्गे बाह्यङ्ग-अन्तरङ्ग-विभागेन वर्णनं कृतमस्ति[1] ।

| **राशिः** | **कालाङ्गम्** | **बाह्याङ्गम्** | **अन्तरङ्गम्** |
|---|---|---|---|
| मेषः | शिरः | मुखद्वारः | शिरस्य आन्तरिक भागः |
| वृषः | मुखः | गण्डः | श्वासनलिका |
| मिथुनः | बाहुः | स्कन्धः | रक्तः |
| कर्कः | हृदयः | वक्षः | पञ्चेन्द्रियः |
| सिंहः | क्रोड् | मध्यभागः | हृदयः |
| कन्या | कटिः | उदरः | पृष्ठः |
| तुला | वस्तिः | कटिः | गुर्दा(किडनी) |
| वृश्चिकः | व्यञ्जनम्- | जननाङ्गम् | मूत्राशयः |
| धनुः | उरुः | गुर्दा(किडनी) | शिरा,मज्जा |
| मकरः | जानूः | जान्वोर्ध्वभागः | अस्थिः |
| कुम्भः | जंघौ | गुल्फः | रक्तः |
| मीनः | पादौ | तल्वादयः चरणौ च | रसयुक्तपर्दाथः |

[1] जातक दीपकः,पृ436(पं। मुकुन्ददै वज्ञः)।



ISSN : 2320-740X

[redacted]

**नेत्ररोगयोगः** –

जन्मकुण्डल्यां यदि चन्द्रः सूर्यश्च द्विर्द्वादशभावे स्थितौ, तथा चन्द्रसूर्योपरि – भौमशनेः दृष्टिस्यात्तदा नेत्ररोगः भवति,अत्र ध्यानं देयं यत् सूर्यचन्द्रौ एकसह परस्परगृहे वा स्यातां तथा सूर्यचन्द्रोपरि भौमशन्योः पूर्णदृष्टिस्यात्तदा नेत्ररोगः भवति।

जन्मकुण्डल्यां यदि चन्द्रसूर्यौ एकसह, उभयोः एकोऽपि वा द्विर्द्वाशभावगतौ तथा चन्द्रसूर्ययोरुपरि क्रमशः भौमशन्योः दृष्टिस्यात्तदा नेत्ररोगः भवति । वस्तुतः कुण्डल्यां द्वितीयभावेन दक्षिणनेत्रस्य विचारः भवति । तथा द्वादशभावेन वामनेत्तस्य विचारः भवति । उपर्युक्तग्रहस्थितिः यदि द्विर्द्वादशस्थाने स्यात्तदा क्रमशः दक्षिणवामनेत्रयोः दृष्टिरोगः भवति । [1]द्विर्द्वादशस्थाने पापग्रहे सति पापग्रहयोगोऽपि नेत्रकष्टमनुभवति।

**कर्णरोगयोगः** – तृतीयएकादशभावः भौमगुरूशनिभिर्युक्तः दृष्टः वा स्यात्तदा कर्णरोगः भवाति । वस्तुतः तृतीयभावेन दक्षिण- कर्णस्य, तथा एकादशभावेन वामकर्णस्य विचारः भवति । शब्दस्पर्शरुपरसगन्धाः इति पञ्चगुणेषु, श्रवणं शब्देन सह सम्बन्धं स्थापयति, तथा पुथ्वीजलतेजवायु-आकाशाः इति पञ्चतत्वानि सन्ति । अग्नितत्वग्रहसूर्यभौमौ, जलतत्वग्रहचन्द्रशुक्रौ, पृथ्वीतत्वग्रहबुधः वायुतत्वग्रहशनिः, आकाशतत्वग्रह-वृहस्पतिश्च इति । शब्दगुणस्याधिष्ठाताऽकाशतत्वमस्ति, आकाशतत्वग्रहगुरुः यदि भौमशनिभ्यां पूर्णदृष्ट्या दृष्टः स्याद्वा भौभशनिना-सह स्यात्तदा कर्णरोगःबधिररोगः वा भवति । भौमः पित्तप्रकृतिको ग्रहो वर्तते । अत एव भौमस्य युति-द्दष्टिपित्तप्रकृतिवशात् कर्णरोगे रक्तश्रवादिविकारःभवति।

शनिः वायुप्रधानग्रहः अस्ति । अत एव यदा शनिना कर्ण-रोगः उत्पन्नो भवति तदा वातप्रकृतिकारणभूतः भवति । वात- पित्तकफप्रकृतयः आयुर्वेदशास्त्रे त्रिदोषनाम्ना ज्ञायते । अतः त्रिदोषासामञ्जस्येन शरीरे रोगाः जायन्ते।

भौमः पञ्चमभावे स्यात्तदा उदररोगः भवति कोऽपि पापग्रहाः (सूर्यः,भौमः,राहुः,केतुः,शानिः)पञ्चम-भावे स्यात्तदा उदरे पीडादिरोगो भवन्ति। यतोऽहि पञ्चमभावः उदरभावः वर्तते।

शुक्रः यदि सप्तमभावे स्यात्तदा वीर्यसम्बन्धीप्रमेह-मूत्रादिरोगाः भवन्ति।

यदि षष्ठेशः अष्टमेशो वा सप्तमभावे अथवा षष्ठेशः अष्टमभावे स्यात्तदा गुदारोगः भवति । यतोऽहि सप्तमभावः गुह्यजननेन्द्रियप्रदेशः, अष्टमगुदास्थानं अस्ति, यदि पापग्रहः दुःस्थानस्य स्वामिभूत्वा शरीरस्य यस्मिन् अङ्गे स्थितः स्यात्तस्मिन्नङ्गे रोगो जायते । यदि षष्ठाष्टमभावे सूर्यः स्यात्तदा ज्वरभयः, भौमकेतू स्यात्तदा व्रणभयः, शुकः स्यात्तदा जननेद्रियप्रदेशे रोगः, गुरूः स्यात्तदा क्षयरोगः (T.B), शनिः स्यात्तदा वातरोगः, भौमराहूः स्याद्वा षष्ठभावोपरि-भौमस्य दृष्टिः स्यात्तदा व्रणादिरोगाः, सचन्द्रशनिः स्यात्तदा गुल्मरोगः, क्षीणचन्द्रः पापग्रहैः सह जलराशिस्थ षष्ठाष्टमे स्यात्तदा अम्बुरोगः (जलोदरः) क्षयरोगः वा भवति।[2]

---

[1] फलदीपिका, रोगनिर्णयः 14/11,

[2] फलदीपिका,रोगनिर्णयः 14/11



[redacted]

ISSN : 2320-740X

**रोगसकाशात् मृत्युकारणम्-**

यो ग्रह अष्टमभावे स्याद्वा यस्य ग्रहस्य अष्टमभावोपरि-दृष्टिस्यात् उभयोर्मध्ये यो ग्रहः बली भवति तद् ग्रहकारकरोगेण जातकस्य मृत्युर्भवति,यतोऽहि अष्टमभावः आयुषः स्थानं वर्तते।

परन्तु अष्टमभावे कोऽपि ग्रहः नस्थितः भवेत् न दृष्टः स्यात्तदा कस्य ग्रहस्य रोगेण मृत्युः भवाति ? यदि एवं स्थितिः भवेत्तदा अष्टमभावेन यो रोगः उक्तः वा अष्टमेशः यस्मिन्, भावे राशौ वा स्थितः स्यात् तद् राशि-भावोक्त-रोगेण मृत्युः भवति।

यथा- अष्टमेशः पञ्चमभावेस्थितः स्यात्तदा उदररोगेण, चतुर्थभावे स्थितः स्यात्तदा हृदयरोगेण, यदि अष्टमेशः सूर्यः भौमः वा स्यात्तदा पित्तजरोगेण, शनिः स्यात्तदा वातरोगेण मृत्युः भवति । उपर्युक्तयोगः अष्टमभावसम्बन्धितः अस्ति । तद् भावे द्रेष्काणलग्नात् यो द्वाविंशतिद्रेष्काणः[1] भवति तस्य स्वामिः (द्रेष्काणकुण्डयांम् अष्टमभावेशः) मृत्यु - कारकः भवति।

*****

[1] जातक पारिजाते द्रेष्काणस्वरुपम् –अ 5,श्लो 55, फलदीपिकायां रोगनिर्णयः 14/12



ISSN : 2320-740X

[redacted]

# पाणिनीयं सुभाषितम्

✍ **विदुषी एल्.सविता आर्या**
अतिथ्युपन्यासका, नव्यव्याकरणविभागः

सच्चिदानन्दपरमेश्वरकृपया विशालकारूण्यातिशयात्सल्लक्ष्याच्च जगति शान्ति-सुख-समृद्धयो वर्षन्ति, प्रभवन्ति च । महान्तः महर्षयः लोकान् समुद्धर्तुं भूयः प्रसादयन्ति । अमीषां सतां सम्प्राप्त्यै भारतं भाति पुण्यतरम् । न नगाः, न नद्यो, नोपवनानि केवलं राष्ट्रस्य कस्यचन महिम्नो निदानम् । असौ हि केवलं ऋद्धिर्भौतिकी । आध्यात्मिकता हि शाश्वतिकी शान्तिः समृद्धिश्च । सा च सदाचारमूला धर्मार्थकामाद्याश्रिता । "आचारः परमो धर्मः" इति खलु आर्षवचनम् । तदाचारसंरक्षोपायविधास्वन्यतमा सुभाषितपरम्परा । सुभाषितानि तदेकवृत्या काव्यादिष्वानुषङ्गिकवृत्या च लोकहिताय सद्भिर्महद्भिर्व्याहारिषत । समाजे वा निकाये वा यदनुत्तमं भद्रंकरं च तद् रत्नमिति प्राहुः प्राञ्चः ।

**पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभषितम् ।**
**मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते[1] ॥**

सत्कविभणितिर्हि श्रुता वा श्राविता वा कमप्त्यानन्दमावहति चेतः सुखाकरोति ज्ञानविवर्धनाय च भवति । मिते सुभषितभृङ्गारेऽमितो रसो विद्यत इति विदितं विदाम् । सुभाषिताविष्कारवृत्तवर्णनं दुःशकम् । संस्कृतसाहित्ये नैकानि जीवनमूल्यसङ्गुम्फितानि सुभाषितानि समाहितानि । तत्र च रामचन्द्रभट्टः **सभ्याभरणम्** इत्याख्ये ग्रन्थे तादृशसरणिमनुसरन् व्याकरणशास्त्रमादाय तद्गतसूत्राणां सरलतया लोकभाषानुस्यूततया विवेचनाय नैतिकाचारशीलशिक्षायाः प्रसाराय च सुभाषितसंकलनात्मकं विवरणं चकार । तद्यथा – सज्जनानां सादृश्यं **"समासस्य"** इति समासान्तोदात्तत्वविधायकसूत्रेण प्रतिपिपादयिषति ग्रन्थकारः ।

**समस्तमुच्चतां नेतुं रचितानेकरीतयः ।**
**समासोदात्तशास्त्रेण समानाः किन्न सज्जनाः[2] ॥**

इह श्लोकस्य सुभाषितपक्षे समासोदात्तविधायकशास्त्रेण सुजनानां साम्यं भजते दृन्भूः (ग्रन्थकर्त्ता) । **"समासस्य"**[3] इति सूत्रेण समासे उदात्तविधिः । तत्सदृशाः उदात्तगुणगरिष्ठास्ते सज्जनाः इति ।

समसनं समासः । एकत्रीकरणमित्यर्थः । अर्थात् समस्ते सम्पूर्णे मानवसमाजे तस्य सज्जनस्य

---

[1] चाणक्यनीतिदर्पणम् १४-९
[2] सभ्याभरणम् ३/१६
[3] अष्टा.सू.स.(६/१/२२३)



ISSN : 2320-740X

उदासीनो शतत्रुर्वा भवेत् (प्रत्येकं जीवने त्रयः पक्षाः उत्पद्यन्ते एव, मित्रोदासीनशत्रवश्चेति) तदेवमुक्तं –

**मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः ।**

**उत्पद्यन्ते त्रयः पक्षाः मित्रोदासीनशत्रवः**[1] ॥ इति ।

तेषां समाजे मित्रेषु, उदासीनेषु शत्रुषु वा ख्यातिं महत्वं प्रापयितुं सः साधुः रचितानेकरीतयः भवति । रचिताः अनेकाः रीतयः प्राप्त्यनुकूला उपाया यैस्ते रचितानेकरीतयः । भिन्न-भिन्नप्रकारकोपायान् विचारयति निष्पादयति यथा, तद्वदेव समासोदात्तविधायकशास्त्रं **"समासस्य"**[2] इति । समासस्यान्त उदात्तो भवतीति सूत्रार्थः । एतदपि शास्त्रं नाना प्रकारेण निष्पादितं समस्तं समासनिष्ठं राजपुरूष-ब्राह्मणसमिदादि पदमुच्चतामुदात्ततां गमयितुं सामान्यविशेषभेदेन अनेकोपायैर्यतते, साधयति च । इति सुभाषितपक्षे ।

दृष्टान्तयति दार्ष्टान्तिकः व्याकरणपक्षे – 'राजपुरूष' इत्यत्र राजशब्दे तावत् "कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः" इत्युणादिसूत्रेण कनिन् प्रत्ययान्तत्वात् **"ञिनित्यादिर्नित्यम्"**[3] इति नित्स्वरेणाद्युदात्तत्वम् । एवं हि पुरूष शब्दः "पुरः कुषन्" इत्युणादिना कुषन् प्रत्ययान्तो व्युत्पाद्यते । शब्दोऽयमपि नित्स्वरेणाद्युदात्तः । कृते समासे पदानां हि पृथक् स्वरः प्रसज्येत, यदीदं शास्त्रं नोच्येत । अतस्तपवादोऽयं योगः उच्यते । समासनिष्ठपदानां तत्तत् स्वरे प्राप्ते तदपवादतया समासविधायकशास्त्रेण समासान्तोदात्तत्वं **"समासस्य"**[4] इति सूत्रेण विधीयते । तेन नानापदस्वरस्यापवाद इत्युक्तम् । **"अनुदात्तं पदमेकवर्जम्"**[5] इति योगेन च शेषनिघातः ।

'राजपृषत्' 'बाह्मणसमित्' इत्यादावपि "समासस्य" इति समासोदात्तविधायकशास्त्रेण अन्तोदात्तत्वे विहिते, योऽत्र समासस्यान्तो दकारः नासौ स्वरभाक्; यश्च ततः पूर्वोऽकारः नासौ समासस्यान्तः, तकारेण व्यवहितत्वात् । अत आह-"स्वरविधौ व्यञ्जनमविद्यमानवत्"[6] इति । समासे येऽचः पूर्वे तदपेक्षया परस्याचः अन्तोदात्तत्वं वेदितव्यम् । एवञ्च यथाकथञ्चिदपि समासस्य एकत्रीकृतपदसमूहस्य उदात्त-शास्त्रेण उदात्तत्वं शास्ति । इति व्याकरणपक्षः ॥

एवञ्च सज्जनदुर्जनयोः प्राकृतिकस्वभावभेदः तद्धित-प्रत्ययेन तुल्यमिति सिसाधयिषति उत्तरश्लोकेन :-

**स्वभावादेवैकः कलयति सदा साधुवचनम्,**

**स्वभावादन्यस्मिन्नपि न सहते यत्तदपरः ।**

**समानेऽप्याकारे खलसुजनयोर्भेदकमिदम्,**

---

[1] महा.भा.१२/४१/४२

[2] अष्टा.सू.सं.(६/१/२२३)

[3] अष्टा.सू.सं.(६/१/१९७)१

[4] अष्टा.सू.सं.(६/१/२२३)

[5] अष्टा.सू.सं.(६/१/१०७)

[6] (व्या.महा.प.३६)



ISSN : 2320-740X

[redacted]

**ततो नैतो तौल्यं भजत इह किं तद्धितायते**[1] **॥**

सुभाषितपक्षे- इह खलु जगति दृष्टिपथानुगमे सुजनदुर्जनौ शरीराद्याकारेण समानौ सन्तावपि स्वभावतः विषमौ वर्तेते। तद्यथा सज्जनः स्वस्वभावात् आनन्दकाले विषादकाले वा सर्वदा प्राणिमात्रं प्रति साधुवचनानि, साधुव्यवहारांश्च व्यवहरति, दुर्जनवचनमपि सरलया कलयति । दुर्जनस्तु अपरैरुक्तानि सुष्ठुवचांसि अपि दुर्जनस्वभावनिरतत्वात् दुष्टत्वेनैव विचार्य न तत् सहते इति; एवं समानेऽप्याकारे तत्तत्स्वभावगतभेदेन उभयोरपि खलसुजनयोर्भेदः स्पष्टायते।

व्याकरणपक्षे- अनयोः सुजनदुर्जनयोस्तौल्यं कथं विभेद्यते इत्याकांक्षायां श्लोककारः रामचन्द्रभट्ट उवाच - तद्धितायते इति । तद्धित इव आचरतीत्यभिप्रायः । **“तद्धिताः”**[2] इत्यधिकारसूत्रम् आपञ्चमाध्यायमधिक्रियते। अधिकारेऽस्मिन् यत् प्रत्ययः, य प्रत्ययश्च सूत्रद्वयेन विधीयते।

नानुबन्धकृतमसारूप्यमिति परिभाषावचनमनुसृत्य वर्णसाम्येन उभयप्रत्यययोस्तुल्येऽपि परस्परं भेदकत्वमस्त्येव । किमिदं यत् समानेऽप्याकारे भेदकत्वेन परिगण्यते इति चेत् यथा **“शरण्यः”** शरणे साधुरिति पदार्थः । **“कर्मण्यः”** कर्मणि साधुरिति । साध्वर्थविवक्षायां **“तत्र साधुः”** इति सूत्रेण सप्तमीसमर्थप्रातिपदिकात् साध्वर्थे विधीयमानः यत् प्रत्ययः स्वभावात् प्रकृतितः विधिवशात् साधुवचनं साध्वर्थाभिधानतामङ्गीकरोति।

**“सतीर्थ्यः”** इति लक्ष्ये **“समानतीर्थे वासी”**[3] इति सूत्रेण सप्तमीसमर्थात् समानतीर्थशब्दात् वासी इत्यमुष्मिन्नर्थे यत् प्रत्ययः। साधु इति निवृत्तम्। वासी इति प्रत्ययार्थः। वसतीति वसी। निपातनादेव णिनिः, ग्रह्यादेराकृतिगणत्वाद्वा साधुरिति। अथवा वसनं वासः वासोऽस्यास्तीति वासी, मत्वर्थीयो इनिः। समाने तीर्थे गुरौ वासी सतीर्थ्यः = सहाध्यायी। यत् प्रत्ययपरकतीर्थशब्दे उत्तरपदे समानस्य सभावः **“तीर्थे ये”**[4] इति लक्षणेन।

‘वासी’ इत्यरर्थे विधीयमानोऽयं तद्धितः यत् प्रत्ययः साध्वर्थं निवर्तते। तत्तदाकारदृष्ट्या भेदरहितौ समानावपि तद्धितप्रत्ययौ स्वभावात् प्रकरणवशात् प्रकृतार्थत्वात् साध्वर्थं साधुवचनं नैव सेव्येते। भेदकत्वं संगृह्येते एव। तथा च समानेऽप्याकारे खलसुजनयोः स्वभावतस्तु तयोर्भेद एव मानम्। अत उक्तं शलोके –

**खलसुजनयोः स्वभावः तद्धितायते इति ॥**

अथ सज्जनप्रशंसामेव पुनः पद्यान्तरे अनुसरति अत्र दृन्भूः (ग्रन्थकारः) –

**अनीचसङ्गप्रणया महान्तः परोन्नतेर्ये परितोषवन्तः ।**

---

[1] सभ्यभरणम् ३/२

[2] अष्टा.सू.स.(४/१/७६)

[3] अष्टा.सू.स.(४/४/१०७)

[4] अष्टा.सू.स.(६/३/८६)



ISSN : 2320-740X

**ते पूर्वसम्बुद्धिपदोपमेया यत्नेन नेया नयनातिथित्वम्[1] ॥**

प्रकृतश्लोके सज्जनानां सादृश्यमुपमानोपमेयभावेन सुधिया कल्प्यते । ते सज्जनाः कीदृशाः इति श्लोकस्थ तृतीयपादे स्पष्टीकृतम् – पूर्वोच्चारितेन आमन्त्रितसंज्ञकसम्बुद्धिपदेनोपमेयास्सन्ति सन्तः महान्तः । सम्बुद्धिपदतुल्यताङ्गताः सुजनाः महता प्रयत्नेन नयनातिथित्वं नेयाः, नाम दानादिप्रशंसायोग्यत्वं प्रापणीयाः अवश्यं प्रशंसार्हाः भवन्ति ।

श्लोकाङ्किते प्रथमचरणे इतोऽपि तेषां वैशिष्ट्यं सूच्यते । कीदृशास्ते सन्तः ? इति प्रश्नपूर्वकसमाधिः **'अनीचसङ्गप्रणयाः'** इति । अर्थात् नीचानां खलानां सङ्गः प्रणयः प्रीतिर्येषां ते नीचसङ्गप्रणयाः । तद्भिन्नाः अमी सज्जनाः, नीचसङ्प्रणयः प्रीतिर्न विद्यते तेषु, समानशीलव्यसनेषु मैत्री इति वचनात् । नाम दुष्टस्वभावविरताः इति । दुष्टस्वभावश्चोच्यते –

**खलः सर्षपमात्राणि परच्छिद्राणि पश्यति ।**
**आत्मनः बिल्वमात्राणि पश्यन्नपि न पश्यति[2] ॥ इति ॥**

तथा च परोन्नतेर्ये परितोषवन्तः ते सज्जनाः इति सज्जनानां गुणप्रकर्षः । परेषामुन्नतिं दृष्ट्वा ऐश्वर्यसुखाद्यभिवृद्धिञ्चावलोक्य ये सतुष्यन्ति, न तत्र असूयावन्तः, ते न द्विष्यन्ति । परेषां = मित्रशत्रूदासीनानामित्यर्थः । शत्रूणामपि ऐश्वर्याद्यभिवृद्धिमवलोक्य ये नासूयन्ति, नेर्ष्यन्ति, प्रत्युत् परितोषवन्तः भवन्ति ते सज्जनाः । असूयेर्ष्यादिभावनानामविद्यमानवत्वादेव ते सज्जनाः साधवः प्रशंसार्हाः, इत्येवं तावत् सुभाषितपक्षः ।

अथ च व्याकरणपक्षे स्वरविषयक-आलोचनायां तु कथञ्चैतेषां सतां सम्बुद्धिपक्षेसादृश्यमिति चेत् हे देवदत्त ! हे यज्ञदत्त ! अत्र आष्टमिकेन **"आमन्त्रितस्य च"**[3] इति योगेन आमान्त्रितपदस्य अनुदात्तता । 'देवदत्त पचसि' इत्यादौ च **"तिङ्ङतिङः"**[4] इति लक्षणेन तिङन्तस्य निघातः प्राप्तः । तस्य चानुदात्तत्वस्य **"आमन्त्रितं पूर्वमविद्यमानवद्"**[5] इत्याष्टमिकसूत्रेण आमन्त्रितसंज्ञकदेवदत्तपदस्य अविद्यमानवत्वेन निर्वचनात् नीचतां निवार्य धातुस्वरेण=प्रकृतिस्वरेण अर्थात् साधुस्वभावेन उदात्ततामुन्नतिं सम्पादयितुम् आमन्त्रितसंज्ञकपदं स्वयमविद्यमानवद्भावमाश्रित्य तं = परपदं = तिङन्तमुदात्ततया अलङ्करोति । अतः प्रकृतपद्ये सम्बुद्धिपदेनोपमेयास्सन्ति सन्तः । एवञ्च उदात्तस्वरेण गतानां साधूनां सतां परोन्नतिं प्रति सन्तोषवत्त्वं बोध्यम् ॥

*****

---

[1] सभ्याभरणम् २/११

[2] महा.भा.१.३०.६९

[3] अष्टा.सू.सं(८/१/१९)

[4] अष्टा.सू.सं(८/१/२८)

[5] अष्टा.सू.सं(८/१/७२)



ISSN : 2320-740X

[redacted]

## देवताधिकरणम्

✍ **अभिनन्दन् भट्**

शोधच्छात्रः

वेदान्तादिसर्वाण्यपि शास्त्राणि जनानां सन्मार्गदर्शनार्थमेव प्रवृत्तानि । तदनु पूर्वमीमांसाशास्त्रमपि धर्माधर्मविचारद्वारा लोकानां सन्मार्गप्रदर्शनार्थमेव प्रवृत्तम् । इष्टप्राप्त्यनिष्टपरिहारार्थम् अलौकिकमुपायं बोधयत्सु शास्त्रेषु मूर्धन्यं शास्त्रं वेद एव । अत एवोक्तम्, वेदात् परं शास्त्रं नास्ति इति । इष्टप्राप्त्यनिष्टपरिहाराय अस्माभिः वेदोक्तकर्माण्येव आश्रयणीयानि । नानाविधक्लेशपरिहाराय इष्टप्राप्त्यर्थं च वेदेषु उपायाः श्रुताः । परं सर्वेषामपि वेदार्थविचारः कष्टसाध्य एव । अतापि वेदार्थः विज्ञेय एव । **ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च । अनधीयाना व्रात्या भवन्ति । स्थाणुरयं भारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थज्ञः इत्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा** इत्यादि स्मृतिभिः, **स्वाध्यायोऽध्येतव्यः** इत्यध्ययनविधिना च वेदाध्ययनमवश्यं कर्तव्यम् , वेदार्थः विज्ञेयः वेदोक्तकर्माणि अनुष्ठेयानि इति च विज्ञायते । एवं च वेदविहितकर्मणः ज्ञानं वेदवाक्यार्थज्ञानाधीनम् । वेदो हि मन्त्रब्राह्मणोभयात्मकः । स चैकोऽपि प्रतिपाद्यर्थभेदात् कर्मोपासनज्ञानकाण्डत्वेन त्रिधा विभक्तः । तत्र परस्पर विरोधविपरीतभावनादिना वेदवाक्यार्थविचिकित्सायां प्रसक्तायां तन्निराकरणेन वास्तविकमर्थं बोधयितुं मीमांसाप्रवृत्तिर्जाता ।

केयं मीमांसा इति जिज्ञासायां **मान्** धातोः जिज्ञासार्थकात् निष्पन्ना विचारमर्थं ब्रूते । तथा च विचारशास्त्रं मीमांसाशब्दार्थः इति फलति । चतुर्दशसु विद्यास्थानेषु अन्तर्गतमिदं मीमांसाशास्त्रं पूर्वोत्तरभेदेन द्विविधं प्रसिद्धम् । वेदानां पूर्वभागनिर्णयाय पूर्वमीमांसाशास्त्रं प्रवृत्तम् । भगवान् जैमिनिः न्यायान् युक्तींश्च परिभाव्य सर्वांश्च मन्त्रब्राह्मणग्रन्थान् विमर्शपूर्वकमालोड्य श्रौतभागनिर्वचनोपयोगिनः न्यायान् एकत्र निबध्य द्वादशाध्यायात्मकं मीमांसाशास्त्रं प्रणीतवान् । जैमिनीयसूत्राणि निगूढार्थानि शब्दतः सङ्क्षिप्तानि अर्थतः गभीराणि न बुद्धिमुपारोहन्तीति करुणया भाष्यं प्रणिनाय शबरस्वामी । शबरस्वामिनामनन्तरं भाष्यविवेचनापराणां वार्तिकटीकाग्रन्थानां द्वे परम्परे भवतः । एका भाट्टपरम्परा द्वितीया प्राभाकरपरम्परा । अस्मिन् शास्त्रे वेदवाक्यानां विचारः कृतः इति हेतोः वाक्यशास्त्रमिति कथ्यते । वेदवाक्यविचारमूलकत्वेन को धर्मः कोऽधर्मः इति विचारः कृतः । धर्मं विज्ञाय धर्मः अनुष्ठेयः अधर्मं विज्ञाय अधर्मः त्यक्तव्यः । एवं कृते क्लेशपरिहारो भूत्वा सुखप्राप्तिर्भवत्येव इति शास्त्रसिद्धान्तः । शास्त्रेऽस्मिन् द्वादश अध्यायाः वर्तन्ते । प्रथमाध्यायः प्रमाणाध्यायः । आदौ **अथाऽतो धर्मजिज्ञासा** इति सूत्रेण धर्मजिज्ञासा कर्तव्या इत्युक्तम् । **चोदना लक्षणोऽर्थो धर्मः** इति सूत्रेण धर्मलक्षणमुक्त्वा चोदनैव धर्मे प्रमाणमिति उपपादितम् । ततः प्रमाणादीनि निरूपितानि । द्वितीयाध्याये कर्मभेदः, तृतीये कर्मणामङ्गाङ्गित्वं, चतुर्थे क्रत्वर्थपुरुषार्थविचारः,



[redacted]

ISSN : 2320-740X

पञ्चमे क्रम: षष्ठे अधिकार: सप्तमे सामान्यातिदेश: अष्टमे विशेषातिदेश:, नवमे ऊह:, दशमे बाध:, एकादशे तन्त्रं, द्वादशे प्रसङ्गनिरूपणं कृतम्।

प्रस्तुते देवताविचार: निरूप्यते । नवमेऽध्याये देवताप्रसाद एव प्रयोजकोऽस्तु इत्याशङ्का प्रसङ्गात् निराक्रियते । अर्थात् यदाग्नेयोऽष्टाकपाल इत्यादि वाक्यविहिता: आग्नेयादि यागा: देवताप्रसादद्वारा स्वर्गादिफलार्था: उत अपूर्वद्वारा स्वर्गादिफलार्था: इति विचार्यते । देवताप्रसादेनैव स्वर्गादिफलप्राप्ति: । देवताया: यागे सम्प्रदानत्वेन प्राधान्यात् यागस्य च **यजदेवपूजासङ्गतिकरणदानेषु** इति शाब्दिकस्मरणात् यागस्य देवपूजारूपतया पूजायाश्च विग्रहाद्यपेक्षितत्वाच्च ते च अर्थवादै कल्प्यन्ते। स यथा **सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु** इत्यनेन विग्रह:, **अग्निरिदं हविरजुषत** इत्यनेन हवि:स्वीकार:, **अद्धीन्द्र पिब च प्रस्थितस्य** इत्यनेन हविर्भोजनम्, **तृप्त एवैनमिन्द्र: प्रजया पशुभिस्तर्पयतीत्यनेन** तृप्ति: तया च तृप्त्यैव प्रसादश्च कल्प्यते। यागेन तोषिता देवता एव प्रसादद्वारा अभीष्टं फलं ददाति । इत्थं च याग: देवताप्रसादार्थ: देवताप्रसादेन स्वर्गादिप्राप्ति: न त्वपूर्वेण इति प्राप्ते - देवताविग्रहादिपञ्चकं निराकृत्य अपूर्वद्वारेणैव स्वर्गादिफलप्राप्ति: इति सिद्धान्तयन्ति । तथा हि यदि इच्छारूप: तदा तस्य इच्छात्वेन तत्फलं प्रति कारणत्वे अतिप्रसङ्गापत्ते: अवश्यं आग्नेयादि कर्तु: तत्फलं भवतु इत्येवमाकारेच्छात्वेन तत् वाच्यम्। तथा च कारणतावच्छेदके गौरवम्। दर्शादिजन्यफलभोगे जातेऽपि तत्कर्तृत्वानपायात् अन्यकृतदर्शपूर्णमासजन्यप्रसादात् अन्यश्च फलप्राप्तिश्च । किं च एतादृशप्रसादस्य उत्पत्तिरपि कदा भवतीति वक्तुं न शक्यते। यदि ब्राह्मणतर्पणान्ते तदा यागानन्तरं नष्टत्वादेव उत्पत्यनापत्ति: । तत् यागेभ्योऽपि अवान्तरप्रसादा: उत्पद्यन्ते इति चेत् तदा देवतानाम् अमोघेच्छात्वस्य अर्थवादेषु प्रतिपादनात् दैवात् अग्नीषोमाद्यकरणेऽपि फलप्राप्ति: । तथा च देवताप्रसादस्य निर्वक्तुमशक्यत्वात् कारणतावच्छेदके गौरवाच्च न देवताप्रसादद्वारा फलप्राप्ति: । किं च निषेध्येषु कर्मसु देवताभावात् देवताप्रसादस्य व्यापारत्वकल्पनं न सम्भवति। तत्र अवश्यमेव अपूर्वस्य द्वारत्वं कल्पनीयं भवति। तद्वत् विधेयेष्वपि कर्मसु अपूर्वस्यैव द्वारत्वोपपत्तौ प्रसादस्य एव उपकल्पनं न युक्तम्। अर्थवादानां स्वार्थे प्रामाण्यं नास्तीति अर्थवादाधिकरणे प्रतिपादितम्। तेषां न स्तुतिलक्षणात: अन्या काचित् लक्षणा। अन्यतात्पर्यकस्य वाक्यस्य अन्यत्र प्रामाण्यकल्पनं न युक्तम्। देवताप्रसादादिप्रतिपादकानाम् अर्थवादानां स्वशक्यार्थे प्रामाण्यं न सम्भवति । अत: तद्वाक्यानुसारेण न देवताविग्रहस्वीकार: । किं तु शब्दमात्रं देवता । अर्थस्तु प्रातिपदिकानुरोधात् चेतनोऽचेतनो वा कश्चित् स्वीक्रियते, न तु विग्रहादिमान् । उपासनादौ परं ध्यानमात्रमाहार्यमिति जैमिनिमतनिष्कर्ष: । अत एवोक्तं पार्थसारथिना - **मन्दधियस्तु शब्दालव: तात्पर्यमजानाना: बाह्यं तु नाम देवताफलं प्रयच्छतीति** । वस्तुतस्तु कर्मणैव तथा च आग्नेयादियागै: अपूर्वोत्पत्ति: । अपूर्वेण स्वर्गादि फलप्राप्ति: इति सिद्धान्त: ।



ISSN : 2320-740X

आधारग्रन्था:-

१)शाबरभाष्यम्

२)भाट्टदीपिका

*****

## लघुपाणिनीये शिक्षाकाण्डस्य विवेचनम्

✍आनन्द पण्ड्या

शोधच्छात्रः

**व्याकरणदुर्गमार्गेष्वप्रौढान् बालकान् प्रचारयितुम्।**
**लघुपाणिनीयमेतत् प्रणीयते राजराजेन॥**

अस्मिन् काण्डे राजराजेनवर्यै अत्यन्तवैज्ञानिकरीत्या सूत्राणां विभागः कृतो वर्तते, ग्रन्थेऽस्मिन् सिद्धान्तकौमुदी एवं प्रक्रियादिग्रन्थेभ्यः भिन्नरूपेण सूत्राणां विभागः आचार्यैः अकारि । यथा - शिक्षाकाण्डेऽपि पुनः चतुर्धा विभक्तः ते च –

- संज्ञाप्रकरणम्
- परिभाषा प्रकरणम्
- सन्धिप्रकरणम्
- शब्दविभागः,

अत्र ग्रन्थे संज्ञाप्रकरणे सिद्धान्तकौमुद्यापेक्षया अधिकानि सूत्राणि लिखितानि तानि–

१) उपदेशेऽजनुनासिक इत् २) हलन्त्यम् ३) न विभक्तौ तुस्माः ४) आदिर्ञिटुडवः ५) षः प्रत्ययस्य ६) चुटू ७) लशक्वतद्धिते पर्यन्तं सर्वोऽपि इत्संज्ञाप्रकरणविशेषः संज्ञाप्रकरणे एव प्रतिपादितः । तत् पिपठिषूनाम् आदौ एव स्पष्टं भविष्यति इति । एवमेव संज्ञाप्रकरणे अनपेक्षितानि सूत्राणि यानि दीक्षितादिभिः प्रतिपादितानि तानि न स्वीकृतानि। तानि यथा-

१) आदिरन्त्येन सहेता, २) येन विधिस्तदन्तस्य, ३) अणुदित्सवर्णस्य चाप्रत्ययः, ४) न वेति विभाषा, ५) ह्रस्वं लघु, ६) दीर्घञ्च, ७) संयोगे गुरु, ८) अदर्शनं लोपः इत्यादिसूत्राणि एतेषां सूत्राणां तत्र-तत्र विधिसूत्रैः सह एव तत्र-तत्र देशे उपन्यस्तानि वर्तन्ते । एतेन छात्राणां कृते अनपेक्षितवृद्धिगौरवम् अपि न भवतीति भाति।

पुनश्च सर्वत्र कौमुद्यादिग्रन्थानां खण्डनं कर्तव्यमिति हेतुना एतैरयं ग्रन्थः न प्रतिपादितः अत एव यत्र कौमुदी सम्यग् वर्तते तेषु स्थलेषु तथैव स्वीकृतम् अपि वर्तते । अतः अयं ग्रन्थः



[redacted]

ISSN : 2320-740X

छात्राणां साहाय्यार्थमिति एकमात्रप्रयोजनेन प्रणीतः । अतः एतादृशं सुचारुरीत्या राजराजेन शिक्षाकाण्डे संज्ञाप्रकरणं व्यवस्थितम्।

अथ परिभाषाप्रकरणम्

लाघवाय संदेहवारणाय च शास्त्रेषु स्वातन्त्र्येण निबद्धाः व्यवस्थाः परिभाषाशब्देनोच्यन्ते । परिभाषाज्ञानं विना विधिसूत्रार्थबोधो न स्यादिति ताः व्याख्यायन्ते-

सूत्रैस्तावत् आगमः, आदेशः, प्रत्यय इति प्रायस्त्रिविधानि कार्याणि विधीयन्ते। तत्र प्रत्ययः प्रकृतेः पर एव कर्तव्य इति नियमः । आगमाः कदाचिदादौ, अन्यदान्ते, जातुचिन्मध्ये । आदेशः कदाचिदादेः, अन्यदान्त्यस्य, जातुचित् सर्वस्य च। तत्र नियमः परिभाषाभिः क्रियते।

एवमेव शिक्षाकाण्डे द्वितीयप्रकरणं भवति परिभाषाप्रकरणम् । तत्रापि कानिचन् सूत्राणि परिवर्तितानि। यथा- १) अणुदित्सवर्णस्य चाप्रत्ययः २) आदिरन्त्येन सहेता, ३) येन विधिस्तदन्तस्य, ४) यथासंख्यामनुदेशः समानाम्, ५) उरण् रपरः, ६) एच् इग्घ्रस्वादेशे इत्यादीनि। एवमेव अनपेक्षितानि सूत्राणि १) इको गुणवृद्धिः, २) अचश्च इत्यादि सूत्राणि।

सन्धिप्रकरणम्

प्रकृतिप्रत्यययोः पदयोर्वा मेलने पूर्वान्त्यवर्णस्य परादिवर्णस्य उभयोर्वा ये विकारा उत्पद्यन्ते, तानि सन्धिकार्याणि । विकारश्च आदेशः, आगमः, द्वित्वम्, लोप इत्येषामन्यतम एव । संधिस्तावत् त्रिविधः संभवति- पदमध्यमात्रे कर्तव्यः, पदान्तमात्रे कर्तव्यः, उभयत्रापि कर्तव्य इति । तत्र पदमध्यमात्रे कर्तव्यः संधिर्विरल एव; प्रकृतिप्रत्ययविवेचनं चापेक्षते। संधिप्रकरणेऽस्मिन् उभयसंधिः पदान्तसंधिश्चोच्यते। तत्र च यत्र स्वरो विकार्यः सः स्वरसंधिः प्रथमं कथ्यते-

अस्मिन् प्रकर्णेऽपि एतैः आचार्यैः सूत्राणाम् अपेक्षितानपेक्षितविचारं कृत्वा बहूनां सूत्राणां परिवर्तनं कृतं वर्तते।

अथ शब्दविभागः

वर्णैरक्षराण्यारन्यन्ते; अक्षरैः प्रकृतयः; प्रकृतिभिः पदानि ; पदैर्वाक्यानि; वाक्यैर्भाषा इति हि क्रमः। तत्र वर्णाः व्याख्याताः विभक्ताश्च। अक्षराणां विभागश्छन्दःशास्त्रविषयोऽपि व्याकरणेऽपि क्वचिदुपयुज्यत इति सोऽपि प्रदर्श्यते -

शब्दे विभागेऽपि अत्यन्तचातुर्येण सूत्राणा चयनं महोदयेन कृतं दृश्यते तेन कानिचन सूत्राणि पठ्यन्ते चेत् बहूनां शब्दानाम् अनायासेन ज्ञानं भवति, अतः अयं ग्रन्थः छात्रान् बहूपकरोतीति।

निष्कर्षः -



ISSN : 2320-740X

सत्स्वपि बहुषु व्याकरणग्रन्थेषु राजराजवर्येण अयं ग्रन्थः प्रणीतः तस्य एकमात्रकारणम् इदमेव वर्तते यत् अत्यन्ताल्पपरिश्रमेण व्याकरणस्य व्युत्पत्तिपुरस्सरं ज्ञानं यथा स्यात् तथा छात्रान् उपकर्तुम् अयं ग्रन्थः लिखितः इति।

*****

## पद्मभूषण मीमांसा-केसरी महामहोपाध्याय श्रीपट्टाभिरामशास्त्रिविरचित मीमांसानयमञ्जर्यनुसारेण शब्दान्तरात् कर्मभेद विवेकः

✍ **भरत हर्डिकरः**
शोधच्छात्रः

ओं नमो जैमिन्युपवर्षशबरस्वामिकुमारिलादिभ्यो मीमांसाशास्त्रसम्प्रदानकर्तृभ्यो वंशर्षिभ्यो नमो गुरुभ्यो महद्भ्यः।

निर्मन्थ्यनिगमसिन्धून् विविधन्यायाभिधानमन्थानैः।
धर्मसुधामुद्धरते भूयो मुनये नमोस्तु जैमिनये॥

वेदाधीतधर्माज्ञातपुरुषस्य वेदार्थतात्पर्यनिर्णयार्थं प्रवृत्तमिदं मीमांसाशास्त्रम्। मीमांसापदस्य को वा अर्थः इति चेत् मान् पूजायामिति धातुना निष्पन्नोऽयं मीमांसाशब्दः पूजितविचारः इति । वेदबोधितधर्माधर्मविचारो मीमांस्यत इति **"पूजितविचारवचनोऽयं"** मीमांसाशब्दः । अस्मिन् मीमांसाशास्त्रे **"धर्माख्यंविषयंवक्तुंमीमांसायाःप्रयोजनम्"** इति वार्तिकोक्तदिशा धर्मविचारप्राप्तिः तज्ज्ञानञ्च अस्य शास्त्रस्य विषयः। अत एव "**धर्मे प्रमीयमाणे हि वेदेन करुणात्मना**" इति अभियुक्तोक्तिबलात् मीमांसाशास्त्रस्य धर्मसम्बन्धः सुस्पष्टमवगम्यते । "**धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मे सर्वं प्रतिष्ठितम् धर्मेण पापमनुदति । तस्मात् धर्मं परमं वदन्ति**" इत्यादीनि श्रुतिवाक्यानि धर्मस्य जगत्प्रतिष्ठापकत्वं पापनाशकत्वं च बोधयन्ति।

तत्र को नाम धर्मः इति चेत् वेदबोधित इष्टसाधनताको धर्मः। वेदबोधित अनिष्टसाधनताको अधर्मः इति।

स्वाध्यायप्रवचने एव तपो मन्यमानाः विद्यायाः संरक्षणार्थं ये प्रयतन्ते ते तत्रोत्कृष्टतराः । ताभ्यां सहविद्यायाः प्रचाराय वृद्ध्यै च ग्रन्थानां रचनयासम्पादनेन तत्पोषकाणां प्रोत्साहनेन छात्राणामाकर्षणेन च ये प्रयतन्ते ते चोत्कृष्टतमाः भवन्ति। तत्र आधुनिकेषु मीमांसकेषु अन्यतमाः भवन्ति श्री पट्टाभिराम शास्त्रिणः।

तत्र पट्टाभिरामशास्त्रिविरचितमीमांसानयमञ्जरी इत्याख्ये ग्रन्थे द्वितीयाध्यायस्य द्वितीये पादे कर्मभेदबोधकानि षट् प्रमाणानि निरूप्यन्ते । तद्यथा शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तराणीति । शब्दान्तरस्थले धात्वर्थभेदस्य स्पष्टत्वेन, भावनाभेदः सुखेन उपपादयितुं शक्यते इत्यनेन सूचीकटाहन्यायेन प्रथमं



ISSN : 2320-740X

तस्यैव निरूपणं भवति । शब्दान्तरमित्यस्य कोऽर्थः इति चेत् अपर्यायधातुना निष्पन्नम् एकप्रकरणगताख्यातमेव शब्दान्तरमिति प्राचीनाः मीमांसकाः । विभिन्नधात्वर्थकत्वं शब्दान्तरत्वं इति अर्वाचीनाः ।

ज्योतिष्टोमप्रकरणे श्रूयते "सोमेन यजेत, हिरण्यमात्रेयाय ददाति, दाक्षिणानि जुहोति" इति । अत्र प्रत्ययस्य एकत्वेपि यजन-दान-होमरुपाणां धात्वर्थानां भेदात् कर्म भिद्यते वा उत बहुभिः धात्वर्थैः अनुरक्ता एका एव भावना भवति वा इति सन्देहः ।

पूर्वपक्षः - भावनाबोधकः प्रत्ययः सर्वत्र एकः एव वर्तते । तस्मात् तेन या भावना उच्यते सापि एका एव । धातुभेदात् भावना नैव भिध्यते । भावनायः प्रतिपादनं प्रत्ययेनैव भवति न तु धातुना । यतः "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः, तयोस्तु प्रत्ययः प्राधान्येन" इति न्यायेन प्रत्ययः प्रधानं भवति धातुः गुणभूतं भवति । यदि भावना भिद्यते तेन अपूर्वमपि भिद्यते । अनेकापूर्वकल्पना गौरवाय भवति । सा तु सर्वथा नैव युक्ता । अतः अनेकधातुविशिष्टा एका एव भावना इत्येकः पक्षः ।

अत्र शास्त्रिचरणाः उदाहरन्ति यथा - धातुभेदेन प्रत्ययानामपि भिन्नत्वात् या भावना प्रतिपाद्यते तस्याः अपि भिन्नत्वमेव इति न वक्तव्यम् । यत एकैव देवदत्तः एकदा पीताम्बरधारी भवति समनन्तं रक्ताम्बरधारी भवति चेत् अम्बरभेदे सत्यपि देवदत्तः भिन्नः नैव भवति । अतः धातुभेदात् भावना भिद्यते इति वक्तुं न शक्यते ।

अत्र शास्त्रिचरणानाम् इदं वैशिष्ट्यं यत् लौकिकोदाहरणानि उपस्थाप्य गभीरान् मीमांसाशास्त्रीयविचारान् स्पष्टतया प्रतिपादयन्ति । किञ्च धातोरभावे प्रत्ययः प्रयोक्तुमनर्हो भवति किन्तु स्ववाच्यार्थम् उपस्थापयितुं शक्यते । यतः प्रत्ययार्थेन भावनायाः स्वीकरणं क्रियमाणत्वात् प्रागुक्तरीत्या यदि भावना भिद्यते तर्हि फलमपि भिन्नभिन्नमेव भवति । अत्र शास्त्रिचरणानां युक्तिं पश्यामः । वस्त्रकन्चुकादीनां लम्बनाय कृष्णमृगशृङ्गे नागदन्ते वा शाखारुपेण प्ररुढानि लघूनि तद्गतानि शृङ्गानि वस्त्रलम्बनरुपमेकं कार्यं साधयन्ति तथैव धात्वर्थाः यागदानहोमरुपा अपि ।

अतः सर्वेऽपि प्रत्यया एकामेव भावनां प्रतिपादयन्ति इति पूर्वपक्षः ।

तत्र सिद्धान्तः – आख्यातमेव भावनायाः प्रयोजकम् । किन्तु, तच्चाख्यातं प्रतिधातु भिन्नं भवति । बहूनां धातूनामुपरि एक एव आख्यातप्रत्ययः न श्रूयते । व्याकरणेऽपि धातुसमूहस्य कृते एकमाख्यातं न विहितम् । अतः धातुभेदात् भावना भिद्यते ।

शब्दान्तरे धातुभेदे सति कर्मभेदः भावना भेदः स्यात् । अत्र कर्मपदेन भावनारूपो व्यापारः परिगृह्यते । यद्यपि प्रत्ययस्य एकरुपत्वमेव तथा स्वार्थाभिधाने समर्थोऽपि भवति किन्तु, तस्यार्थबोधनाय धातुरपेक्षा वर्तते यतः "न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः" इति न्यायात् । एकस्य प्रत्ययस्य नाना धात्वर्थानुरागः न दृश्यते । धात्वर्थानुरक्ता एका भावना इति व्यवहारः । यथा नीलो घटः पीतो घटः इत्यत्र घटत्वस्य एकत्वेपि नीलघटज्ञानं पीतघटज्ञानसंज्ञकं न भवति । तथैव प्रत्ययार्थस्य एकत्वेऽपि धात्वर्थभेदेन कर्मापि भिद्यते ।

कृष्णमृगशृङ्गस्य यः दृष्टान्तः प्रदर्शितः तत्रापि उष्णीलम्बनं, कञ्चुकलम्बनं, उत्तरीयलम्बनम्, कम्बलम्बनम् इति भिन्नानि कार्याणि भवन्ति तथा ज्ञानभेदोपि भवति । अतः धातुभेदात् कर्म भिद्यते इति सिद्धान्तः ।



ISSN : 2320-740X

[redacted]

अनुशीलित ग्रन्थाः – मीमांसानयञ्जरी
भाट्टदीपिका
भाट्टसङ्ग्रहः
जैमिनीय न्यायमाला
मीमांसापरिभाषा

*****

## आत्यन्तिकी दुःखनिवृत्तिः अपवर्गः

✍ **नारायणरायकरः**
शोधच्छात्रः

विदितचरमेव इदं हि समेषां यत् विद्वत्समाजे पदार्थानां निर्दुष्टस्वरूपनिर्वचनपरत्वेन प्रसिद्धिमापन्नं न्यायशास्त्रं गुणगौरवेण दर्शनशास्त्रेषु विशिष्टं स्थानं भजत इति । नापरं शास्त्रं विद्यते यत् एकमप्यविहाय कृत्स्नमपि जगज्जातं तत्त्वातत्त्वनिर्णयपुरस्सरं सप्तसु पदार्थेषु अन्तर्भावाय प्रवृत्तम् । अर्थात् शास्त्रमिदं समस्तमपि जगत् पदार्थेषु विभज्य लक्षणप्रमाणाभ्याम् एकैकस्य पदार्थस्य तदन्तर्भूतानां भेदोपभेदानां तत्वं सुष्ठु निरूपयितुं प्रयतते । अत अत एवास्मिन् शास्त्रे साक्षात्परम्परया वा सर्वेषां विचाराणां पदार्थत्वेनान्तर्भावादस्य शास्त्रस्य सार्वत्रिकत्वं सर्वशास्त्रोपकारकत्वं च सिध्यति । इत्थं सर्वशास्त्रसहकारितया तीक्ष्णमतिप्रवर्धकतया प्रशंसितेऽस्मिन् शास्त्रे विचारितेषु विचारेषु मोक्षविचारोऽपि विचारणीयो विचारः । श्रुतिप्रतिपादितेषु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु चरमभूतः सर्वैरप्यर्जनीयः पुरुषार्थः मोक्षः । अपवर्गः इत्यस्यैव नामान्तरम् । यथा वेदान्तप्रभृतिषु विविधशास्त्रेषु तत्तच्छास्त्रसिद्धान्तानुगुणम् अपवर्गस्वरूपविवेचनं कृतं दृश्यते । तथैव प्रमाणादिषोडशपदार्थानां तत्वावगमेन निःश्रेयससिद्धिर्भवतीति प्रतिपादयति न्यायशास्त्रेऽपि स्वशास्त्रपरिभाषया अपवर्गस्वरूपं सिद्धान्तितम्। तदत्र सङ्क्षेपेण निरूप्यते।

नैयायिकैः दुःखानामात्यन्तिकी निवृत्तिरपवर्गः इत्यभ्युपगम्यते । एतन्मते सर्वस्याप्यनुभूयमानस्य सुखस्य अनित्यत्वान्मोक्षस्य सुखरूपत्वं न सम्भवति । तथा च सुखस्य अपवर्गस्वरूपत्वस्वीकारे मोक्षस्याप्यनित्यत्वापत्तिः। शाश्वतसुखस्य क्वचिदप्यवर्तमानत्वात् मोक्षः दुःखनिवृत्तिरूप एव न तु सुखं । तथा च दुःखम् एकविंशतिविधम् । शरीरं षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेति । दुःखायतनत्वेन शरीरं दुःखम् । इन्द्रियाणि विषयाः बुद्धयश्च एतानि तत्साधनानि भवन्ति । अतः एतानि दुःखे एवान्तर्भवन्ति । सुखमपि दुःखस्य बीजभूतम् । अत एव सुखमपि दुःखस्वरूपमेव । दुःखं हि स्वरूपतो दुःखमेव । अत एतेषां दुःखानाम् आत्यन्तिकी निवृत्तिरेव अपवर्ग इति ।



[redacted]

ISSN : 2320-740X

किमेवं दुःखानामात्यन्तिकी निवृत्तिरपवर्ग इति वक्तव्यम् ? केवलं दुःखानां निवृत्तिरेव अपवर्ग इति कथनेनैव चरितार्थत्वादिति चेत्, न। यदि केवलं दुःखनिवृत्तिरपवर्गः इत्युच्यते तदा सांसारिकदुःखनिवृत्तेरपि अपवर्गरूपत्वमङ्गीकर्तव्यं भवति । अतः केवलं दुःखनिवृत्तिरपवर्ग इत्यनुक्त्वा आत्यन्तिकी दुःखनिवृत्तिरपवर्गः इत्युक्तम्। तथा च सांसारिकी या दुःखानां निवृत्तिः सा आत्यन्तिकी दुःखनिवृत्तिर्भवितुं नार्हति । अत्रात्यन्तिकत्वं नाम स्वसमानाधिकरणदुःखप्रागभावासमानाधिकरणत्वमित्यर्थः । तेन स्वसमानाधिकरणदुःखप्रागभावासमानाधिकरणदुःखनिवृत्तिरपवर्ग इति आत्यन्तिकी दुःखनिवृत्तिरिति पदस्यार्थः। संसारकाले उत्पद्यमानानां सर्वेषामपि दुःखानां विनाशकाले पुनरग्रे उत्पत्स्यमानानां दुःखानां प्रागभावो वर्तते। तेन सांसारिको यो दुःखध्वंसः स सर्वोपि स्वसमानकालीनदुःखप्रागभावकालीन एव भवति । परमात्यन्तिकी दुःखनिवृत्तिर्न तथा । मोक्षावस्थायां हि जायमानाया दुःखनिवृत्तेः परं कस्यापि दुःखस्योत्पत्तिर्न संभवति। तेन मोक्षकालीनदुःखनिवृत्तिसमानकाले कस्यापि अग्रिमदुःखस्य प्रागभावोऽपि न तिष्ठति । अतो मोक्षकालीनो यो दुःखध्वंसः स्वसमानकालीनदुःखप्रागभावासमानकालीन एव भवति । तादृशदुःखध्वंसः संसारकाले नानुभूयते इति।

यद्येतादृशदुःखनाश एव मोक्ष इति कथ्यते तर्हि प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयससिद्धिरिति सूत्रोक्तरीत्या मोक्षस्य तत्वज्ञानसाध्यत्वं कथं सिध्यतीति प्रश्नः । तस्य समाधानमित्थम्- तत्त्वज्ञानेन मिथ्याज्ञानवासनानाशः वासनानाशे च दोषस्य वासनाविशिष्टरागादेरभावः, विशेषणाभावे विशिष्टाभावात्, तादृशरागादिरूपहेत्वभावे च प्रवृत्तेर्धर्माधर्मरूपाया अभावोऽनुत्पत्तिः, तदनुत्पादे प्रारब्धकर्माधीनदेहान्य-देहसम्बन्धरूपजन्माभावः, भोगतत्त्वज्ञानाभ्यां प्रारब्धतद्भिन्नकर्मनिवृत्तिरिति जन्माभावे दुःखानुत्पाद इति । तथा च स्वसमानाधिकरणदुःखसमानकालीनत्वस्वरूपविशेषणांशे तत्त्वज्ञानस्य प्रयोजकत्वात् मुक्तेः तत्वज्ञानसाध्यता सिध्यति । तथा च सूत्रं- "दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इति।

नव्यनैयायिकास्तु योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवृत्तिगुणानां कारणत्वात् स्वोत्तरोत्पन्नगुणेनैव दुःखध्वंसरूपमुक्तिसम्भवेन तत्र तत्त्वज्ञानस्य अपेक्षा न सम्भवतीति दुःखपदस्य दुःखकारणीभूतदुरितपरतया व्याख्यानं कुर्वन्ति। दुरितं हि न योग्यविभुविशेषगुणः। अतस्तस्य स्वोत्तरोत्पन्नगुणेन नाशो न सम्भवति। तादृशदुरितनाशरूपमोक्षः तत्वज्ञानेनैव सम्भवतीति वदन्ति।

इत्थं दुःखनिवृत्तिरूपमुक्तेस्तत्त्वज्ञानसाध्यत्वं सङ्क्षेपेण निरूपितम् । पुनरपि कश्चिदाक्षेपः चतुर्विधपुरुषार्थेषु सर्वैरप्यर्थ्यमानत्वात् अपवर्गो हि परमपुरुषार्थ इति सिद्ध एव । स चापवर्गः दुःखनिवृत्तिरूप इत्युररीकृतमस्माभिः। परं एवं भूतस्यापवर्गस्य पुरुषार्थता कथं सिद्ध्यतीति प्रश्नः। तथा च उदयनाचार्यकृतेपरिशुद्धिनामके व्याख्यानग्रन्थे पूर्वपक्षोपस्थापनपुरस्सरं आदौ दुःखनिवृत्तेः पुरुषार्थत्वं



ISSN : 2320-740X

निराकृतम् । अन्ते च समादानोपस्थापनपुरस्सरं पुनस्तस्य पुरुषार्थत्वं व्यवस्थापितम् च । तदत्र सङ्क्षेपेण निरूप्यते ।

अत्र पूर्वपक्षः - दुःखनिवृत्तिर्हि पुरुषार्थ एव किन्तु स्वरूपतो तस्य पुरुषार्थता न सिद्ध्यतीति । अस्यायमाशयः - यदा दुःखं नानुभूयते तदैव सुखं भवति । यथा सृक्चन्दनवनितादिनि सुखार्थिनां सुखप्राप्तौ सुखसाधनानि भवन्ति तथैव दुःखाभावोऽपि सुखसम्पादनद्वारा सुखसाधनं भवति । किन्तु तदेव तस्य पुरुषस्य न समीहितमिति । यदा दुःखाभावो वर्तते तदैव सुखमनुभवितुं शक्यमतस्तदर्थमेव दुःखं निवर्तयितुं प्रवर्तते इति ।

अत्र समाधानम् – तन्न । यदि कश्चित् सुखप्राप्त्यर्थमेव दुःखनिवृत्तिमिच्छतीत्युच्यते तर्हि भोजनादिसुखानुभूतिदशायामेव बुभुक्षादिदुःखानां निवृत्तिदर्शनात् बुभुक्षादिदुःखानां निवर्तनाय भोजनादिसुखं प्राप्तुं प्रवर्तते एतेन अत्र दुःखनिवृत्तिरिव सुखमपि तस्य नाभीप्सितमित्यपि उपपादयितुं शक्यमस्ति । एतेन सुखस्यापि पूर्वोक्तरीत्या स्वरूपतः पुरुषार्थत्वं न स्यात् । अतः एवं न भवितुमर्हति । यथा लोके दुःखानुभूतेरसत्वदशायामपि क्वचित् 'अहं सुखी स्या'मिति सुखविषयकप्रवृत्तेर्दृष्टत्वात् सुखमेव तस्याभीप्सितमिति वक्तुं युक्तं तथैव यद्यपि सुखं नानुभूयमानमस्ति तथापि 'दुःखं हास्या'मीति दुःखनिवृत्तिविषयकप्रवृत्तेः क्वचिद्दृष्टत्वात् दुःखनिवृत्तिरपि पुरुषस्य समीहितेति वक्तुं युक्तमेव । यदा सुखस्यानुभूतिरस्ति तदा दुःखस्याभावः, यदा दुःखाभावः तदा सुखस्यानुभूतिरिति सुखदुःखनिवृत्योः समव्याप्तिः प्रतीयते । अत एव परस्परमनयोर्निरपेक्षमेव पुरुषार्थत्वं सिद्ध्यति ।

अत्र पुनराक्षेपः - अस्त्वनयोः पुरुषार्थत्वमथापि दुःखनिवृत्तेस्तु अनुभूयमानतयैव पुरुषार्थत्वं सिद्ध्यति अन्यथा न सिद्ध्यति । यथा विषसेवनादिभिर्जायमानायां मोहावस्तायां दुःखनिवृत्तेर्विद्यमानत्वेऽपि तन्नानुभूयते । अतस्तादृशदुःखनिवृत्यर्थं कस्यापि प्रवृत्तिर्न दृष्यते । यद्येवम् तर्हि मोक्षावस्तायामपि दुःखनिवृत्तेरननुभूयमानत्वात् मोक्षोऽपि पुरुषार्थो भवितुं नार्हति । तदुक्तं

**'दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते ।**

**न हि मूर्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः ॥'**

अत्र समाधानम् - नैवं मन्तव्यम् । अननुभूयमानापि दुःखनिवृत्तिः पुरुषार्थो भवितुमर्हति । तदित्थम् । लोके क्वचित् पुत्रादिवियोगवशादनुभूयमानस्य सोढुमशक्यस्य दुःखस्य निवर्तनाय केषाञ्चिद्विषसेवनादिषु प्रवृत्तिर्दृश्यते । केवलं विषसेवनादिकर्माचरणं शास्त्रनिषिद्धमिति मन्वाना विवेकिनो न तावत् प्रवर्तन्ते । एतेन तादृशकर्मणां पुरुषार्थत्वं निराकर्तुं न शक्यते । यतो हि परस्त्रीकामनादिषु हीनकर्मसु शास्त्रनिषेधाङ्कुशनिवारिताः प्रेक्षावन्तो न प्रवर्तन्ते । किन्तु तत्राप्यनुभूयमानमल्पीयः सुखमपि पुरुषार्थ एव । परन्तु सुखमिदं महतः अनर्थस्य कारणं भवतीत्येव वैलक्षण्यम् । अन्यथा एतादृशकर्मणां निषेधं वदतां शास्त्रवाक्यानां वैयर्थ्यं स्यात् । तस्मात् विषसेवनपरस्त्रीकामनादिकर्मणां पुरुषार्थत्वं सिद्ध्यतोऽपि तेषां



ISSN : 2320-740X

लोकशास्त्रविरोधाद्विवेकिनां तत्र प्रवृत्तिर्न जायते । किन्तु एत एव विवेकिनः घनतरसांसारिकदुःखस्य निवर्तनायैव तीव्रतररोगादिभिः परिपीडिताः अपि दुःखमनुभवन्त एव प्रयागादिषु वटप्रपातनिराहारादिभिः देहत्यागे प्रवृत्ताः भवन्ति। अत्र न कोऽपि लोकशास्त्रविरोधो दृष्यते। दुःखनिवृत्यर्थमेव प्रेक्षावतां प्रवृत्तिर्दृश्यते न तु दुःखनाशमनुभविष्यामीति । यद्यनुभूयमाना दुःखनिवृत्तिरेव पुरुषार्थ इति कथ्यते तर्हि लोके अनुभूयमानायाः रोगकण्टकादिजन्यदुःखनिवृत्तेः पुरुषार्थत्वं न स्यात् । तादृशदुःखनिवृत्तेः सर्वदा अनुभवविरहात् सुषुप्त्यवस्थायां कस्याप्यनुभवस्यावर्तमानत्वाच्च । यदि किञ्चित्कालमात्रमनुभूयमानायाः दुःखनिवृत्तेरेव पुरुषार्थत्वमङ्गीकर्तुमिष्यते तर्हि मुमुक्षुणां समाधिप्रभावात् किञ्चित्कालं दुःखनिवृत्तेरनुभूयमानत्वादस्यापि पुरुषार्थत्वमक्षतमेव । इत्थं यथाकथञ्चित् पुरुषैरर्थ्यमानत्वात् सुखं वा भवतु दुःखनिवृत्तिर्वा भवतु एतदुभयमपि स्वरूपतो पुरुषार्थ एव।

पुनरप्यत्र आक्षेपः - सांसारिकं सुखं हि दुःखमिश्रितत्वात् न तदुपादेयमिति तु सत्यमेव । तर्हि सांसारिकं दुःखमपि सुखमिश्रितत्वात् तस्यापि उपादेयत्वं स्यादेव, कुतो निराक्रियते ? इत्थं उपादेयभूतं दुःखं कथं वा हेयं भवितुमर्हति ? तर्हि लोके कुत्रापि हेयवस्तु किमपि न भवत्येव। तथा च मोक्षप्राप्तेः का वा आवश्यकता। तदुक्तम्।

**'यस्य दुःखमुपादेयं हेयं तस्य किमुच्यताम्।**
**हेयहीनस्य का मुक्तिः केन वाप्युपदिश्यते॥'** इति

समाधानम्- तन्न । मधुविषसम्पृक्तान्नस्य भोजने प्रवृत्तस्य रमणीयं क्षणिकसुखं भवति तथापि परिणामे घोरं दुःखमेव जायते । अतो विवेकिनस्तत्र न प्रवर्तन्ते । तथैव सांसारिकं सुखमपि किञ्चित्कालावस्थायी , ततः परं तादृशसुखं दुःखमेव सञ्जनयति । अतः सांसारिकं सुखं हेयमेव न तूपादेयम् । हेयस्य सर्वदा वर्जनीयत्वात् सांसारिकसुखमपि वर्जनीयमेव । इत्थं दुःखनिवृत्तेः पुरुषार्थत्वं सिद्धम् । तथा च आत्यन्तिकी दुःखस्य या निवृत्तिः स एव अपवर्गः । स एव परमपुरुषार्थ इति सर्वं सुष्ठूपपादितमेव।

*****

## मुहूर्तदोषाः

✍पवनः
शोधच्छात्रः

अस्माभिः विवाहार्थं यः मुहूर्तः निर्णीयते सः मुहूर्तः अत्यन्तं शुभः भवेत् । तदाधारेणपरस्परवधूवरयोः जीवनमार्गः भवति । मुहूर्तदोषाः बहवः सन्ति । तेऽपि सम्यग्ज्ञातव्याः । तदेवनिर्दुष्टः मुहूर्तः निर्णेतुं शक्यः। विविधग्रन्थकारैः प्रतिपादितम्। तद्यथाः-


ISSN : 2320-740X
[redacted]

**गण्डान्तदोषः**

ज्येष्ठापौष्णभसार्पभान्त्यघटिकायुग्मं च मूलाश्विनी ।
पित्र्यादौघटिकाद्वयं निगदितं तद्भस्यगण्डान्तकम् ॥
कर्काल्यण्डजभान्ततोऽर्धघटिकासिंहाश्वमेषादिगा ।
पूर्णान्तेघटिकात्मकं त्वशुभदं नन्दातिथेश्चादिमम् ॥

गण्डान्तं नाम सन्धिविशेषः। स च अनेकविधः नक्षत्रसन्धिः, तिथिसन्धिः, लग्नसन्धिः, योगसन्धिः, करणसन्धिः, वर्षसन्धिः, अयनसन्धिः, ऋतुसन्धिः, माससन्धिः, पक्षसन्धिः, दिनसन्धिः, रात्रि-मध्याह्न-प्रातः, सायं निशीथसन्धयश्च भवन्ति । तत्रतिथिनक्षत्रलग्नविशेषाणां यः सन्धिः स गण्डान्तदोषः भवति । तत्रादौ  नक्षत्रगण्डान्तम् उच्यते । ज्येष्ठः, रेवती, आश्लेषा एषां नक्षत्राणाम् अन्तेघतिकाद्वयं गण्डान्तमं तथा अश्विनी । मूला, मघा एषां नक्षत्राणाम् आदौघटिकाद्वयं गण्डान्तम् ।
रेवतीअश्विन्योः, आश्लेषामघायोः, ज्येष्ठामूलयोः अन्तरालवर्तिघटीचतुष्टयं नक्षत्रगण्डान्तम् इत्युच्यते तत्तुरत्नमालायाम् एवम् उक्तम् ।

पौष्ण्याश्विन्याः सार्पपित्र्यर्क्षयेश्वयच्चज्येष्ठामूलयोरन्तरालम् ।
तद्गण्डान्तं स्याच्चतुर्नाडिकं हि यात्राजन्मोद्वादकलेष्वनिष्ठम् ॥ इति ।

यथावसिष्ठेन

यदन्तरालं पितसाप्रयेश्च मूलेन्द्रियोराश्विनपौष्णयोश्च ।
भसन्धिगण्डान्तमिति त्रयं तद्यामप्रमाणं शुभकर्महन्तृ ॥ इति ।

कर्तरीदोषः

लग्नात्पापावृज्वनजूव्ययार्थस्थौ यदा तदा ।
कर्तरी नाम साज्ञेया मृत्युदारिद्र्यशोकदा ॥

यदापापग्रहौ लग्नात् व्ययार्थस्थावृज्वनृजूद्वादशस्थः पापग्रहो वक्रीस्यात्तदा कर्तरी नामदोषः जायत । इयं कर्तरि मृत्युदारिद्र्यशोकदा भवेत् । स ग्रहयोगः चन्द्रेण सूर्यः युतश्चेत् तदा दारिद्र्यं भवति । चन्द्रेण कुजः युतश्चेत् मरणं भवति । चन्द्रबुध- युतिश्चेत् शुभं भवति । चन्द्रगुरुयुतिश्चेत्सुखं भवति । चन्दशुक्रयुतिश्चेत् सफला, चन्द्रशनियुतिश्चेत्पत्युः वैराग्यं, अर्थात्विरहः, द्वौ पापग्रहौ युतौ चेत् मृत्युः भवति । अतः स ग्रहयोगः दुष्टः । त्याजः सः तदुक्तं मुहूर्तचिन्तामणौ :–

चन्द्रे सूर्यादिसंयुक्ते दारिद्र्यं मरणं शुभम् ।
सौख्यं सापत्न्यवैराग्य पापद्वययुते मृतिः ॥

तत्रैव यदाह नारदः :-



ISSN : 2320-740X

शशाङ्क ग्रहसंयुक्ते दोषः संग्रहसंज्ञकः ।
सूर्येण संयुते चन्द्रे दारिद्र्यं भवतिध्रुवम् ॥
कुजेन मरणं व्याधिः सौम्येन त्वनपत्यता ।
दौर्भाग्यं गुरुणा युक्ते सापत्न्यं भार्गवेण तु ॥
प्रवज्या सूर्यपुत्रेण राहुणा कलहः सदा ।
केतुना संयुते चन्द्रे नित्यं कष्टं दरिद्रता ॥

अष्टमलग्नदोषः :-

वधूवरयोः जन्मलग्नात् जन्मराशितश्च अष्टमराशिः विवाहे क्लिग्नराशिः न स्यात् । यदि भवति चेत्तदा मृत्युः वक्तव्यः ।

तद्यथा :-

जन्मलग्नभयोर्मृत्युराशौ नेष्टः करग्रहः ।
एकाधिपत्ये राशिशामैत्र्ये वा नैव दोषकृत् ॥

यदि एकाधिपत्यं वा मित्रत्वं वा स्यात्तर्हि दोषः न भवतीति ग्रन्थकाराणाम् अभिप्रायः ।

तत्रैव नारदः :-

दम्पत्योरष्टमं लग्नं त्वष्टमो राशिरेव च,
यदि लग्नगतः सोंऽपि दम्पत्योर्निर्धनः प्रदः ।
सराशि शुभयुक्तोपिलग्नं वा शुभसंयुतम्
लग्नं विवर्जयेत् यत्नात्तदंशश्चतदीश्वरान् ॥

पात-चण्डायुध-दोषः—

शूल, हर्षण, साध्य, वैधृति, व्यतीपात, गण्डान्त, विष्ठि इत्यादियोगयुक्तस्थितदिनेषु मुहूर्तः भवति चेत्पातचण्डायुधदोषः भवति । प्रकारान्तरेणपातदोषः कथ्यते ।

सूर्यस्थितनक्षत्रादारभ्य अष्टाविंशतिनक्षत्राणिविलिख्य अनुराधा, मघ, आश्लेष, श्रवण, चित्रा, रेवती इमानि नक्षत्राणि ज्ञात्वा तेषु नक्षत्रस्थानेषु रेखा कार्या । तासु रेखासु यदि विवाहनक्षत्रम् आगच्छति तदापातदोषः भवति । मुहूर्तकल्पदृमेतदेव गंशूसावैहव्यंयोगान्तमम्यत्तत्पातर्क्षं सर्वकार्ये विवर्ज्यम् इति ।

लत्तादोषः :-

लत्तदोषः कथं जायते इत्युक्ते कुजः यस्मिन्नक्षत्रे भवति ततः तृतीयनक्षत्रे बुधः, द्वाविंशतितमे नक्षत्रे बृहस्पतिः, षष्ठे नक्षत्रे, शुक्रः,चतुर्विंशतितमे नक्षत्रे शनिः, अष्टमनक्षत्रे राहुः, विंशतितमे नक्षत्रे सूर्यः, द्वादशनक्षत्रे, पूर्णचन्द्रः अष्टमे नक्षत्रे च भवति चेत्लतादोषः जायते ।

तदुक्तम्



ISSN : 2320-740X

त्र्याकृतिषट्जिननादनखभं हन्तिपुरः क्षितिजादपि खेटः ।
सूर्यइनप्रमितं परिपूर्णे लत्तपत्तीन्दुरगप्रममृक्ष्यम् ॥

वेधदोषः

पञ्चशलाकाचक्रे चन्द्रः यस्यां रेखायां भवति तस्यामेव नक्षत्ररेखायाम् अन्यः ग्रहः भवति चेत् वेधदोषः जायते। तदाविवाहः कर्तुं न शक्यते।

बाणदोषः

विवाहसमये सूर्यः वधूवरयोः जन्मराशितः द्वितीये, एकादशे, विंशतितमे, एकोनत्रिंशतितमे च अंशेषु अस्ति चेन्मृत्युबाणः दोषः इति। सूर्यः तृतीये, द्वादशे, एकविंशतितमे, त्रिंशतितमे च अंशेषु भवति अग्निबाणः इति। पञ्चचतुर्दश- त्रयोविंशतितमे च अंशेषु सूर्यः भवति चेत् नृपबाणः इति। सप्तम, षोडश, पञ्चविंशतितमे च अंशेषु सूर्यः भवति चेत् चोरबाण इति। नवमे, अष्टमे, सप्तविंषतितमे अंशे यदि सूर्यश्चेत् त्राशिबाणः इति भवति। तदर्थं बाणदोषाः यदि भवन्ति चेत्विवाहः न कार्यः ।

एकार्गलदोषः :-

विवाहसमये व्याघातः, गण्डः, व्यतीपातः, विष्कम्भः, शूलवैधृतिः, वज्रः, परिघाअतिगण्डः इति योगाः अपि च सूर्यस्थितनक्षत्रात् विषमनक्षत्रे अर्थात् ३,५,७ नक्षत्रेषु चन्द्रः भवतिचेत् एकार्गला भवति। तदा विवाहः न कार्यः ।

वैधव्ययोगः :-

यदि लग्नसमये चन्द्रः षष्ठाष्टमे सप्तमे कुजः भवति तर्हि वैधव्ययोगः। तूक्तम् अस्मिन्श्लोके:-

षष्टास्थः प्रश्नलग्नात् यदि इनदुर्लग्ने क्रूरः सप्तमे वा कुजः स्यात् ।
मूर्ताविन्दुः सप्तमे तस्य भूमौ रण्डा सा स्यादष्टमसंवत्सरेण ॥ इति

मुहूर्तभागे एते एकविंशतिदोषाः कथिताः। वधूवरयोः बहुषुगुणेषु सत्स्वपि एते दोषाः भवन्ति चेत्विवाहः न त्याज्यः इति उक्तम्।

एवं ज्योतिर्विदा वधूवरयोः सर्वविधसौख्ययुतदाम्पत्यजीवनाय सम्यक् दोषाः परिगणनीयाः पश्चाच्च विवाहः साधु इति निर्णयो कार्यः।

*****


ISSN : 2320-740X

## मीमांसादर्शने मोक्षविचारः

**प्रशान्त गांव्करः**
शोधच्छात्रः

**शबरेण कृतं भाष्यं भट्टपादेन वार्तिकम्।**
**सूत्रं जैमिनिना प्रोक्तं वन्दे चेमान् मुनीनहम्॥**

दर्शनप्रपञ्चे आस्तिकदर्शनानां मूर्धन्यस्थानं भजते पूर्वमीमांसाशास्त्रम् । धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु प्रथमस्य धर्मस्य परमं प्रमाणं भवति वेदः । तादृशस्य वेदस्य यथार्थनिर्णयार्थं प्रवृत्तमिदं मीमांसाशास्त्रम्।

**धर्मे प्रतीयमाने हि वेदेन करणात्मना।**
**इतिकर्तव्यताभागं मीमांसा पूरयिष्यति॥**

इत्येवं वेदप्रणिहितो धर्मः इतिकर्तव्यतादिभिः सम्यक् विवेचितः इति सर्वथा धर्मानुष्ठातृभिः मीमांसैव अनुसरणीया।

शास्त्रेऽस्मिन् प्राधान्येन धर्मो विचारितः । परमपुरुषार्थः मोक्ष एवेति क्वचिन्मोक्षस्वरूपविचारोऽपि प्रदर्शितः । तत्र तावत् **"स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याति"** इति सशरीरकं स्वर्गगमनं तावत् प्रत्यक्षविरुद्धम् । शरीरसम्बन्धात् यस्य तच्छरीरं सोऽपि यज्ञायुधी, आत्मा इत्यर्थः । एवं **शरीरसम्बन्धः एव बन्धः, तदभावो मोक्षः** इति भाट्टमीमांसकानां समयः।

चार्वाकास्तावत् शरीरापातः एव मोक्षः इत्याहुः । शरीराद्भिन्नः आत्मा वर्तत एव इत्यनेन तस्यैव मोक्षः, न तु शरीरस्य। तस्मान्न शरीरापातः मोक्षः।

सौगतास्तावत् नीलपीतादिविषयोपाधिविलये उपाधिरहितविज्ञानसन्ततेः स्वरूपेणावस्थानं मोक्षः इति । तन्न युक्तम् – निर्विषयकज्ञानसन्तानस्य स्वरूपेणावस्थितिः नैवोपपद्यते । क्षणे-क्षणे निरन्तरमुत्पद्यमानविनश्यमानबोधसन्तानेषु कस्यापि ज्ञानक्षणस्य मोक्षफलं नानुभूयते । एवमननुभूयमाने वस्तुनि पुरुषेच्छाभावात् मोक्षस्य पुरुषार्थत्वमेव न स्यात्।

एकविंशतिदुःखविच्छेदो मोक्षः इति नैयायिकाः कीर्तयन्ति । देहः, षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखम्, दुःखं चेति एकविंशतिप्रभेदं च दुःखमाचक्षते । तत्र सुखस्यापि विच्छेदेन मोक्षस्यापुरुषार्थत्वप्रसङ्गः । पुरुषार्थत्वे दुःखाभावः पर्याप्तः, सुखं भवेदेवेति नास्ति इति चेत्, न, तथात्वे सुषुप्तेः उत्थितः पुरुषः सुषुप्तिकालीनं दुःखाभावं स्मरन् प्राप्तसुखवियोगेन दुःखमनुभवति । दुःखाभावस्य सुषुप्तौ प्राप्तौ तत्र यदि सुखं न स्यात्तर्हि उत्थिते सुखवियोगरूपं दुःखं कथं वा अनुभूयेत ? तस्मात् ज्ञायते पुरुषार्थत्वस्वीकारे दुःखाभावः न पर्याप्तः, सुखभावोऽपि तत्र स्यादेव।



ISSN : 2320-740X

प्रकृतिपुरुषविवेकज्ञानात् पुरुषस्य स्वरूपेणावस्थानं मोक्षः इति सांख्याः। तस्यापि सुखव्यतिरेकेण मोक्षस्य अपुरुषार्थत्वमेव स्यादिति तन्निरस्तम्।

प्रपञ्चविलयो हि मोक्षः इति वेदान्तिनः । आत्मनः आनन्दमयत्वस्वीकारात् नापुरुषार्थत्वम् । अथापि प्रपञ्चविलयस्यैवाभावात् एवं मोक्षस्वरूपकथनं न युज्यते । प्रपञ्चस्य मायामयत्वात् विज्ञानोदये तल्लयः एवेति चेत्, न । प्रपञ्चो मिथ्या, दृश्यत्वात्, स्वप्नप्रपञ्चवत् इति जगतः मायामयत्वसिद्ध्यर्थं प्रयुक्तेऽनुमाने किं नाम मिथ्यात्वम् ? अत्यन्तासत्वं वा ? सदसद्विलक्षणत्वं वा ? बाध्यत्वं वा ? इति । अत्यन्तासत्वे नरविषाणवत् जगतः प्रतीतिरेव न स्यात् । अन्यत्राप्रसिद्धत्वात् पक्षस्य प्रपञ्चस्य अप्रसिद्धविशेषणदोषत्वेन सदसद्विलक्षणत्वमपि न मिथ्यात्वम् । नापि बाध्यत्वम्, जाग्रत्प्रपञ्चस्य बाधकप्रमाणस्यानुपपत्तेः।

सुखोपभोगरूपस्य मोक्षत्वे स्वर्ग एव कल्पनीयः । तथा **'यदुत्पद्यते तन्नश्यति'** इत्यतः तस्य क्षयित्वमस्त्येव। भावपदार्थाः उत्पत्तिधर्मकाः घटादयः क्षयधर्मकाः तद्वदिति। उच्यते – **शरीरसम्बन्धो हि बन्धः, तदभावो मोक्षः** इति। **निष्पन्नानां देहानां यः प्रध्वंसाभावः यश्चानुत्पन्नानां प्रागभावः सः मोक्षः** इति। शरीरसमन्बन्धश्च कर्मनिमित्तः। कर्मक्षयादेव बन्धः न भवति। अभावात्मके मोक्षे नित्यत्वं च सिस्ध्यति। एतादृशस्य अविद्यानिवृत्तिरूपज्ञानमेव साधनमिति वक्तुं न शक्यते। क्रियायाः कस्याश्चित् अभावः फलमिति केनापि नेष्यते। तर्हि कथमस्य सिद्धिरिति चेत् – कर्मक्षयादेव।

तथा हि - यो हि देहात् विविक्तमनन्तमजरममरमदुःखात्मकमात्मानं जानाति तस्य देहसम्प्रयोगविरक्तस्य पूर्वकृतानां कर्मणां फलभोगेन क्षयात् तन्निमित्ते शरीरे पतितमनागतानां च कर्मणामननुष्ठानादेवासत्वात् देहान्तरानुत्पत्तेः अत्यन्तासम्बन्धः शरीरेण सिध्यति।

मुमुक्षुभिः एवं कर्तव्यमित्याहुः भट्टपादाः –

**मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।**
**नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया** [1]**॥** इति।

काम्यनिषिद्धे कर्मणी स्वफलयोः अभ्युदयप्रत्यवाययोः उपभोगाय शरीरमारभेते । शरीरावस्थां परिजिहीर्षता मोक्षार्थिना न कर्तव्ये । नित्यनैमित्तिके पूर्वकृताधर्मक्षयाय कर्तव्ये । तदैव पूर्वकृतकर्मक्षयद्वारा मोक्षः सिध्यति।

नित्यानि अग्निहोत्रादीनि स्वर्गार्थान्यपि इति कथं तत्कुर्वतः मोक्षः इति चेत् – **"प्रार्थ्यमानं फलं दृष्टं न चानिच्छतोर्भविष्यति"**[2] इति।

---

[1] श्लोकवार्तिकम् (सम्बन्धाक्षेपपरिहारः, श्लो.सं. ११०)

[2] श्लोकवार्तिकम् (सम्बन्धाक्षेपपरिहारः, श्लो.सं. १११)



ISSN : 2320-740X

**दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः ।**
**सुखस्य मनसा भुक्तिर्मुक्तिरुक्ता कुमारिलैः ॥[1]**

इति मानमेयोदयः । अनुभवहेतोरभावात् संसारावस्थायां सुखानुभवः न भवति । देहेन्द्रियाणामात्यन्तिकपरिध्वंसानुगृहीतं मनः तदनुभवसाधनम् । न मुक्तेन्द्रियस्य कथं मनसा भुक्तिरिति वाच्यम् । यतः मुक्तस्य बाह्येन्द्रियाण्येव निवर्तन्ते, न तु मनः, तत्तु तस्यामवस्थायामनुवर्तते ।

तथा हि-

**निषिद्धकाम्यकर्मभ्यः सम्यग्व्यावृत्तचेतसः ।**
**नित्यनैमित्तिकप्रायश्चित्तप्रध्वस्तदुष्कृतेः ॥**
**सुखदुःखानुभूतिभ्यां क्षीणप्रारब्धकर्मणः ।**
**युक्तस्य ब्रह्मचर्याद्यैरङ्गैः शमदमादिभिः ॥**
**कुर्वाणस्यात्ममीमांसां वेदान्तोक्तेन वर्त्मना ।**
**मुक्तिः सम्पद्यते सद्यो नित्यानन्दप्रकाशिनी ॥[2]**

*****

## आनन्दमयाधिकरणम्

**✍पुष्पा हेगडे**
शोधच्छात्रा

शरीरकमीमांसायां चतुर्लक्षण्यां प्रथमस्य सम्न्वयाध्यायस्य प्रथमपादस्य षष्ठमधिकरणं भवति आनन्दमयाधिकरणम् । पूर्वं तावत् साधनचतुष्टयसम्पन्नैः मुमुक्षुभिः अपरोक्षब्रह्मसाक्षात्काराय “अथातो ब्रह्मजिज्ञासा” इत्यन्तेन सूत्रेण वेदान्तवाक्यविचारः कर्त्तव्यः, इति प्रतिज्ञाय जगज्जन्मस्थितिलयकारणं अभिन्ननिमित्तोपादानकारणं ब्रह्मलक्षणम् अभिदाय, तत्रैव वेदान्तानां समेषां समन्वयः प्रदर्शितः । ईक्षापूर्वककर्त्तृत्वमचेतने प्रधाने न सम्भवति इति सांख्याभिमतं निराकृतम् । गतिसामान्यदि सूत्रेण वेदान्तानां सर्वेषां चेतनकारणावादे तात्पर्यमिति निरधारि ।

---

[1] मानमेयोदयः (प्रमेयभागः, श्लो.सं. २५, पृ.सं. २०१)

[2] मानमेयोदयः (प्रमेयभागः, श्लो.सं. २६-२७-२८, पृ.सं. २०२ )



ISSN : 2320-740X

[redacted]

अत्रेदानीम् आनन्दमयाधिकरणे – "तस्माद्वा एतस्माद्विज्ञानमयात् अन्योन्तर आत्मा आनन्दमयः। तस्य प्रियमेव शिरः। मोदो दक्षिणपक्षः। प्रमोदो उत्तरपक्षः। ब्रह्म पुच्छं प्रतिष्ठा" इति तैत्तरीयोपनिषद्गतं वाक्यजातं विषयः।

तत्र आनन्दमयशेषतया ब्रह्मप्रतिपादनपरम्,उत जीवप्रतिपादनपरम् इति संशयः।

पूर्वाधिकरणेन सह प्रत्युदाहरण सङ्गतिः।

आनन्दमयः जीवात्मा अन्नमयदिषु इव आनन्दमयोऽपि अन्योन्तर आत्मा आनन्दमयः इति श्रूयते ब्रह्म तु नित्यानन्दस्वरूपं भवति न तु आनन्दविकारः। अत्र तु अन्नमयादीनाम् इव विकारार्थकः मयट् प्रत्ययः युक्तः तत् प्रवाहपतितत्वात्। अतः मुख्यः आत्मा आनन्दमयः तस्य प्रियमेव शिरः मोदो दक्षिणपक्षः इति सावयवत्वं श्रूयते। 'यत् सावयवं तदनित्यम्' इति युक्त्या तस्य अनित्यत्वप्रसङ्गः दुर्वारः। "न वै सशरीरस्य सतः" श्रुत्या सुखदुखादिमत्वमपि अपरिहार्यम्। अतः सः संसारी भवितुमर्हति। विज्ञानमयशरीरे समुत्पन्नत्वात् शारीरत्वमपि विवक्षितम्। तस्मात् आनन्दमयः न परमात्मा इति पूर्वपक्षः ।

अत्रायं सिद्धान्तः –"आनन्दमयोऽभ्यासात्" आनन्दमयः परमात्मा भवितुमर्हति 'अभ्यासात्' अभ्यासो नाम 'असकृत् आवृत्तिः' तस्मिन् प्रकरणे आनन्दस्य पुनः पुनः श्रवणं श्रूयते "रसो वै सः", "रसं लब्ध्वा आनन्दी भवति "यदा एष आनन्दो न स्यात् सैषानन्दस्य मीमांसा" "आनन्दमयमात्मानमुपसंक्रमति" भृगुबल्यां "आनन्दो ब्रह्मेति व्यजानात्" "विज्ञानमानन्दं ब्रह्म" इति बृहदारण्यके। आनन्दमयस्य ब्रह्मत्वात् प्रातिपदिकश्रवणमात्रेष्वपि सशरीरस्य सतः श्रुत्या सुषदुःखादिमत्वमपि अपरिहार्यम् । अतः सः संसारीभवितुमहीति। विज्ञानमय 'सत्यभामा भामा इव' 'नामैकदेशे नामग्रहणम्' इति न्यायेन आनन्देनापि आनन्दमयो विवक्षितः। तस्मात् आनन्दमयः परमात्मा। "ब्रह्मविदाप्नोति परम्" इति प्रतिज्ञाय "सत्यं ज्ञानमनन्तं ब्रह्म" इति लक्षणमुक्त्वा गुहायां विहितस्य ब्रह्मणः प्रतिपादयिषया अन्नमयादयः विवक्षितः। तत्र अन्नमयादिषु अन्योन्तर आत्मा, अन्योन्तर आत्मा इति श्रवणात् तेषां अब्रह्मत्वम् आनन्दमयात् अन्यस्य अनिर्देशात् तस्यैव मुख्यत्वम्। तस्मात् पूर्वेषु विकारार्थे आनन्दमये प्राचुर्यार्थे मयट् प्रत्ययः युक्तः। प्रियशिरत्वादि अवयवनिर्देशः पूर्वकोशादिकल्पितः नतु परमार्थतः, मुषानिषक्तघृतताम्रादिप्रतिमावत्। तस्मात् न सावयवः आनन्दमयः वस्तुतः उत्तरत्र आनन्दमीमांसायां निरतिशयानन्दस्वरूपं ब्रह्मणः वर्णितम्। अतश्च प्राचुर्यार्थकः मयट् प्रत्ययः 'तत् प्रकृतवचने मयट्' इति पाणिनिसूत्रात् अन्नमयो यज्ञ इत्यादि दृष्टान्तबलात् अत्र प्राचुर्यार्थे मयट् न तु विकारार्थे। "रसो वै सः" "रसं लब्ध्वा आनन्दीभवति" इति आनन्दहेतुत्वप्रतिपादनात् 'यः अन्यान् धनिकान् करोति सः प्रचुरधनः' इति लोकन्यायेन मयट् प्रत्ययः प्राचुर्यार्थे इति सिद्धम्।

मन्त्रब्राह्मणयोः सामञ्जस्योपपादनाय अन्नमयादिषु अन्ते अन्नमयस्य श्रवणात् ततोन्यस्य अश्रवणात् मान्त्रवर्णिकं ब्रह्म आनन्दमय एव। तस्मात् प्राचुर्यार्थे मयट् अन्यथा 'प्रकृतहानि


ISSN : 2320-740X
[redacted]

अप्रकृतप्रक्रियाप्रसङ्गः' । "सोकामयत" "स एव बहुस्यां प्रजायेय" इति कामनापूर्वक सर्वजगत् सृष्टिः आनन्दमयाधिकरणे श्रूयते स च अल्पज्ञे जीवे नोपपद्यते । षोडशाध्याय्यम् – असन्नेव इत्यस्मिन् निगमनश्लोके असत् ब्रह्म इति, अस्ति ब्रह्म इति च केवलस्य ब्रह्मण एव अभ्यस्यमानत्वात् ब्रह्मपुच्छमित्यत्र स्वप्रधानत्वेनैव ब्रह्म उच्यत इति ।

"नेतरोनुपपत्तेः" – नेतरः ईश्वरात् अन्यो जीवः न आनन्दमयः जगत् अनुपपत्तेः "रसं लब्ध्वा आनन्दयति" इति लब्ध लब्धव्य आनन्दमयः परमात्मा लब्धा तु जीवात्मा इति व्यपदेशात् न आनन्दमयः जीवः । सोकामयत इति कामना इच्छापूर्वकसृष्टुत्वव्यपदेशात् अचेतनं प्रधानमा नन्दमयः इति न भ्रमितव्यम्। ईक्षत्यधिकरणे निराकृतमपि गतिसामान्यत्वं प्रदर्शनाय "सोकामयत" श्रुत्यनुसारेण पुनर्निराकृतम् । यद्येवेष एतस्मिन् अनिलये अभयं प्रतिष्ठाम् इति यः ब्रह्मणि तादात्म्यं अनुभवति तस्य मोक्षो भवति । किञ्चिदपि भेदं यः अनुभवति तस्य संसारः इति श्रुतिः वदति । अतः तस्मिन् आनन्दमये जीवस्य तद्योगं तादात्म्यं अनुशास्ति तथा च सूत्रं "अस्मिन्नस्य च तद्योगं शास्ति" तस्मात् आनन्दमयः परमात्मा एव ।

*****

## शास्त्रमालावृत्यनुसारं कर्मभेदनिरूपणम्

✍ **राजेन्द्र भट्टः**
शोधच्छात्रः

धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मे सर्वं प्रतिष्ठितम् । धर्मेण पापमपनुदति । तस्मात् धर्मं परमं वदन्ति इत्यादिश्रुतिवाक्यानि धर्मस्य जगत्प्रतिष्ठापकत्वं पापनाशकत्वं च बोधयन्ति । जगतः स्थितिकारणीभूतः प्राणिनां साक्षात् अभ्युदयनिःश्रेयसहेतुकः अयं धर्मः मन्त्रब्राह्मणात्मकस्य शब्दराशेः आम्नायस्य अनादित्वात् अपौरुषेयत्वात् नित्यत्वाच्च गरीयस्त्वं माहात्म्यं च दृश्यते । अपौरुषेयस्य वेदस्य प्रामाण्यकथनसौकर्याय अनुष्ठानविनियोगव्यवस्थार्थं च विधिमन्त्रनामधेयनिषेधार्थवादात्मना पञ्चधा विभागः कृतः । अपौरुषेयस्य वेदस्य तात्पर्यार्थनिर्णयार्थं प्रवृत्तमिदं मीमांसाशास्त्रम् ।

अस्य शास्त्रस्य आविर्भावः इत्थं श्रूयते । ब्रह्मा प्रजापतये मीमांसां प्रोवाच, सोऽपीन्द्राय, स च आदित्याय, स च वसिष्ठाय, सः पराशराय, स च कृष्णद्वैपायनाय, सच जैमिनये, स च स्वोपदेशान्तरम् इमं न्यायं ग्रन्थे निबद्धवान् इति । वेदाधीत धर्माज्ञात पुरुषस्य धर्ममार्गदर्शनार्थं सूत्रात्मकं द्वादशाध्यायात्मकं मीमांसाशास्त्रं भगवता जैमिनिना प्रणीतम् । तत् सूत्रमधिकृत्य प्रपञ्चे पूर्वकाले स्वबिद्धिशक्त्या बहवः पण्डिताः मीमांसाशास्त्रसम्बद्धग्रन्थान् तालपत्रादिषु लिखितवन्तः । तत्र प्रायः षोडशशतमाने भरतखण्डस्य बनारस् नगरस्य प्रसिद्धभट्टवंशजमीमांसातल्लजमहामहोपाध्याय: श्री कमलाकर भट्टानां पुत्रः श्री अनन्तभट्टमहाभाः



ISSN : 2320-740X

प्रमुखाः । सः सूत्रवृत्तिरूपशास्त्रमालाख्यग्रन्थविवरणात्मकं शास्त्रमालावृत्तिनामकं मीमासाग्रन्थं तालपत्रे लिखितवान् । ग्रन्थेऽस्मिन् द्वितीयाध्याये कर्मभेदविषये सारल्येन जिज्ञासितमस्ति । तदहं अत्र भवतां सम्मुखे केवलं अभिप्रायसङ्ग्रहणार्थमेव दर्शयामि ।

कर्मभेदे षट् प्रमाणानि । शब्दान्तम्-अभ्यासः-संख्या-संज्ञा-गुणः-प्रकरणान्तरम् इति ।

तत्र आद्यः शब्दान्तरात् कर्मभेदः ।

शब्दान्तरे कर्मभेदः स्यात्, कृतानुबन्धत्वात् इति सूत्रम् । यजति-ददाति-जुहोतिसत्रप्रत्ययस्य एकत्वेन एका एव भावना । तत्रैव अनेकधात्वर्थविधिः । न च गुणभूतधात्वर्थानुसारेण प्रधानभूतभावनाभेदः सम्भवति । तेन वाक्यैकवाक्यतया सर्वधात्वर्थविशिष्टः एकभावनाविधिः । अतः उच्यते शब्दान्तरेण भेदः स्यात् इति । ति प्रत्ययस्य एकत्वेऽपि अपर्यायधात्वर्थस्तु रूपशब्दान्तरात् भावनया भेदः न स्यात् । धात्वर्थ विशेषं विना भावनासामान्यस्य अनुष्ठेयत्वात् विधिः एव भवनायाः न स्यात् ।न च सः विशेषकत्वम् । तथा अग्नीषोमवत् यद् ऐक्यात् वा त्रयवद् वा वाक्यैकत्वात् वा । नाद्यः । तद्वत् समस्तोपरि एकस्य प्रत्ययस्य अभावात् । नान्त्यः । क्रीणाति इति च भिन्नस्य प्रत्ययस्य अभावात् । तेन एकस्यां भावनायां सजातीयानेककारकनेवेषासंभवात् । एकभावनानुवादेन हिरण्यात्रेयदानानां विधौ वाक्यभेदाच्च । भिन्ना एव भावनायाः प्रयोजनम् । पूवपक्षे सर्वेषां प्राधान्यं सिध्दान्ते तु अङ्गाङ्गित्वम् ।

द्वितीयः अभ्यासात् कर्मभेदः । एकस्यैव पनः श्रुतिः अवशेषादनर्थाकं हि स्यात् इति सूत्रम् ।

समिधो यजति तनूनपादं यजति इत्यादिषु पञ्चधा अभ्यस्तेषु यजतिषु धातुप्रत्यययोः एकत्वेन यागभावनयोः एकत्वावगतेः एकैक भावनायागश्च । ततश्च समिच्छब्दे दाशमिकन्यायेन नामत्वेऽपि तनूनपादादौ यागभेदासिद्धौ संज्ञात्वस्य एव असिद्धेः अन्योन्याश्रयाच्च देवताविधिरेव । न तु यागाविधिः येन अभ्यसात् भेदः स्यात् इत्याशङ्कितम् । अतः अभ्यासाच्च ततः परम् इत्युक्तम् । न क्रमविनिर्युक्तमन्त्रवर्णात् देवताप्राप्तिनिमित्तीकृत्य तनूनपातादेः नामत्वेन उपपत्तौ देवताविधायकत्वं संभवति । अनुपपत्यभावात् । समिद्वाक्ये यागविधिः तदा याज्यानां विकल्पेन होमैक्या च । चतुर्दशेत्यादि लिङ्गमनुपपन्नं स्यात् । तस्य समित् शब्दस्य पक्षे मन्त्रदेवताप्राप्त्यभावे नामत्वात् तेन श्रुत्या यागभावनयोर्विधेयत्वावगतेः एकस्य धातोः पुनःश्रवणलक्षणात् अभ्यासादेव अत्र भेदः ।

तृतीयः संख्यया कर्मभदः । पृथक्त्वनिवेशात्संख्यया कर्मभेदः स्यात् इति सूत्रम् ।

उपवर्षेण तिस्र आहुतीर्जुहोति इत्यत्र आख्यातैख्यात् कर्म एकत्वेवगते संक्याश्रवणं प्रयाजैकादशत्ववत् अभ्यासादेव इत्याशङ्क्य वाक्ये श्रुतानां पदानां सङ्गृह्य वाक्यार्थबोधजनकत्वेन आख्यातमात्रस्य कर्मविधायित्वाभावात् कर्मभेदादेवाख्यातं संख्यासामानाधिकरण्यात् संख्यायाः पृथक्त्ववेशित्वाच्च संख्याविशिष्टानि बहून्येव कर्माणि विधत्ते । प्रयाजानां तु निर्ज्ञातसंख्यत्वात् अभ्यासः । तेन बहून्येव कर्माणीत्युक्तम् । भाष्ये तु असंख्यायाः कर्मसामानाधिकरण्येन सिद्धान्तस्य स्पष्टत्वात्



[redacted]

ISSN : 2320-740X

सप्तदशप्राजापत्यानि इति द्रव्यगतसंख्यामुदाहृत्य प्राजापत्यपदे सा अस्य देवता इति तद्धिते अस्य इति सर्वनाम्नोक्तपशुरयं इति च सति उच्चारणएकशेषे प्रकृत्यथार्थे प्रधानभूते द्रव्ये एषामिति पूर्वं बहुत्वान्वयात् पश्चादेषाप्रजापतिर्देवता इति बहूनामेकदेवतायोगात् एकपशुनिष्पन्न एकादशावदान द्रव्यत्वस्य तु अतिदेशिकत्वेन बाधाच्च हृदयादि द्रव्यपशुयागवदनेक एव याग इत्याशङ्क्य तद्धितान्तर्गत्या देवताविशिष्टस्य पशोः प्रकृत्यर्थत्वेन तद्धितान्तानाम् एकशेषात् तदन्तेषु च द्रव्यदेवतासम्बन्धबहुत्वोक्तेः यागैक्ये चोदकस्य अपि एकत्वेन एकस्यैव गणस्य प्राप्त्या तस्यैव देवतायोगेन अन्येषां वैय्यर्थ्यापत्तेश्च यागादेव इत्युक्तम् । एवं संख्याभेदः निरूपितः ।

चतुर्थं संख्याभेदेन कर्मभेदः । संज्ञा च उत्पत्ति संयोगात् इति सूत्रम् ।

न तु अथैषज्योतिः अथैषविश्वज्योतिः अथैषसर्वज्योतिः एतेन सहस्रदक्षिणेन यजेत इत्यत्र सहस्रदक्षिणागुणे विधेययागानुवादापेक्षायां वसन्ते ज्योतिष इति वदेकदेशेन ज्योतिष्ठोमस्य अनुवादादेः तत् शब्दश्च अभेदावगमात् विश्वसर्वज्योतिशब्दोश्च त्रिवृदादिष्वेव कथञ्चित् साकल्येन वृत्तेः अथ शब्दस्य च अर्थात् शक्त्या इतिवत् पाठसिद्धक्रमानुवादित्वात् तत्रैव सहस्रदक्षिणागुणो विकल्पेन विधेयः अस्तु । अत एव ज्योतिरादिषु नामता इत्युक्तम् । न एतत् शब्देन ज्योतिष्ठोमानुवादेन गुणविधिः सम्भवति । तथात्वे तेनैव सिद्धे वाक्यत्रयवैय्यर्थ्यापत्तेः तेन संज्ञया कर्मान्तरावगतेः अथ शब्देन प्रकरणविच्छेदाच्च कर्मान्तरमेव युक्तम् । एतद् शब्दस्तु प्रस्तूयमानपरः । तेन सिद्धः संज्ञाभेदः । पञ्चमः गुणात् कर्मभेदः ।

गुणश्च अपूर्वसंयोगे, वाक्ययोः समत्वात् इति सूत्रम् ।

ननु सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम् इत्यत्र आमिक्षायागस्य उत्पत्तिशिष्टगुणावरुद्धत्वेऽपि वाजिनाकांक्षाया यागाकांक्षां उत्थाप्य वाजिभ्य इत्यनेन आमिक्षारूपात् न योगेन तद्विशेषकान् तदुपलक्षणभूतत्वात् विश्वेदेवान् इति निर्दिश्य समुच्चयेन विकल्पेन वा वाजिनविधिः । यद्वा यागमात्रं निष्कृष्य तदनुवादेन गुणविधिः अन्यथा प्रकृतहानाप्रकृतकल्पनापत्तेः इत्याशङ्क्य उक्तं वाजिनाख्यगुणाद्भेदः इति । न तद्धितश्रुतिविहितदेवताके आमिक्षायागे उत्पन्नशिष्टस्य वा स्वीयदेवतासम्बन्धस्य च वाजिनस्य च निवेशः सम्भवति । न च वैश्वदेवी पदे स्त्रीमात्रोक्त्या आमिक्षापदैकवाक्यतया तत्परत्वमिति वा स्वीयमेव इति वाच्यम् । सर्वनाम्नां पदान्तरक्तेप्रकृते शक्त्या वैश्वदेवीपदस्य देवताविशिष्ट प्राप्त्यालोचनायां गुणविशिष्टस्य प्राप्तत्वाच्च न शुद्धानुवादः । तेन द्रव्यदेवतायोगात् कर्मान्तरमेव । इति गुणात् कर्मभेदः । षष्ठः प्रकरणान्तरात् कर्मभेदः । प्रकरणान्तरे प्रयोजनान्यत्वम् इति सूत्रम् ।

उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति इति कुण्डपायिनामयने सत्रप्रकरणाधीतवाक्ये नाम्ना नित्याग्निहोत्रपठितः कालस्य अनुपादेयत्वेऽपि कर्मसम्बन्धित्वेन वसन्तादिवत्कालः त्रिंशद् वर्षादिवदशक्तस्य विधीयते । यद्वा दीक्षिते न जुहोति इतिवत् निषेधहोमस्य मासं प्रति प्रसवोऽयं भवति । यद्वा मासमग्निहोत्रं मासं दर्शपूर्णमासाभ्यामिति षट् मासपरिमितानां षण्णां कर्मणां षण्मासपरिमितसोमयागसहितानां



ISSN : 2320-740X

संवत्सरपरिमितसत्रप्रयोगवचनेन फले विधिः भविष्यति । न च अनुपादेयफलसम्बन्धात् कर्मभेदः । फलान्तरसम्बन्धस्य अवेश्ठ्यादिवत् प्रयोगभेदेप्युपपत्तेः । तेन अत्र न कर्मान्तरमिति । अतः नित्याद्भिन्नं त मासमग्निहोत्रं स्यात् तदसन्निधेः इत्युक्तम् । नित्ये उपसदनं तदर्थं मासश्च इत्यनेकविधानं सम्भवति । वाक्यभेदापत्तेः । नापि प्रतिप्रसवविधिः । नित्यस्य उपसदन आनन्तर्या प्राप्त्या वाक्यभेदेन अवस्था स्यात् । एतेन सत्रैकदेशत्वेनापि विधिः प्रयुक्तः । ननु मा भूत् प्रकृते गुणविधिः । कर्मान्तरत्वे किं प्रमाणमिति चेत् अप्रक्ताभदानलक्षणं प्रकरणान्तरमत ब्रूमः । यद्यपि अत्र अनेक गुणोपदानाद् गुणादेव भेदः भवति । तथापि मासं दर्शपूर्णमासाभ्यां यजते इत्यत्र तदभवात् प्रकरणान्तरादेव भेदः । तेन मासस्य अनुपादेयत्वेन यदाहवनीये जुहोति इत्यादिवत् कर्मानुरोधेन विधानायोगात् सन्निध्यभावेन वाक्यस्य कालसंबन्धपरत्वायोगात् कर्म एव विधीयते । एवं शास्त्रमालावृत्तौ कर्मभेदविचारः निरूपितमस्ति ।

अनुशीलितग्रन्थाः –

शास्त्रमाला

शास्त्रमालावृत्तिः

न्यायमाला

भाट्टदीपिका

भाट्टकौस्तुभः

*****

## वैशेषिकदर्शनदृष्ट्या आधुनिकरासायनिकशास्त्रे द्रव्यविवेचनम्

✍ **राकेशः पि**

शोधच्छात्रः

द्रव्यनिरूपणे न्याय-वैशेषिकदर्शनाभ्यां साकं आधुनिकरासायनिकशास्त्रस्य कुत्रचित्[1] सैद्धान्तिकवैषम्यं दृश्यते । तदत्र निरूप्यते । तत्रादौ न्याय-वैशेषिकदर्शनम् । क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्[2] । पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि[3] । रूपरसगन्धस्पर्शवती पृथिवी

[1] विभागः, अवयवधारा इति अंशद्वयमेव स्वीकृतम् ।

[2] वै. सू. १. १. १५

[3] वै. सू. १. १. ५ (रासायनिकशास्त्रे अनित्यानामेव द्रव्याणां विचारः कृत इति तन्मात्रमत्रापि क्रियते ।)



ISSN : 2320-740X

[redacted]

[1]। रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः[2] । तेजो रूपस्पर्शवत्[3] । स्पर्शवान् वायुः[4] । अयं विभागः गुणाधारितः । गन्धवत्व-शीतस्पर्शवत्व-उष्णस्पर्शवत्व-रूपरहितस्पर्शवत्वानां क्रमेण विभाजकलक्षणत्वात् । एषां लक्षणानां प्रत्यक्षविरोधप्रयुक्तऽव्याप्त्यादिदोषशङ्कानिराकरणौपयिकव्यवस्थाः व्याख्यानश्रेण्यां बहुधा दृश्यन्ते, पाषाणादावनुद्भूतगन्धः, उष्णजले तेजोगतमौष्ण्यं, चक्षुरिन्द्रियादावनुद्भूतस्पर्शः, धूमादौ पृथिवीगतरूपं तेजोगतमौष्ण्यञ्चेत्यलं परीक्षा ।

पृथिव्यादीनामवयवधारायाः अन्तिमं स्थानं परमाणुः । स च पृथिव्यादिभेदेन चतुर्विधः, स्थूले चातुर्विध्यदर्शनात् । द्वयोः पार्थिवपरमाण्वोः संयोगात् पार्थिवद्व्यणुकमुत्पद्यते, त्रयाणां पार्थिवद्व्यणुकानां संयोगात् पार्थिवत्र्यणुकमुत्पद्यते, एवमग्रे, जलादिष्वपि, इत्यवयवधाराक्रमः ।

रासायनिकशास्त्रे द्रव्यम् (Matter) इति अनित्यानामेव द्रव्याणां व्यपदेशः । गुरुत्ववत्वं, स्वस्थित्यर्थं स्थानसापेक्षत्वं वा द्रव्यत्वम्[5] । द्रव्यं चतुर्विधम् – पृथिवी (Solid), आपः (Liquid), वायुः (Gas), प्लास्मा (Plasma)[6] इति | निश्चित परिमाण-आकृति-उभयवत्वं पृथिवीत्वम् । निश्चितपरिमाणवत्वे सति आकृतिराहित्यं जलत्वम् । यथा घटे वर्त्तमानं घटाकृतिमज्जलं चषके स्थाप्यते चेत् चषकाकृतिं प्राप्नोति [7]। निश्चितपरिमाण-आकृति-उभयराहित्यं वायुत्वम् । विभागश्चायं तदीयावयवानां प्रचयाधारितः[8] । यत्र अवयवेषु दृढसंयोगः सा पृथिवी, ततः दुर्बलसंयोगः यत्र तत् जलं, ततोऽपि न्यूनः वायौ, ततोऽपि न्यूनः प्लास्मायामिति । अवयवानां चलनस्वातन्त्र्यं पृथिव्यां नास्त्येव, जले ईषदस्ति, वायौ ततोऽप्यधिकं, प्लास्मायाञ्च अत्यधिकमस्ति । औष्ण्यप्रदानेन शीतीकरणेन वा क्वचित् द्रव्यम् उक्तचतुर्षु अवस्थासु परिणामयितुं शक्यते[9] । तद्यथा पृथिव्या उष्णीकरणेन जलं, तदुष्णीकरणेन वायुः, तदुष्णीकरणेन च प्लास्मा जायते, एवं शीतीकरणेन प्लास्मातः पृथिवीपर्यन्तं परिणामः जायते ।

द्रव्यस्यैव अन्योऽपि कश्चन विभागक्रमः दृश्यते । पूर्वोक्तविभाग अवयवसंयोगदार्ढ्याधारितश्चेदुच्यमान अवयवानां वैविद्ध्याधारितः । अत एवात्र प्रत्येकं विभागे पार्थिवादिप्रभेदवतामन्तर्भावः भवति । द्रव्यं द्विविधम् – शुद्धद्रव्यं (Pure Substance), मिश्रितद्रव्यम्

---

[1] वै. सू १. २. १

[2] वै. सू १. २. २

[3] वै. सू १. २. ३

[4] वै. सू १. २. ४

[5] . Anything which has mass and occupies space is called matter.

[6] रासायनिकशास्त्रे तेजसः द्रव्यत्वं नाऽङ्गीकृतम्।वाय्वनन्तरतया प्लास्मा इति अतिरिक्तद्रव्यमङ्गीकृतम्।

[7] परिमाणम् – Volume, आकृतिः – Shape । अत एव रासायनिकज्ञैः मेर्कुरि (Mercury-Hg) अपि जलम् (Liquid) इति स्वीक्रियते। एवं Bromine-35, Caesium-55, Rubidium-37, Francium-87, Gallium-31 एते अपि जलीयावस्थायां वर्त्तन्ते। न्यायवैशेषिके तु ज.ज.$_2$आ.ज.$_1$ एव जलमिति स्वीकृतम्।

[8] न्यायवैशेषिके पृथिव्यादिविभागः गुणाधारितः।

[9] पार्थिवादीनां जलादिरूपेण परिणामः न्यायवैशेषिके न स्वीकृतः, तत्तद्गुणानामन्यत्रासत्वात् । प्रचयाधारितविभागवादे तु नात्र दोषः।



ISSN : 2320-740X

(Mixtures) इति । सामान्यभौतिकप्रक्रियाद्वारा यादृशद्रव्यस्य अवयवविभाग अशक्यः तत् शुद्धद्रव्यम् । सुवर्णम् (Gold-Au), आम्लजनकं (Oxygen-O), जलम् (Water-$H_2O$) इत्यादीन्युदाहरणानि । सामान्य भौतिकप्रक्रियाद्वारा यादृशद्रव्यस्य अवयवविभागः शक्यः तत् मिश्रितद्रव्यम् । लवण-जलमिश्रितम्, अन्तरिक्षवायुः, मृत्पाषाणयोर्मिश्रितमित्यादीन्युदाहरणानि ।

शुद्धद्रव्यं पुनः मूलकं(Elements), मूलककम्(Compounds) इति द्विधा विभक्तम् ।

अणु-सजातीयाणुजन्याणुक-अन्यतरजन्यं मूलकम्[1] । मूलकमिति विभागे केवलमेकविध अवयवा एव भवन्ति । स च अवयव अणुः (Atom), अथवा सजातीय-अणूनां संयोगेन उत्पद्यमानं अणुकं (Molicule) वा भवति । विक्षारद्रव्यङ्कारीयं (Sodium-Na), ताम्रं (Copper-Cu), जलजनकम् (Hydrogen-H), आम्लजनकमित्यादीन्युदाहरणानि । अत्र प्रत्येकस्मिन् द्रव्ये तज्जातीय अणु अथवा अणुकमेव भवन्ति । एते प्रत्येकमपि अणुः अथवा अणुकं, अन्यद्रव्यगत(सुवर्णादिगत) अणुः अथवा अणुकात् विलक्षणगुणयुक्ताः भवन्ति । विक्षारद्रव्यङ्कारीय-ताम्र-इत्यादिषु अणुः एव अवयवः, अर्थात् बहूनाम् अणूनां संयोगेन स्थूलद्रव्यस्य उत्पत्तिः । एतदणुजन्यमूलकस्योदाहरणम् ।

जलजनकं, आम्लजनकमित्यादिष्वणुकं भवति अवयवः, अर्थात् आदौ अणूनां संयोगेन अणुकं जायते, तादृशाणुकानां संयोगेन स्थूलद्रव्यस्योत्पत्तिः । स्थूलजलजनके जलजनक-अणुद्वयं मिलित्वा आदौ 'ज.ज.२'($H_2$) इति जलजनक-अणुकमुत्पद्यते, तादृशाणुकानां बहूनां मेलनेन स्थूल जलजनकवायोरुत्पत्तिः । एवं स्थूल आम्लजनके आम्लजनक-अणुद्वयं मिलित्वा आदौ 'आ.ज.२' ($O_2$) इत्याम्लजनक-अणुकमुत्पद्यते, तादृश अणुकानां बहूनां मेलनेन स्थूल आम्लजनकवायोरुत्पत्तिः | अन्येषु कतिपयद्रव्येषु, सजातीयानां द्वयाधिक अणूनां संयोगादुत्पद्यमानान्यणुकानि मिलित्वा स्थूलमूलकमुत्पादयन्ति[2] । एतान्यणुकजन्य मूलकस्योदाहरणानि । तथा च मूलकमिति विभागे, अणुः, अणुद्वययुक्तमणुकम्, अणुत्रययुक्तमणुकम् अणुचतुष्टययुक्तमणुकमित्यादय अवयवभूताः भवन्ति । तादृशानां द्वयानां त्रयाणां सहस्राणां वा संयोगादुत्पद्यमानं सर्वं स्थूलमेव[3] ।

विविधमूलकजन्यं मूलककम् । मूलककमिति विभागे द्वयोः, तदधिकानां वा भिन्नजातीयअणूनां संयोगेन उत्पद्यमान-अणुकमेव अवयवः भवितुमर्हति, न तु अणुः । अङ्गाराम्लवायुः (Carbon Dioxide), जलं, अन्नजम् (Sugar) इत्यादीन्युदाहरणानि । एकः अङ्गार-अणुः, द्वौ आम्लजनक-अणू च मिलित्वा अ.र.$_1$आ.ज.$_2$ ($CO_2$) इति अङ्गाराम्लवायोरणुकमुत्पद्यते । बहूनि अङ्गाराम्लवायोरणुकानि मिलित्वा

---

[1] साजात्यञ्च जलजनकत्व-आम्लजनकत्वादिना । तादृशजातयः 118 संख्याकाः । तेन मूलकान्यपि 118 संख्याकानि । न्याय-वैशेषिके परमाणूनां साजात्यं पृथिवीत्वादिना, तेन तादृशजातयः चतस्र एव ।

[2] न्यायवैशेषिके द्व्यणुकानां संयोगमन्तरा द्वयाधिक परमाणूनां संयोगासवयव्युत्पत्तिः न स्वीक्रियते ।

[3] न्यायवैशेषिके परमाणुः, द्व्यणुकं, त्र्यणुकमित्येव क्रमेण स्थूलस्योत्पत्तिः।आद्यद्वयं सूक्ष्मं, अग्रे सर्वं स्थूलम् ।



ISSN : 2320-740X

स्थूल-अङ्गाराम्लवायुमुत्पादयन्ति। अत्र अङ्गार आम्लजनकञ्च भिन्नजातीये। एको जलजनक-अणुः, द्वौ आम्लजनक-अणू च मिलित्वा ज.ज.$_2$आ.ज.$_1$ ($H_2O$) इति जलस्य अणुकमुत्पादयन्ति । बहूनि जल-अणुकानि मिलित्वा स्थूल जलमुत्पादयन्ति। अन्नजे च षट् अङ्गार-अणवः, द्वादश जलजनक-अणवः, षट् आम्लजनक-अणवश्च मिलित्वा अ.र.$_6$ज.ज.$_{12}$आ.ज.$_6$ ($C_6H_{12}O_6$) इति अन्नजस्य अणुकमुत्पादयन्ति । बहूनि अन्नज-अणुकानि मिलित्वा स्थूल अन्नजमुत्पादयन्ति[16]।

इथं मूलकमिति विभागीयानाम् अवयवभूतेष्वणुकमित्याख्येषु विविध अणवः सुनिश्चितसंख्यायां संयुज्यन्ते। अणोः संख्यायां भेदे सति द्रव्यमेव भिन्नं भवति। यथा $H_2O$ जलं भवति, $H_2O_2$(Hydrogen peroxide) तु प्रकोष्ठादिशुद्धीकरणार्थमुपयुज्यमान विषलायनि। तथा च अणुके कीदृशः अणुः वर्तते, सोऽपि कियत्संख्याकः वर्त्तते इति उभयमपि तस्य पदार्थस्य स्वभाव-गुणादीन् नियमयति।

मूलककमिति विभागे अणुकं, तदवयवीभूताण्वपेक्षया विलक्षण-स्वभाव-गुणान् प्रकटयति । यथा जलजनकम् आम्लजनकञ्च वायवीयपदार्थौ, तयोः संयोगात् जलमुत्पद्यते । जलजनक-वायुः अग्निसंयोगे भीकर स्फोटशब्देन ज्वलति, आम्लजनक-वायुः सर्वत्र दहनार्थम् अत्यन्तापेक्षितवायुरिति विख्यातः, तयोर्संयोगादुत्पन्नं जलं तु अग्निशमनार्थमुपयुज्यते।

भौतिकप्रक्रियया ज.ज.$_2$ इति अणुकं ज.ज इत्यणुरूपेण, आ.ज.$_2$ इति अणुकं आ.ज. इत्यणुरूपेण, ज.ज.$_2$आ.ज.$_1$ इति अणुकं ज.ज. इत्यणुरूपेण एवं आ.ज. इत्यणुरूपेण, अ.र.$_1$आ.ज$_2$ इति अणुकं अ.र एवं आ.ज. इत्यणुरूपेण विभक्तुं न शक्यते। तथापि रासायनिकप्रक्रिया द्वारा तादृशविभागः शक्यः।

मिश्रितद्रव्यं पुन ऐकात्म्यद्रव्यं (Homogenious), नैकात्म्यद्रव्यम् (Hetrogenious) इति द्विधा विभज्यते।

विविधमूलक-मूलकक-अन्यतरजन्यत्वे सति एकात्मभाववत्वम् एकात्मद्रव्यत्वम् । एकात्मभावश्च प्रत्येकघटकस्य प्रत्यक्षायोग्यत्वे सति घटितस्य प्रत्यक्षयोग्यत्वम्। एकात्मद्रव्यमिति विभागे तद्घटकपदार्थानां मिश्रणमथवा संयोगः सर्वत्र द्रव्ये एकधा भवति। लवण-जल-मिश्रितम्, अन्तरीक्षवायुरित्यादीन्युदाहरणानि । एको विक्षार-द्रव्यङ्गारीय अणुः, एको लवणङ्गारीय (Chlorine-Cl) अणुः च मिलित्वा उत्पद्यमानानि यानि वि.य.ल.य (NaCl) इति लवण-अणुकानि, तानि मिलित्वा स्थूललवणमुत्पद्यते । जलञ्च ज.ज.$_2$आ.ज. अणुकानां मेलनेन उत्पद्यते । एतदुभयमपि मिलित्वा लवण-जल-मिश्रितम् इति मिश्रितम् उत्पद्यते । तत्र मिश्रिते सर्वत्र जलस्य लवणस्य च मिश्रणं एकधा भवति । एवं अन्तरिक्षवायौ जलजनकं, आम्लजनकं, अङ्गाराम्लवायुः, इत्यादयः भवन्ति। तेषां मिश्रणञ्च प्रायः अन्तरिक्षे सर्वत्र एकरूपेण भवति।

विविध मूलक-मूलकक-ऐकात्म्यद्रव्य-अन्यतरजन्यत्वे सति नैकात्मभावत्वम् नैकात्मद्रव्यत्वम् । नैकात्म्यद्रव्यम् इति विभागे तद्घटकपदार्थानां मिश्रणं सर्वत्र एकरूपेण न भवति। लवण-शर्कर-मिश्रितं, मृत्-



ISSN : 2320-740X

पाषाण-मिश्रितं, जल-लवण-मिश्रिते पाषाणखण्ड इत्यादीन्युदाहरणानि । अत्र घटकानां विभागः सुलभतया कर्तुं शक्यते।

मिश्रितद्रव्यविभागीयानामवयवविभागः भौतिकप्रक्रियया संभवति । एवमत्र (शुद्धद्रव्यवत्) घटकानां सङ्ख्या न निश्चिता। अर्थात् जल-लवण-मिश्रिते किञ्चित् लवणं वा भवतु अधिकं लवणं वा भवतु, तत् जल-लवण-मिश्रितमेव। एवमन्यत्रापि उदाहरणेषु। किन्तु शुद्धद्रव्ये नैवं, यथा अङ्गारवायौ एक अङ्गाराणुः, द्वौ आम्लजनकाणू इति स्थितौ एकस्य आम्लजनकाणोः न्यूनतायां सत्यां तत् अ.र.आ.ज (Carbon Monoxide- CO) इति विषवातकं भवति, यस्य श्वसनेन तत्क्षणे मृत्युर्भवति।

रासायनिकमते पृथिव्यादिप्रभेदवदवयवधाराया अन्तिमं स्थानं क्वचिदणुः क्वचिच्च अणुकमिति अनेन निरूपितम्[1] । अणुकस्यावयव अणुः[2] । 118 मितानि अणवः विलक्षणतया संयुज्य अनेककोटि विविधऽणुकानि उत्पादयन्ति[3] । अणोः अवयवाः इलक्ट्रोण् (Electron-$e^-$), प्रोट्टोण् (Proton-$p^+$), न्यूट्रोण् (Neutron-$n^0$)[4] । इलक्ट्रोण्, प्रोट्टोण्, न्यूट्रोण् च परस्परं विजातीयाः । एतेषां विजातीयसंयोगात् 118 मिताः विविधा अणव उत्पन्नाः । यथा एकं $p^+$, एकं $n^0$, एकं $e^-$ च अनयोर्मेलनेन योऽणुः उत्पद्यते सः जलजनको भवति। 26 $p^+$, 26 $n^0$, 26 $e^-$ एषां मेलनेन यो अणु उत्पद्यते स अयः भवति। इत्थं प्रोटोण् (p+) सङ्ख्या अणुगतगुणान् निश्चिनोति। यदि 47 $p^+$ भवति तर्हि तत् रजतं, यदि 79 $p^+$ भवति तर्हि सुवर्णम् इति। यदि च 80 $p^+$ भवति तर्हि तत् मेर्कुरि (Mercury) भवति, यद् जलीयावस्थायां (Liquid state) भवति।

*****

## शरनिरूपणम्

✍रमानन्दभट्टः.एन्
शोधच्छात्रः

॥ सा मा सत्योक्तिः परिपातु विश्वतः ॥

अथ “दैवज्ञेन समाहितेन समयो देशः **स्ववायुः** ...[5]” इत्यादिना पद्येन पृच्छासमये, आलोके खल्वि[1]त्यादिलक्षणलक्षितेन दैवज्ञेन फलादेशाय अवश्यं ज्ञेयत्वेन कथितेषु पञ्चदशसु विषयेषु

---

[1] अङ्गाराम्लवायुः, जलं, अन्नजमित्यादीनां अणुः न विद्यते, तेषां अवयवधारायाः अन्तिमस्थानं न अणुः, अपितु अणुकं एव। न्यायवैशेषिकानामिदं न सम्मतम्। एवं वायुद्वयसंयोगात् जलोत्पत्तिः, वायु पृथिवी संयोगात् वायूत्पत्तिः इत्यादिः न स्वीक्रियते।

[2] अणुके एतावन्त एव अणवः भवन्ति इति न निश्चितम्। विविधद्रव्याणां अणुके अणुसंख्या विभिन्ना भवति। न्यायवैशेषिके तु अणुके अणुसंख्या निश्चिता।

[3] न्यायवैशेषिके परमाणूनां विलक्षणसंयोगः न स्वीकृतः। चतुर्विधानां परमाणूनां संयोगात् स्थूलप्रपञ्चस्योत्पत्तिः।

[4] न्यायवैशेषिके परमाणोः अवयवाः न सन्ति। अत एव पृथिव्यादिप्रभेदवतामवयवधारेति। अणोः अवयवभूतेषु पृथिव्यादिभेदः नास्तीति यावत्।

[5] प्रश्नमार्गः -२.१२



ISSN : 2320-740X

**निजश्वासो**ऽप्यन्यतमः । आत्मावस्थासदृशमखिलं पृच्छकस्यापि वाच्यमि[2]त्यतः स्वश्वासस्थितिमप्याश्रित्य पृच्छकस्य फलकथनमित्ययं शास्त्रीय एव पन्थाः । इदञ्च श्वासपरीक्षणं दैवज्ञेन प्रतिदिनं प्रातः कार्यम् । तत्र वायोः इडादिगतिरपि ज्ञेया । इडा वामा भवेन्नाडी, दक्षिणा पिङ्गलाख्या इति नाड्योः संज्ञा । तृतीया नाडी अपि विद्यते सुषुम्नाख्या योगशास्त्रोक्ता । अस्याः अत्र मध्यमेति संज्ञा । रन्ध्रद्वयेन निर्विशेषं निर्गमे मध्यमात्वम् इति व्याख्याकारः । एवं नाडीषु वायुसञ्चारपरीक्षणे कृते बुधगुरुशुक्रचन्द्रवारेषु वामे चरन् मारुतः शुभदः, इतरेषु दिनेषु पिङ्गलायां शुभः, विपरीते विपरीतः । अत्र शुभाशुभफलं वपुस्स्वास्थ्य-अर्थागम-मृष्टभोजनतः विण्मोक्षपर्यन्तेष्वपि विषयेषु चिन्त्यमिति शास्त्रविदां मतम् । सूर्यादिषु वासरेषु प्रतिकूले श्वासे क्रमात् वपुर्वेदना-कलह-मरण-दूरप्रयाण-राज्यापत्-कार्यासिद्धि-भूमिनाशादिकञ्च फलं वाच्यम् । सदागतिः सन्तततया भान्वादीनां वासराष्टके विपरीतसञ्चारी क्रमेण गुरुनाश-पुत्रापत्ति-अरिबन्धन-स्वमरण-स्वगुरुमृति-भूहेतुकधननाश-भार्यागृहनाशादिकं पिशुनयति ।

अथ श्वासस्य दैर्घ्यमानेन पृथिव्यादिषु पञ्चसु तत्सञ्चारं निर्धारयेत् । दक्षिणहस्तं नासादण्डमध्ये विन्यस्य श्वासं बहिरवतार्य वामया वा दक्षिणया नाड्या श्वासोऽधिकं बहिरगमदिति परीक्ष्यम् । तस्य श्वासस्य दैर्घ्यमपि सूक्ष्मतया परीक्षेत । आगतो वायुः यदि षोडशाङ्गुलः तर्हि तत्र पृथिवीभूतमिति, द्वादशाङ्गुले आप इति, अष्टाङ्गुलमिते तेजः इति, मारुत इति षडङ्गुलमिते, त्र्यङ्गुलमिते आकाश इत्येवं वायोः भूतसञ्चारक्रमः । एवं भूतेष वायोः सञ्चारे ज्ञाते "पक्षेऽच्छे खलु पक्षतौ क्षितिरिडायातोन्नमन्मन्दिरम्....[3]" "वह्निर्वारिभयायुधक्षतिशरीरारुर्गृहप्लोषणम्...." इत्यादि फलं वाच्यम् । एवमुभयनाड्योरिदं समं फलं, किन्तु संहतदीर्घः श्वास एव शुभदः, विशीर्णाग्रः सर्वथा अशुभः इति मन्तव्यम् । एतच्च प्रश्नसामान्यविषयम् ।

नष्टप्रश्ने तु – वायोः पृथिव्यादिषु अवस्थितिश्चेत् नष्टवस्तु क्रमात् भू-जल-भूपृष्ठ-धूम-ऊर्ध्वदेशेषु वा पूर्व-दक्षिण-पश्चिम-सौम्यदिक्षु आकाशे तु मध्ये वा तत्रैव अस्तीति वाच्यम् ।

रोगप्रश्ने तु, दक्षभागगः पुरुषः कश्चिद्वा रोगी यदि पृच्छति दैवज्ञस्य वायुसञ्चारोऽपि तदा दक्षिणे तर्हि स रोगी चिरञ्जीवति, यदि पुरुषो रोगी । स्त्री चेद्रोगिणी वामस्थिता अथवा कश्चन वामस्थः पृच्छति, वायुरपि इडासञ्चारी तदा शुभं वाच्यम् । पृच्छके दक्षिणस्थे वायौ इडास्थे वा वायौ दक्षिणस्थे पृच्छके वामस्थिते रोगस्य कृच्छ्रसाध्यत्वं वाच्यम् । तथा उच्छ्वासद्वारा अन्तर्गते वायौ पृच्छति सति रोगी जीवति, निःश्वासेन बहिर्गते वायौ चेत्पृच्छा रोगी म्रियते इति वक्तव्यम् । अनुष्ठानपद्धतौ तु पुंस्त्री-अभेदेन वायुसंयुते दिशि पृच्छकस्य अवस्थानं जीविताय भवतीति । मरणसूचकशकुनाभावे दूतमारुतयोरेकदिक्त्वं जीवदम् अन्यथा

---

[1] आलोके खलु यस्य कस्यचिदसावायाति यत्किञ्चन प्रष्टुं मां प्रति नूनमित्यवहितस्तन्यस्तदृष्टिर्दृढम् । तच्चेष्टादिकमाकलय्य सकलं तत्कालजातं पुनर्जानीयात्सदसन्निमित्तमपि च **स्वासस्थितिं चात्मनः** ॥ - प्रश्नमार्गः २.०२

[2] प्रश्नमार्गः २.४८

[3] प्रश्नमार्गः – २.३६-३८



ISSN : 2320-740X

नाम लयलिङ्गश्रवणाद्यभावे वा तत्सद्भावे दूतमारुतयोर्भिन्नदिक्त्वं मृतिप्रदम् । चरः पृष्टा पृच्छानन्तरं दैवज्ञश्वासदिशि तिष्ठति चेदपि रोगनाशो वदनीयः ।

गर्भप्रश्ने तु – केवलं गर्भिणीदर्शनात् तत्काले वायौ दक्षिणे सति पुमान्, वामे सति स्त्री, मध्ये सुषुम्नायां निर्जीवापत्यं वाच्यम् । गर्भिण्या पृष्टे सा श्वासदिशि अस्ति चेत् पुमान्, वायुशून्यदिशि स्त्री, द्वयोर्यदि वायुः तर्हि युगलमिति वदेत् । पृच्छाकाले वायोराकाशसञ्चारे शिशुमृतिर्वाच्या । वायुयुक्तदिशिपृ ष्ट्वा समनन्तरमेव वायुरहितदिशि तिष्ठति चेदपि असत्प्रजा वाच्या ।

देवप्रश्नेऽपि शरनिरूपणं कार्यम् । “देवेन देवो दूतेन देवतायतनं क्रमात्…”[1] इत्यतः श्वासस्थित्या देवं, दूतेन देवालयं, एनयोरैक्ये देवसान्निध्यवृद्धिं च चिन्तयेत् । श्वासदिशि दूतसंस्थे सान्निध्यवृद्धिम्, अन्यथा अशुद्धिमादिशेत् । शुक्लपक्षे, शुभवासरे च इडा शुभा, इतरेषु पिङ्गला शुभा । यदि नाडी दूतसहिता तर्हि अखिलकलापरिपूर्णत्वं देवस्य वाच्यम् इत्येवं शरफलं देवप्रश्ने ।

इडानाडी निर्गमे, पिङ्गला प्रवेशने शुभा । अर्थात् वामनासारन्ध्रेण श्वासनिर्गमनकाले स्वगृहात् प्रस्थाय दक्षनासावायुसञ्चारकाले राजगृहादि प्रवेशनं सर्वाभीष्टसिद्धिं करोतीत्यर्थः ॥

एवं “विवादे द्यूतयुद्धे च स्नानभोजनमैथुने । व्यवहारे भये भङ्गे भानुनाडी प्रशस्यते” ॥ यात्रादानविवाहेषु वस्त्रालङ्कारभूषणे । शुभे सन्धौ प्रवेशे च वामनाडी प्रशस्यते” [2]॥ इत्यादिभिः अनेकैः वचनैः अङ्कयुद्धादिप्रकरणभेदेन श्वासफलं बहूक्तं प्रश्नमार्गादिषु उद्ग्रन्थेषु । तदत्र विस्तरभिया नोल्लिख्यते मया इति शम् ॥

॥ जगदम्बार्पणमस्तु ॥

ग्रन्थसूची-

१.प्रश्नमार्गः(कन्नडव्याख्या) –ज्योतिर्विज्ञानप्रकाशन- कब्याडि -२००१

२.प्रश्नमार्गः (संस्कृतव्याख्या) –पट्टाम्पि -१९२६

३.प्रश्नसङ्ग्रहः –के.वि.गोपलभट्टः – रत्नावती[प्रन-कापु.

४.प्रश्नानुक्रमः-उडुपि-२००५

*****

[1] प्रश्नसङ्ग्रहः - ८.१०१

[2] प्रश्नमार्गः – २.५६-५७



ISSN : 2320-740X

# हल्ङ्याबिति सूत्रे अपृक्तग्रहणविचारः

✍शशाङ्क तिम्मण्ण भट्टः
शोधच्छात्रः

सुबन्तप्रक्रियायां सखिशब्दनिरूपणप्रसङ्गे सूत्रमिदं व्याख्यायते। सखिशब्दात् सुप्रत्यये, 'अनङ् सौ' इत्यनङादेशे, 'सर्वनामस्थाने चासम्बुद्धौ' इति उपधादीर्घे, सखान् स् इत्यवस्थायां सकारस्य लोपविधानार्थमिदमारभ्यते।

हल् च ङीप् च आप् च इति द्वन्द्वः। हल्ङ्याभ्यः इति पञ्चमीश्रवणात् 'तस्मादित्युत्तरस्य' इति परिभाषोपस्थितिः। सूत्रे दीर्घादिति विशेषणं ङ्यापोरेव, असम्भवात् तद्विशेषणं न हलः। सुतिसि इत्येतेषां प्रत्ययत्वात् तेन प्रकृतिः आक्षिप्यते। एवं च हल्ङ्याभ्यः इत्यस्य सुतिसिप्रत्ययैराक्षिप्त-प्रकृतिविशेषणतया तदन्तविधिः। ङ्यापोः प्रत्ययत्वात् प्रत्ययग्रहणपरिभाषया च तदन्तविधिः। ततः हलन्तात् दीर्घङ्याबन्तादिति लब्धम्। 'लोपोव्योर्वलि' इत्यतः लोपः इत्यनुवर्तते। ततश्च हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसि इत्येतदपृक्तं हल् लुप्यते इति सूत्रार्थः।

सूत्रे सुतिसि इत्यनेन लुप्तेकारोकाराः गृह्यन्ते। एतेषां सुतिसि इत्येवं रूपत्वमेकदेशविकृतन्यायेन ग्राह्यमिति दीक्षिताः। शब्दरत्नकारस्तु अर्धाधिकविकारे स एव अयमिति प्रत्यभिज्ञाभावात् न्यायस्यास्य अप्रवृत्तिः इत्याह। तस्मादिह स्थानिवद्भावेन सुतिसि इत्येवं रूपत्वमवगन्तव्यमिति तदाशयः।

सूत्रे हल्ङ्याभ्यः इति न विहितविशेषणम्। यदि विहितविशेषाणमिह स्वीक्रियेत तर्हि हलन्तात् दीर्घौ यौ ङ्यापौ तदन्ताच्च विहितं सुतिसि इत्येतदपृक्तं हल् लुप्यते इत्यर्थः स्यात्। ततश्च या, सा इत्यादौ सुप्रत्ययः दीर्घङ्याबन्ताद् न विहितः इत्यतः सकारस्य लोपो न स्यात्। नात्र हलन्ताद्विहितत्वेन परिहारः, यः, सः इत्यादौ सुप्रत्ययः हलन्ताद्विहितः इत्यतः सुलोपापत्तिः। कर्ता इत्यादौ कर्तृशब्दात् सुप्रत्यये 'अनङ् सौ' इत्यनङादेशे, कर्तन् स् इत्यत्र सुप्रत्ययः हलन्तात् दीर्घङ्याबन्ताद् वा न विहितः इति सकारस्य लोपाभावापत्तिश्च।

सूत्रे अपृक्तग्रहणाभावे बिभर्ति इत्यत्र तकारस्य लोपः स्यात् इत्युदाजह्रुः दीक्षिताः। वस्तुतस्तु एतदुदाहरणं प्राचीनमतरीत्या। भिनत्ति, छिनत्ति इत्युदाहरति प्रक्रियाकौमुद्याः प्रकाशकारः। तस्य मते असत्यपृक्तग्रहणे हलन्तात् परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसिरूपं हल् लुप्यते इत्यर्थः स्यात्। तथा सति भिनत्ति छिनत्ति इत्यादौ भिनद् ति, छिनद् ति इत्यवस्थायां तकाररूपस्य हलः लोपापत्तिः। तस्मादिह अपृक्तग्रहणम्। सत्यपृक्तग्रहणे ति इत्यस्य नापृक्तत्वमिति।

प्रत्युदाहरणमिदं दीक्षितमते चिन्त्यम्, विशिष्टस्य हल्त्वासम्भवात्। तस्मादपृक्तग्रहणाभावेऽपि अस्मिन् प्रत्युदाहरणे तकाररूपस्य हलः लोपाभाव एव। किञ्च अपृक्तग्रहणाभावेऽपि हल्ङ्याभ्यो दीर्घात्



ISSN : 2320-740X

[redacted]

सुतिसि हल् इत्यत्र सामानिधिकरण्येन अन्वयमकृत्वा, षष्ठीसमासं स्वीकृत्य, सुतिसीनां हल् लुप्यते इति व्याख्याय, अधुना भिनद् ति इत्यत्र तिसम्भन्धीहल् लुप्येत इति अस्य प्रत्युदाहरणसम्भवेऽपि, सुतिसीनां हलिति क्लिष्टं व्याख्याय अतिप्रसङ्गापादनमनुचितम् । सति सामानाधिकरण्ये वैयधिकरण्येनान्वयस्य अन्याय्यत्वात् ।

प्रक्रियाकौमुद्याः प्रसादकारः अस्यैव प्रत्युदाहरणम् इत्थं ददाति – सुरां सुनोतीति विग्रहे, सुरा इत्युपपदपूर्वक-अभिषवार्थकषुञ् धातोः क्विप् प्रत्यये, सर्वापहारलोपे, 'ह्रस्वस्य पिति कृति तुक्' इति तुगागमे, सुरासुत् इति रूपम् । ततः सुरासुतमाचष्टे इत्यर्थे 'तत्करोति तदाचष्टे' इति णिचि, 'णाविष्ठवत्' इति इष्ठवद्भावेन उदित्यस्य लोपे, ततः आचारार्थे क्विपि, इष्ठवद्भावेन णिचः लोपे सुरास् इत्यवस्थायां, प्रथमा विभक्तौ सुराः, सुरासौ, सुरासः इति रूपाणि सिध्यन्ति । तत्र प्रथमाविभक्तावेकवचने सुरास् स् इत्यवस्थायां विभक्तिसकारस्यानेनैव सूत्रेण लोपः । परं सूत्रे यद्यपृक्तग्रहणं न स्यात्, तर्हि सुरास् इत्यत्र अवयवसकारस्यापि लोपः स्यात् । अपृक्तग्रहणे तु सकारस्य न लोपः, तस्य एकाल्प्रत्ययत्वाभावादिति ।

दीक्षितैरेतन्निराकृतम् । सूत्रे तिस्योः साहचर्यात् सु इत्यस्यापि विभक्तिप्रत्ययत्वेनेह ग्रहणम् । अन्यथा 'अभैत्सीत्' इत्यदावपि सिचः सकारस्य लोपापत्तिः । 'प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्' इति परिभाषया च सुरास् स् इत्यत्र प्रत्ययसकारस्यैव ग्रहणं, न तु धातुसकारस्य । तस्मादपृक्तस्याग्रहणेऽपि इह प्रत्यय सकारस्यैव लोपसम्भवात् प्रत्युदाहरणमिदं न युक्तमिति ।

सूत्रेऽस्मिन् अपृक्तपदं, हल्पदद्वयं, दीर्घपदं, तिस्योश्च ग्रहणमकृत्वा 'ङ्यापः सोः' इति सूत्रयितुमुचितमिति मनोरमायां निष्कर्षरूपेण उक्तम् । सुराः सुरासौ इत्यादौ तु सूत्रे तिस्योरभावेऽपि, ङ्याभ्यां साहचर्यात् प्रत्ययग्रहणपरिभाषया च सोः प्रयत्वेन ग्रहणं सम्भवत्येव । हल्ङ्याब्सूत्रे भाष्ये ''यदि पुनरयमपृक्तलोपः संयोगान्तलोपो विज्ञायेत'' इत्युक्त्वा ''द्विहलपृक्तग्रहणं तिस्योश्च ग्रहणं न कर्तव्यं भवति'' इति समाहितम् । तत्र द्विहलपृक्तग्रहणं तिस्योश्च ग्रहणाभावे ये ये च दोषाः समुत्पन्नाः, ते च मार्गान्तरेण परिहृत्य "न चेद्विज्ञायते, द्विहलपृक्तग्रहणं तिस्योश्च ग्रहणं कर्तव्यमेव" इति संसाधितम् । एतद् भाष्यबलात् 'ङ्यापः सोः' इति न्यासोऽस्तु इति दीक्षिताः आशेरते ।

*****



ISSN : 2320-740X

## नष्टजातकम्

✍श्रीपतिः
शोधच्छात्रः

**॥ मिहरमिववराहमिहिरंवन्देसन्देहभेदिनंजगताम् ॥**

**"स्वल्पंतत्सकलंततोरचितवानादित्यदासात्मजोभूत्वायोमिहिरोवराहमिहिरोनाम्नानमस्कुर्महे'**

इत्यादिभिःपरस्सहस्रवचनैःभट्टोत्पलादिभिःसाक्षाद्भगवतोभास्वतःस्वरूपेणस्तुतोवराहःज्योतिश्शास्त्रेमंहिष्ठप दं भजते। अनेन लघु-बृहद्भेदेननैकेग्रन्थाःव्यरचि। तत्रापि, **एतेष्वपित्रिषुश्रेष्ठाहोरेतिश्रूयतेमुने**इत्येवंरूपमैत्रेयवचनेन,पाराशर्येत्रिष्वपिस्कन्धेषुश्रेष्ठत्वेनस्तुतेहोरास्कन्धे अन्तर्भूतौलघुजातक-बृहज्जातकाख्यौ विशेषतया सर्वैः दैवज्ञैः लोकेफलकथनाय आश्रीयेते। सम्प्रतिलघुजातकोक्तदिशानष्टजातकक्रमःकिञ्चिद्विव्रियते।

णश अदर्शने इति धातोः **"गत्यर्थाकर्मक-श्लिष-शीङ्-स्थास-वस-जन-रुह-जीर्यतिभ्यश्च"** इत्यनेन कर्तरि क्त प्रत्यये नष्टशब्दसिद्धिः। नष्टम् अदृष्टम् अज्ञातम् इति नष्टशब्दार्थः। जातस्य इदं जातकं, जातस्य बालकस्य जन्मान्तरार्जितसदसत्कर्मजनितशुभाशुभनिरूपकं किञ्चित्जातकशब्देन उच्यते इत्याह कृष्णदैवज्ञः । नष्टम् च तत् जातकं च, नष्टम् अदृष्टम् अज्ञातं जातस्य जन्मान्तरार्जितसदसत्कर्मजनितशुभाशुभनिरूपकं किञ्चित् इति नष्टजातकपदार्थः । एतदेव आह भगवान्वराहोपि बृहज्जातके – **"आधानजन्म-अपरिबोधकाले"** इति। आधान-जन्मनोः अपरिबोधे अर्थाद् अज्ञाने सत्येव नष्टजातकेन फलम्। अत्रजन्मनो वा आधानस्य काले एव अज्ञातत्त्वं सम्भवति नान्यत्र इत्यतः नष्टत्वं कालस्यैव भवति। विज्ञातजन्मसमयादीनां तात्कालिकग्रहस्थितिवशेन यथासम्भवफलविशेषाः यथा प्रोच्यन्ते तथैव अज्ञातसमयानामपि दृष्टजातकवल्लक्षणकथनाय शास्त्रप्रदर्शितः उपायः एव नष्टजातकम् इत्याह रुद्रभट्टः।

तत्रतावल्लघुजातके **"गोसिंहौजुतुमाष्टमौ..."** इत्यादिभिः षड्भिः पद्यैः नष्टजातकनिर्माणक्रमः प्रोक्तः। अविज्ञातसमयैः यदा नष्टजातकार्थं दैवज्ञः पृष्टः, तदा तात्कालिकलग्नवशात्तस्य जन्म वक्तव्यम्, अर्थात् पृच्छाकालिक-उदयलग्नवशादेव नष्टजातकं निर्मीयते । एतच्चाहलघुजातके **"एवं कलत्रसहजात्मजशत्रुभेभ्यःप्रष्टुःवदेदुदयरा-शिवशेनतेषाम्"** इत्यत् । **"गोसिंहौ..."**इत्यादिभिःराशिग्रहाणां ये गुणाकाराः प्रोक्ताः ते गुणकाः भवन्ति यदा स राशिः लग्नस्थो भवति। **"राशीनांनियतोविधिः"** इत्यतः पृच्छाकालिक-उदयलग्नस्थितराशेः गुणकः लग्नस्फुटेन, तस्मिन्ग्रहयोगे सति ग्रहाणां च गुणकः तत्तद्ग्रहस्फुटेन हत्वा संयोज्यतद्गुणपिण्डं सप्ताहतं त्रिघनभाजितं सद् यच्छेषं तत् प्रष्टुः जन्मर्क्षंभवति। अथवा शेषेनवकदान-विशोधनाभ्यां प्रष्टुः जन्मर्क्षं भवति। अर्थात् यदि प्रश्नलग्ने प्रथमोद्रेष्काणः तर्हि नव देयाः, तृतीये



ISSN : 2320-740X

शोध्याः, मध्ये तु यथाप्राप्तमेव इति स्पष्टं प्रोवाच उत्पलभट्टः इत्येवं नष्टजातके नक्षत्रज्ञानम्। यथात्र उदयेन प्रष्टुः नक्षत्रज्ञानं तथैव तस्यामेवग्रहस्थितौसप्तमेन प्रष्टुः कलत्रस्य नक्षत्रं निरूप्यम्, तृतीयतः सहजस्य, पञ्चमतः पुत्रस्य... इत्यादि।

एवमेव राशिगुणाकारेण, सतिसम्भवे ग्रहगुणाकारेण च गुणितेन पृच्छाकालिक-उदयलग्नेन वर्षादिज्ञानमाह–**"वर्षर्तुमासतिथयः..."** इत्यादिना। अत्र गुणने सम्प्रदायद्वयं दृश्यते - भूयोगुणनम्, पृथग्गुणनं चेति। उदयलग्नं तदुक्तगुणकेन सङ्गुण्यप्राप्ते, ग्रहगुणकेन गुणनं, द्वित्रादिग्रहेषु सत्सु पुनःपुनःगुणिते एव गुणनमिति भूयो गुणनक्रमः। उदयलग्नं, ग्रहांश्च तत्तद्गुणकेन पृथग्गुणयित्वा तेषां संयोजनमिति पृथग्गुणनक्रमः। अत्र भूयोगुणनक्रमो न विवक्षितः, पृथग्गुणनमेवकार्यमित्याह रुद्रः। किन्तु सम्प्रदायसिद्धेन क्रमेण पूर्ववत् गुणनपिण्डमुत्पाद्य तत्र पूर्वोक्तवन्नवकदानविशोधनाभ्यां गुणपिण्डं कर्मयोग्यं भवति। एतच्च भूयो दशादिभिः गुणयेत्। अर्थात् कर्मयोग्यगुणकं चतुर्षु स्थानेषु संस्थाप्य एकत्र दशकेन, अपरम् अष्टभिः, अन्यं सप्तभिः,अवशिष्टं च पञ्चभिः गुणयेत्। एवं गुणनात्प्राप्तं स्वस्वविकल्पेन भक्ते शिष्ट सङ्ख्यातुल्यं प्रष्टुः जन्मवर्षादयो भवन्ति। अर्थात् दशकगुणितेन गुणपिण्डेन स्वस्वविकल्पभजनेन वर्षर्तुमासतिथयः, अष्टगुणितेन द्युनिशे, सप्तगुणितेन उडूनि, पञ्चगुणितेन वेलोदयर्क्षनवभागादयःलभ्यन्ते। स्वविकल्पभक्त्वे इत्यस्य अयमर्थः यत् - प्रष्टुः जन्मवर्षं यदि ज्ञातव्यं तर्हिगुणपिण्डं दशकगुणितं वर्षविकल्पेन अर्थात् प्रभवादिसंवत्सरसङ्ख्यया षष्ट्या विभजेत्, ऋतुज्ञानार्थं शिशिरादीनां सङ्ख्यया षड्भिः विभजेत्, मासज्ञानार्थं चैत्रादिसङ्ख्यया द्वादशभिः विभजेद् इत्याद्यूह्यम्। नक्षत्रानयनं तु पूर्वोक्तमेव अत्रपुनरुक्तम्। नवभागविकल्पनाद्याः इत्यनेन द्वादशांश-त्रिंशांशादयः आनेयाः इति। **"विज्ञेयादशकेष्वब्दाः..."** इत्यादिभिः त्रिभिः श्लोकैः अत्रोक्तमेव पुनरपि उक्तवान्। एवम् अत्र तत्कालभवलग्नेन वर्ष-मास-तिथि-दिन-रात्रि-नक्षत्र-जन्मकाल-उदयलग्न-तन्नवांशादीनाम् आनयनक्रमो विवृतः। अत्रापि पुनः वैरुध्येप्राप्ते, राश्यंशकलात्मस्य लग्नस्य राशिस्थानहृतशिष्टेन वा, भागीकृत्य हृतशिष्टेन वा, लिप्तीकृत्य हृतशिष्टेन वा परस्परविरोधाः परिहर्तव्याः इत्याह रुद्रः। पुनरत्र ग्रहाणां ज्ञानं नोक्तं, रुद्रस्तु **"नष्टजातकप्रश्नेसामान्येन गुरुरविचन्द्रलग्नानां चतुर्णां स्वरूपमादेष्टव्यम्"** इति वक्ति, **"लग्नत्रिकोणेषु गुरुं त्रिभागैःविकल्प्य.."**इत्यादिना बृहज्जातकेपि तदानयनक्रमः प्रोक्तः, अत्र तज्ज्ञानं कथमिति चेद् - **"अनुक्तम् अन्यतोग्राह्यम्"** इति न्याय्यात् अन्यशास्त्रेण स्वीकार्यम् इत्यपि वक्तुं शक्यते। किन्तु अत्रोक्तक्रमेण जननवेलाज्ञानं भवतीति कृत्वा जननकाले ज्ञाते सिद्धान्तोक्तविधिना तत्काले ग्रहाः साध्याः इति स्वयमेव ज्ञातुं शक्यते, अत्र पुनः का वक्तव्यता?। **"इति नष्टजातकमिदं बहुप्रकारं मया विनिर्दिष्टम्"** इति बृहज्जातकस्थवराहोक्त्या ज्ञायते नष्टजातकस्य बहवः प्रकाराः सन्तीति। किन्त्वत्र लघुजातके नष्टजातकनिर्माणस्य एकः एव मार्गः मिहिरेण प्रदर्शितः, तत्तु शास्त्रप्रवेशार्थिनां सौलभ्याय इति मन्ये। एवम्



[redacted]

ISSN : 2320-740X

नष्टजातकार्थं प्रच्छकेन पृष्टमात्रो दैवज्ञः तत्कालभवलग्नेन, तत्रस्थैश्चग्रहैः शास्त्रोक्तरीत्या प्रष्टुः नष्टस्य अदृष्टस्य जातकस्य दर्शनं शास्त्रधिया विविच्य जातकं निर्मीय कारयेदित्यलमति विस्तरेण वचसा।


- बृहज्जातकस्यरुद्रटीका -रुद्रभट्टः चौकाम्बासंस्कृतप्रकाशनम्
- बृहत्पाराशरहोराशास्त्रम् - पद्मनाभमिश्र चौकाम्बासंस्कृतप्रकाशनम्
- लघुजातकम्- भट्टोत्पलटीका भट्टोत्पलः चौकाम्बासंस्कृतप्रकाशनम्
- लघुपाराशरि - कामाख्यटीका चौकाम्बासंस्कृतप्रकाशनम्
- सारावली-कल्याणवर्मा
- सूर्यसिद्धान्तः-रामचन्द्रपाण्डेयः चौकाम्बासंस्कृतप्रकाशनम्


*****

## अष्टकवर्गः


✍**सुब्रह्मण्यभट्टः**

शोधच्छात्रः


दीपः यथा तमसि वस्तूनि प्रकाशयति तथा अन्यजन्मनि उपार्जितस्य कर्मणः पक्तिं प्रकाशयति इदं ज्योतिश्शास्त्रम्। एतदर्थं प्रवृत्ते शास्त्रे फलचिन्तने सन्ति नैके प्रकाराः। "दशाप्रभेदेन विचिन्तयेद्दृढंदृढेतरं चाष्टकवर्गगोचरैः। दृढादृढं योगवशेन चिन्तयेदिति त्रिधा जातकसूक्ष्मसङ्ग्रहः" इति प्रधानतया फलचिन्तनस्य त्रैविध्यं प्रादर्शि चाचार्यैः। दृढकर्मोपार्जितस्य दशान्तर्दशादि विषयस्य शुभाशुभफलादि विषयं प्रस्तुत्यततः अदृढकर्मार्जितस्य गोचरफलस्वरूपस्य शुभाशुभविपाकस्य कालविशेषान्प्रदर्शयितुम् अष्टकवर्गमाह तत्रभवान्भगवान्वराहः स्वीयलघुजातके - "केन्द्रायाष्टद्विनवस्वर्कः......." इत्यादिभिः पद्यैः।

अत्र सूर्यादिभ्यः सप्तभ्योपि ग्रहेभ्यः लग्नाच्च प्रत्येकतया सूर्यादीनां ग्रहाणां सप्तानाञ्च शुभबिन्दवो निर्दिश्यन्ते। अनिर्दिष्टस्थानेषु अशुभं वेद्यम्। "स्थानेष्वेतेषु शुभाःशेषेष्वहिता भवन्ति" इति उत्तरत्र उच्यते च। शुभस्थानज्ञानाय राशौ बिन्दुस्थापनम्, अशुभज्ञानाय तिर्यग्लघुरेखास्थापनम् इति सामान्यतोव्यवहारः। अत्रसम्प्रदायः एव शरणीकर्तव्यः। एवम् एकस्मिन्राशौ अत्यधिकम् अष्टौबिन्दूनिभवन्तीति अस्य अष्टवर्गः इति समीचीनं नाम। एतदेव सुस्पष्टमाहभगवान्रुद्रः स्वीयविवरणे– "शनैश्चर-सुरगुरु-भौम-अर्क-शुक्र-बुध-चन्द्र-लग्नात्मकस्य अष्टकस्य जननकालेयेषु राशिषु स्थितिः, तेभ्यः अष्टभ्योपि आरभ्य राशिद्वादशके चरतां



ISSN : 2320-740X

[redacted]

ग्रहाणां सप्तानां यत्र तत्र राशौ चारकाले शुभप्रदत्वं भवति, तेषां स्थानानां वर्गः समुच्चयः अष्टकवर्गशब्देन उच्यते" इति।

अत्र किञ्चिद्रव्यष्टकवर्गक्रमः दृष्टान्तत्वेन प्रदर्श्यते। जननकाले रविः यत्र स्थितः ततः केन्द्र-आय-अष्टम-द्वितीय-नवमेषुसञ्चरन्रविःशुभं दिशति। एवमेव मन्दभौमाभ्यामपि ज्ञातव्यम्। एवं शुक्रात्षट्-सप्त-अन्त्येषु, गुरोः षडायधीधर्मगः, चन्द्रात् उपचयगः, बुधाद् उपचय-नवम-अन्त्य-धीगतः, लग्नाच्च उपचय-बन्धु-व्ययस्थितः शुभदो भवतीति जानीयात्, तेषु राशिषु बिन्दवश्च स्थाप्याः। अनुक्तेषु अशुभमिति विज्ञेयम्। एवम् एतेषु रेखाश्च कार्याः। एवमादित्यस्य अष्टचत्वारिंशद्बिन्दवः, अष्टचत्वारिंशद्रेखाश्च जायन्ते। इतरेषामपि एवमेव अष्टकवर्गः कार्यः।

यथा दशानां दशाफलमिति विशेषतो वर्तते तथा नास्ति अष्टकवर्गफलमिति। किन्तु तत्र फलचिन्तनमाह मिहिरः– "अशुभशुभविशेषफलं ग्रहाः प्रयच्छन्ति चारगताः" इति निर्णयः। अतः अष्टकवर्गेण गोचरफलमेव कथ्यते। सामान्यतः गोचरफलं चन्द्रमाश्रित्य कथ्यते। तथापि यस्मिन्चन्द्रभावे स्थितो ग्रहः अशुभं दिशतीति मुहूर्तग्रन्थादिषु प्रोक्तं तद्राशौ शुभबिन्दूनाम् आधिक्ये अशुभस्य ह्रासः इत्यादिकं महता दैवज्ञेन विविच्य वक्तव्यम्। एवं दशाफलानां पाककालनिर्देशनार्थमपि उपयुज्यते अयम्। यद्राशिगतो ग्रहः, तत्र शुभबिन्दूनामाधिक्ये सत्येव दशाशुभविशेषफलप्राप्तिकालनिर्देशः कार्यः अन्यथा नेति इति अत्रापि अष्टकवर्गः समाश्रयणीयः। अत्र फलचिन्तने इष्टानिष्टफलस्य तारतम्यमाह वराहः स्वीयबृहज्जातके "उपचयगृहमित्रस्वोच्चगाः.........." इत्यादिभिः। यदि कस्मिंश्चिद्राशौ अधिकतया शुभं दृश्यते तत्र तद्राशिः यदि फलदातृग्रहस्य उच्चं तर्हि तत्र इष्टम् इतोपि पुष्टं ज्ञेयम्। यदि नीचस्थानं तर्हि नेष्टसंपद्वाच्या। पुनः अत्र इष्टकष्टयोः अन्तरं कृत्वा अवशिष्टस्य फलपक्तिरित्याह भट्टोत्पलः। यत्र बिन्द्वष्टकं तत्र संपूर्णं शुभं, यत्र षड्बिन्दवः तत्रपादोन फलम् इत्यादि तारतम्यचिन्तनं कार्यं, तत्र समानतायाम् उपचयादिराशिमाश्रित्य फलं कथयेत्। एवं रुद्रोपि अष्टकवर्गफलचिन्तने नैकान्मार्गान्प्रादर्शयत्। एवं फलदीपिका-प्रश्नमार्गादिष्वपि अस्य अष्टकवर्गस्य महान् उपयोगः फलचिन्तने प्रदर्शितः। किन्तु तदत्र नो विविच्यते। एवं यवनादिभिः द्वादशधा परिकल्पितः फलपाकः आचार्येण मिहिरेण त्रिविधः परिकल्पितः दृढ-अदृढ-दृढादृढभेदेन इति, एतानि त्रीण्यपि फलानि सम्यग्विविच्य यथा-अविरुद्धं समायोज्य सांवत्सरलक्षणयुक्तेन सांवत्सरेण कुशाग्रधिया फलं समादेष्टव्यम् इति शम्।

ग्रन्थसूची-


- बृहज्जातकस्यरुद्रटीका — रुद्रभट्टः, चौकाम्बासंस्कृतप्रकाशनम्
- बृहत्पाराशरहोराशास्त्रम् — पद्मनाभमिश्र, चौकाम्बासंस्कृतप्रकाशनम्
- लघुजातकम्- भट्टोत्पलटीका — भट्टोत्पलः, ,चौकाम्बासंस्कृतप्रकाशनम्




ISSN : 2320-740X

- लघुपाराशरि - कामाख्यटीका चौकाम्बासंस्कृतप्रकाशनम्
- सारावली कल्याणवर्मा
- सूर्यसिद्धान्तः रामचन्द्रपाण्डेयः, चौकाम्बासंस्कृतप्रकाशनम्


*****

## संयोगस्य अव्याप्यवृत्तित्वम्


सुनीता भट्
शोधच्छात्रा


दर्शनं नाम वस्तुतत्त्वनिरूपकः श्रेष्ठपुरुषप्रवर्तितो विशिष्टशब्दसन्दर्भः । तथा चाऽह न्यायकोशकारः “दर्शनं तत्त्वज्ञानसाधनं शास्त्रम्” इति । तच्च दर्शनं नास्तिकास्तिकभेदेन द्विविधम् । तत्र बौध्दचार्वाकादिदर्शनानि नास्तिकदर्शनानि । न्यायवैशेषिकसांख्ययोगपूर्वोत्तरमीमांसादर्शनानि आस्तिकदर्शनानि । एषु आस्तिकदर्शनेषु सर्वशास्त्रोपकारकत्वात् न्यायवैशेषिकदर्शनयोः प्राधान्यं वर्तते । तत्र वैशेषिकदर्शनानुगुणं द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः इति सप्तपदार्थाः अङ्गीकृताः । तत्र गुणाः चतुर्विंशतिविधाः । बुध्दिसुखदुःखेच्छा द्वेषप्रयत्नधर्माधर्मभावनानां संयोगविभागयोश्च अव्याप्यवृत्तित्त्वं न्यायमते अङ्गीकृतम् ।तदुक्तम् “अथ प्रादेशिको भवेत् वैशेषिको विभुगुणाः संयोगदिद्वयं तथा” इति (कारिकावली)। तत्र अन्यतमस्य संयोगस्य अव्याप्यवृत्तित्त्वमत्र विचार्यते ।

संयोगस्य एवद्द्रव्यवृत्तित्वमिति सिद्धान्तानुगुणं नित्यद्रव्येषु जन्यद्रव्येषु च सर्वत्र संयोगः भवत्येव । जन्यद्रव्येषु संयोगः भवतीत्यत्र न काप्यनुपपत्तिः । परन्तु नित्यद्रव्येषु परमाणुषु गगनादौ च संयोगः कथं भवितुमर्हति ? संयोगस्याऽव्याप्यवृत्तित्वात् , तद्धि अवच्छेदकमन्तरा न सम्भवति । तथा हि यद्येकस्मिन् परमाणावितरस्य परमाणोः किञ्चिदवयवावच्छेदेन संयोगो अङ्गीक्रियते तदा परमाणोः सावयवत्वं स्यात् । तेन परमाणोः नित्यत्वं बाध्यते । यदि किञ्चिदवयवावच्छेदेन संयोगः नाङ्गीक्रियते तदा परमाणौ सर्वात्मना संयोगः भवतीति वक्तव्यमापतति । एवं सति संयोगस्य अव्याप्यवृत्तित्वं भज्येत । एवं परमाणोः परमाणुना सर्वात्मना संयोगे परिमाणोपचयानुपपत्तेः । यतः लोके अवयवयोः सर्वात्मना संयोगेन जायमानावयविनः द्रव्यस्य परिमाणोपचयः न केनाऽपि दृष्टः । यदि निरवयवयोरपि परमाण्वोः संयोगः स्वभावत एव भवतीत्यङ्गीक्रियते तर्हि परमाणुसंयोगवति परमाणुसंयोगाभावस्य स्वीकरणीयताऽऽपतति । न चैवं सम्भवति, अवच्छेदकमन्तरा विरुध्दयोः भावाभावयोरेकत्र समावेशायोगात् । परमाणौ अवच्छेदकभेदः भवितुं नार्हति परमाणोः निरवयवत्वात् ।



ISSN : 2320-740X

यद्यपि प्राच्यादिदिग्विशेषावच्छिन्नः संयोगः परमाणौ सम्भवतीति कल्पयितुं शक्यम्, अथापि देशविशेषावच्छिन्नत्वं विना दिगवच्छिन्नत्वस्य कुत्रापि संयोग अदर्शनात् परमाणौ अवच्छेदकभेदः न सिध्यति । परमाणुग्राहकप्रमाणेन परमाण्वोः निरवयवत्वं सिध्यति, तेन परमाणौ देशावच्छिन्नत्वं नास्ति चेदपि दिग्विशेषमात्रावच्छिन्नः संयोगः परमाण्वोः भवतीति न वक्तव्यम्, परमाणुसंयोगानुपपत्तिरूपप्रतिकूलतर्कपराहततया निरवयवपरमाण्वोः सिध्देरेवासम्भवात् ।

दिग्विशेषावच्छिन्नः संयोगो देशावच्छिन्नोऽपि भवत्येवेति नियमानङ्गीकारेऽपि परमाण्वोः दिग्विशेषावच्छिन्नः सांयोगः स्वीकर्तुमेव न शक्यते । तथाहि अन्तरालवर्तिनि परमाणौ प्राचीस्थितपरमाणोः संयोगः प्राच्यवच्छेदेन भवति तदभावश्च प्रतीच्यवच्छेदेन भवति । प्रतीचीस्थपरमाणोश्च संयोगः प्रतीच्यवच्छेदेन भवति तदभावश्च प्राच्यवच्छेदेन भवति परमाणोः मूर्तत्वात् इति स्वीकारो न सम्भवति, निरवयवस्य परमाणोः कश्चित् प्राचीस्थः कश्चिच्च प्रतीचीस्थः इत्यस्यैव दुर्वचत्वात् । यतो हि सावयवस्य कश्चिदवयवः प्राचीस्थः कश्चिच्च प्रतीचीस्थो भवति । प्राचीस्थावयवे च यः संयोगः स तत्र प्राच्यवच्छिन्नो व्यवह्रियते, प्रतीचीस्थावयवे च यः संयोगः स प्रतीच्यवच्छिन्नत्वेन व्यवह्रियते । तथा च सावयवत्वमन्तरा परमाण्वोः प्राचीप्रतीच्यवच्छिन्नौ संयोगौ कथं सम्भवतः?

तस्मात् परमाण्वोः व्याप्यवृत्तिसंयोगस्वीकर्तव्य इति न काप्यनुपपत्तिः। न चैवं सति संयोगत्वावच्छेदेन अव्याप्यवृत्तित्वनियमस्य परमाणुसंयोगे कालिकाव्याप्यवृत्तित्वमादाय निर्वोढुं शक्यत्वेऽपि संयोगत्वावच्छेदेन दैशिकाव्याप्यवृत्तित्वनियमः निर्वोढुं न शक्यते इति वाच्यम् । यतो हि यो यः संयोगः स सर्वोऽपि स्वाश्रयसमवायिदेशावच्छिन्नो भवतीति व्याप्तिं स्वीकृत्य संयोगत्वावच्छेदेन स्वाश्रयसमवायिदेशावच्छिन्नत्वं साधयितुं न शक्यते सावयववृत्तिसंयोगत्वस्योपाधित्वात् । किञ्च संयोगत्वावच्छेदेन स्वाश्रयसमवायिदेशावच्छिन्नत्वमिति नियमः यदि स्वीक्रियते तर्हि परमणुकल्पनाया एव वैयर्थ्यप्रसङ्गः । असंयुक्तपरमाण्वोः द्रव्यारम्भकत्वाभावेन निष्प्रयोजनत्वात् अतः परमाण्वोः व्याप्यवृत्तिसंयोग एव स्वीक्रियते।

ननु दैशिकाव्याप्यवृत्तिसंयोगादेव परिमाणोपचयः लोके दृष्टः, अतः व्याप्यवृत्तिसंयोगात् परिमाणोपचयः कथं भवति ? इति चेत् – संयोगस्य स्थूलारम्भकतायाम् अव्याप्यवृत्तित्वस्य अतन्त्रत्वात् क्वचित् व्याप्यवृत्तिसंयोगस्य स्थूलारम्भकत्वस्वीकारे बाधकाभावात् । व्याप्यवृत्तेः परमाणुसंयोगादस्थूलस्यैव द्व्यणुकस्योत्पत्तिस्वीकारात् । स्थूलस्य त्रसरेणोरारम्भका द्व्यणुकसंयोगाश्च अव्याप्यवृत्तय एव, द्व्यणुकानां सावयवत्वात् ।

अस्तु परमाण्वोः व्याप्यवृत्ति संयोगः, परन्तु वृक्षे विभुसंयोगस्य अव्याप्यवृत्तित्वं कथं स्वीक्रियते ? यतो हि आकाशस्य अवयवो वा दिग्विशेषो वा न वर्तते । वृक्षोत्पत्तिक्षणे आकाशवृक्षसंयोगः, तदभावः वृक्षोत्पत्तिपूर्वक्षणे वा वृक्षध्वंसानन्तरं वा वर्तते इति कालविशेषावच्छेदेन विभुसंयोगः तदभावश्च वर्तत इति



ISSN : 2320-740X

[redacted]

उच्यते यदि तदपि न संभवति । यतो हि ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमिति प्राचीनानां मतम् । विभुसंयोगस्य ध्वंस प्रागभाववति वक्षे तदसन्ताभावः स्थातुं नार्हति। नव्यानां मते केवलं कालविशेषावच्छेदेन विभुसंयोगाः तदभावश्च भवतीति स्वीक्रियन्ते । प्रतियोग्यनवच्छेदकस्य अभावावच्छेदकत्वमिति नियमानुगुणं ये ये मूलाग्राद्यवच्छिन्न संयोगाः तत्तदभावाः अग्रमूलाद्यवच्छिन्नाः भवन्तीति चेन्न । मूलाग्राद्यवच्छिन्नाकाशसंयोगव्यक्तीनां भेदे प्रमाणाभावात् ।

ननु मूलाग्राद्यवच्छिन्नाकाशसंयोगव्यक्तीनामभेदे व्यभिचारः यतो हि समवायेन मूलाग्राद्यवच्छिन्नसंयोगान्प्रति तादात्म्येन क्रमशः मूलाग्रादिः कारणमिति कार्यकारणभावः । यदि नानावयवावच्छिन्नसंयोगव्यक्तीनामभेदः स्वीक्रियते तर्हि यत्र मूलावच्छिन्नाकाशसंयोगः तत्र तादात्म्येनाग्रं नास्ति । एवं यत्र अग्रावच्छिन्नाकाशसंयोगः तत्र तादात्म्येन मूलं नास्तीति व्यभिचारः । एवं मूलादिमात्रावच्छिन्नपिपीलिकादिसंयोगानाम् अग्रावच्छेदेनोत्पत्तिः स्यात्, तथैव एतद्वृक्षवृत्तिविभुसंयोगानां वृक्षान्तरावयवावच्छेदेनोत्पत्तिः स्यात् । अतः एतद्दोषवारणाय अवच्छेदकभेदेन संयोगभेदः अङ्गीकरणीयम् इति चेत् -

उच्यते- वृक्षादौ विभुसंयोगस्य व्याप्यवृत्तितया व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन मूलाद्यवच्छिन्नत्वविरहेण विभुसंयोगं प्रति मूलादीनां हेतुत्वं नास्ति । यदि व्याप्यवृत्तिसंयोगस्यावच्छेदकमुपगम्यते तर्हि मूलाग्रादिनिष्ठावच्छेदकतासंबन्धरूपजन्यतावच्छेदकसंबन्धेन विभुसंयोगं प्रति तादात्म्येन क्रमेण मूलाग्रादिः कारणम् इति कार्यकारणभावस्वीकारे पूर्वोक्तरीत्या व्यभिचारो न संभवति, कार्यतावच्छेदकसंबन्धभेदात् ।

द्रव्ये विभुसंयोगस्य व्याप्यवृत्तित्वं स्वीकर्तुं न शक्यते । यतो हि गगने विद्यमानमूर्तद्रव्यसंयोगव्यक्तीनां गगनस्य निरवयवत्वेन अवयवविशेषरूपावच्छेदकभेदाभावेऽपि प्राच्यादिदिग्विशेषरूपावच्छेदकभेदसत्वात्, तत्तद्दिगवच्छिन्नसंयोगस्य दिगन्तरावच्छेदेन अभावस्य सुलभत्वात् गगने यावत्संयोगविशेषाभावरूपहेतोः निर्विवादतया ततः गगने संयोगसामान्याभावसाधनसम्भवात् । तथा च परमाणुसंयोगः व्याप्यवृत्ति, द्वणुकदारभ्य सर्वेषां द्रव्याणां विभुद्रव्याणां च संयोगस्य अव्याप्यवृत्तित्वं न्यायमते स्वीक्रियते ।

*****



ISSN : 2320-740X

[redacted]

## हैन्दवीयजयघोषः

(अनूदितं गानम्)

✍उमामहेश्वरः एन्
शोधच्छात्रः

हैन्दवीयजयघोषवादनैः प्रेरयाम नवभारतम्
ग्रामनगरगिरिकाननादिषु सात्त्विककिरणं वितराम।
पुनरपि दिक्षु प्रसरतु नियतं मोक्षचिन्तनं सर्वत्र
पलायनं नो नानुमन्यते पार्थसारथेर्दिव्यभुवि ॥

भाषा भिन्ना वेषो भिन्नस्तथापि जीवनमेकरसम्
सहस्रवत्सरसमरविजेत्री पावनहिन्दूजीवकला।
सङ्घर्षे समराङ्गणभूमौ दरीदृश्यते चैतन्यम्
ग्रामे ग्रामे प्रतिनवचित्तं सन्देशोऽयं हिन्दूनाम् ॥

उच्चनीचजनजातिमतानां भेदभावना दूरमगात्
स्नेहगुणानां पवित्रगङ्गा सिञ्चति जनहृदि भावभुवम्।
दशप्रहरिणी दुर्गा सेयं भारतमाता वीरसुता
क्षात्रतेजसा निहत्य दुष्टान् निर्भयलोकं सृष्टवती ॥

मुक्तिपथेष्विह मार्गदर्शनं कुरुते खलु सुरभारती
विश्वस्तवकल्याणचोदनं तनुते भारतभूरेषा।
तत्समलक्ष्ये समर्पयतु ननु जनगतजीवितकाललवं
जागर्याख्ये पवित्रकार्ये सहकुरुतादिह सर्वगृहम् ॥

**ಹಿಂದುತ್ವದ ಜಯಘೋಷವ ಮೊಳಗಿಸಿ ನಾಡನು ಜಾಗೃತಗೊಳಿಸೋಣ ಎನ್ನುವ ದೇಶಭಕ್ತಿ ಗೀತೆಯ ಅನುವಾದ.**

*****



[redacted]

ISSN : 2320-740X

## शेषलक्षणाधिकरणम्

**विद्याशेखरः के एस्**

शोधच्छात्रः

अथ परमकारुणिको भगवान् जैमिनिः धर्मजिज्ञासार्थं द्वादशलक्षणीं रचयामास । तत्र तृतीयाध्यायस्य प्रतिज्ञाधिकरणे शेषिभावस्य अशाब्दस्य तद्विचारभूतोऽयम् अध्यायो नारम्भणीयमिति चेत् अन्वयान्तर्गतशेषशेषित्वस्यापि क्रियाकारक तदन्वयवत् शाब्दत्वात् आरम्भणीयं शेषशेषिविचारभूतोध्यायः इति।

**शेष परार्थत्वात्॥ ३-१-२ ॥**

**षोडशाध्याय्यां- "शेषस्य स्वरूपलक्षणहेतू न स्तः, स्तो वा"** इति संशयः। अविनाभावादीनाम् अतिव्याप्त्यादिदोषदुष्टत्वात् न स्वरूपलक्षणहेतू स्त इति प्राप्ते ब्रूमः-परार्थत्वादुक्तत्वात् परार्थत्वात्मको लक्षणहेतू स्त इति।

**शेषलक्षणमात्रोक्तावर्थात्स्याच्छेषिलक्षणम्।**
**अतः शेषः परार्थत्वादित्युक्तं शेषलक्षणम्॥**

शेषशब्दस्य अनेकादि अधिकाद्यर्थवचनत्वात् इह अङ्गगुणधर्मादि परायवाचित्वपरिग्रहार्थं तुविशेषाभिधानं परार्थत्वादिति।

अत्रेदमुच्यते - प्रथमं तावत् कः शेष इति शेषस्वरूपं केन हेतुना शेष इति शेषशब्दप्रवृत्तिनिमित्तं च उच्यते अविनाभावादीनाम् इति । अविनाभावप्रयोज्यत्वाधिक – विधानविध्यन्तविहितत्वोपादककारकत्वानामिति अर्थः । अतिव्याप्त्यादि इति । तथाहि बीजादिना विना अङ्कुरादिः न सम्भवति इति बीजादि अङ्कुरादेः शेष इति । एवं प्रयाजादिना विना अग्नेयादि न सम्भवततीति प्रयाजादिः अग्नेयादेः शेष इत्यविनाभावः शेषत्वमिति । घटश्च मृत्पिण्डदण्डचक्रादिभिः इति तेषां शेषत्वेन ज्ञायन्ते।

केचित्मन्यन्ते तदुक्तम् रूपरसादिष्वतिव्याप्तेः । अन्ये तु प्रयाजादीनाम् आग्नेयादि प्रयोज्यत्वात् प्रयोज्यत्वं शेषत्वम् । यथा सेनादीनां राजप्रयोज्यत्वात् राजशेषत्वम् इत्याहुः । तदपि अयुक्तं पुरोडाशकपालादिषु प्रयोज्येष्वतिव्याप्तेरिति।

अन्ये पुनराहुः आग्नेयादिभ्यो अधिकं प्रयाजादिकं विधीयत इति प्रयाजादीनां शेषत्वमिति तदतिमन्दम्। प्रधानेष्वेवातिव्याप्तेः प्रधानन्तु अङ्गादधिकं विधीयत इति।

अन्ये तु प्रधानं विधाय पुनः यद्विधीयते स शेषः यथा प्रयाजादिरिति विध्यन्तविहितत्वं शेषत्वमित्याहुः। तदप्ययुक्तं विध्यादिविहितेषु शाखाच्छेदनादिष्वतिव्याप्तेरिति।



ISSN : 2320-740X

[redacted]

अपरे पुनः उपकारकत्वं शेषत्वमियाहुः । प्रयाजादीनां पुरोडाशकपालादीनां शाखाच्छेदनादीनां उपकारकत्वसत्वात् अव्याप्तेः रूपरसादीनां प्रधानस्य उपकारकत्वाभावात् अतिव्याप्तेश्च अभावादिति । तदप्ययुक्तम् प्रधानेषु अतिव्याप्तेः । प्रधानमित्यङ्गानाम् अनुष्ठानोपकारं कुर्वन्ति इति । तेषाम् अङ्गोपकारकत्वात् इति । तदन्यच्च लक्षणं न पश्याम इत्यभिप्रायः । परार्थत्वस्य इति परोद्देशेन प्रवृत्तिविषयत्वं परार्थत्वमतश्च न अव्याप्त्यतिव्याप्ती इति भावः । लक्षणहेतू इति लक्षणं प्रवृत्तिनिमित्तं चेत्यर्थः । एवं लक्षणं प्रवृत्तिनिमित्तं च उक्त्वा इदानीं कः शेष इति लक्षणांश एव प्रपञ्च्यते उपकारकत्वस्य इति न परार्थत्वं शेषत्वं प्रमाणाभावात् । तथाहि विधिस्तावत् प्रवर्तनात्मकत्वात् प्रवृत्तिमात्रं गमयति न परार्थत्वं श्रुत्यादयोऽपि साध्यसाधनभावमात्रबोधक इति न परार्थत्वं प्रति प्रामाण्यं भजते । एभ्यः अन्यच्च प्रमाणं नात्र पश्यामः इति भावः । अतः परार्थत्वमेव शेषत्वमिति जैमिनिराह ।

*****

## शुल्बसूत्रबीजगणितयोः करणीस्वरुपम्

✍ **यज्ञदत्तः**

शोधच्छात्रः

उत्पादकं यत्प्रवदन्ति बुद्धेरधिष्ठितं सत्पुरूषेण सांख्याः ।
व्यक्तस्य कृत्स्नस्य तदेकबीजमव्यक्तमीशं गणितं च वन्दे॥
“ग्राह्यं न मूलं खलु यस्य राशेः तस्य प्रदिष्टं करणीति नाम ||”[1] इति

अर्थात् यस्य कस्यापि राशेः मूले गृहीते निरग्रं मूलं न लभ्यते तस्य करणीति (surd) संज्ञा कृता गणकचणकैः । अपरिमेयसंख्या (Irrational Number) इति आधुनिकैः कथ्यते । अवर्गात्मकस्य यस्य कस्यचिदङ्कस्य मूलं न लभ्यते , परं तन्मूलेन सह गणिते चेदावश्यकता स्यात्तदा तन्मूलद्योतकं “करणीति” संज्ञा कृता आचार्यैः । यथा षण्णां निरग्रं मूलं न लभ्यते । तदा तन्मूलद्योतकं क ६ इति प्राचीनैः व्यवहृता । नव्यपद्धत्यां तु $\sqrt{६}$ इति लिख्यते । करण्या उल्लेखस्तु सर्वादौ शुल्बसूत्रेषु रज्जुसमासान्तर्गते दीर्घचतुरस्र (आयत) वर्गक्षेत्रादिनियमप्रसङ्गे लभ्यते । तत्र दीर्घचतुरस्रात् समचतुरस्रं कर्तुं दीर्घचतुरस्रस्य दीर्घभुजः तिर्यङ्मानी लम्बभुजस्तु पार्श्वमानी इति संज्ञा कृता ।[१]

$$\sqrt{\text{तिर्यङ्मानी}^{२}\ (\text{अ}^{२}) + \text{पार्श्वमानी}^{२}\ (\text{व})^{२}} = \text{अक्ष्णयारज्जुः (क)}$$

एवं तत्र विकर्णमानं भुजागुणितद्विकरणीतुल्यं भवति । “समस्य द्विकरणी”[२] अर्थात् तुल्यप्रमाणभुजाभ्यः निर्मितवर्गस्य अक्ष्णयारज्जुः (विकर्ण) अभीष्टभुजाप्रमाणगुणितद्विकरणीतुल्यं भवति ।

---

[1] श्रीपतिः सिद्धान्तशेखरे १४



[redacted]

ISSN : 2320-740X

अनेनात्र समीकरणमिदं लभ्यते । यत्किमपिप्रमाणतुल्यभुजाभिः जायमानस्य वर्गस्य विकर्णः = भु.क २ अथवा भु$\sqrt{\text{२}}$ इति भवति। कर्णसामान्यसूत्रेण तथ्यमिदं सिद्धयति।

भु$^{\text{२}}$ अस्य विकर्णः = $\sqrt{\text{भु}^{\text{२}} + \text{भु}^{\text{२}}}$

$$\sqrt{\text{भु} \times \text{भु} \times \text{भु} \times \text{भु}}$$

$$\sqrt{\text{भु}(\text{भु} + \text{भु})}$$

$$\sqrt{\text{भु} \times \text{२भु}}$$

$$\sqrt{\text{भु} \times \text{भु} \times \text{२}}$$

भु$\sqrt{\text{२}}$ इति।

तत्र समचतुरस्रक्षेत्रफलस्य साधनावसरे एवमभिहितम् आचार्यैः :-

यदि “अ” संख्यातुल्यभुजाभ्यां जायमानस्य वर्गस्य विकर्णेन वर्गं कुर्मः तदा अस्य क्षेत्रफलं “अ” भुजाभ्यां जायमानवर्गक्षेत्रफलापेक्षया द्विगुणितं भवति । तदर्थं समीकरणम् :- $(\text{अ}\sqrt{\text{२}})^{\text{२}}$ = अ$^{\text{२}}$ अस्मात् द्विस्तावतीभूमिम् अथवा द्विगुणितं क्षेत्रफलं = अ$^{\text{२}} \times$२ इति।

प्रमेयोऽयं ३०० ईस्वीपूर्वं ग्रीकगणितज्ञेन युक्लीडेन एवं प्रतिपादितम् :- “कस्यापि वर्गकर्णस्य उपरि यः वर्गः निर्मीयते सः तस्मात् वर्गात् द्विगुणितो भवति।”[1]

एवम् अग्रे उक्तं यत् “अ” गुणितत्रिकरणी चतुष्करण्यादिभुजाभ्यः अ$^{\text{२}}$ अस्य क्रमशः त्रिगुणितं,चतुर्गुणितं क्षेत्रफलं प्राप्यते । अतः $(\text{अ}\sqrt{\text{३}})^{3}$ = अ$^{\text{२}} \times$३, $(\text{अ}\sqrt{\text{४}})^{\text{४}}$ = अ$^{\text{२}} \times$४ । अतः व्यापकसूत्रम् एवं भवति। $(a\sqrt{n})^2 = a^2 \times n$ ।

शुल्बसूत्रेषु दीर्घचतुरस्र “प्रउग” अथवा “उभयतः प्रउग” निर्मातुं यः प्रकारः प्रदत्तः, सः समकोणत्रिभुजसाधनार्थं वर्तते। यथा :- **“चतरस्रमुभयतः प्रउगं चिकीर्षन् यावच्चिकीर्षेत् द्विस्तावतीभूमिं दीर्घचतुरस्रां कृत्वा पूर्वस्याः करण्याः मध्ये शङ्कुं निहन्यात् ।’** अर्थात् दीर्घचतुरस्रवर्गस्य वा उभयतः त्रिभुजम् अपेक्षितं चेत् यज्ञवेदिकायाः द्विगुणितक्षेत्रफलं क्षेत्रफलं दीर्घचतुरस्रम् इव रुपं दत्त्वा तस्य पूर्वरेखायाः मध्ये एकं शङ्कुं निहन्यात् । तत्परं सौम्ययाम्यदिशयोर्मध्ये शङ्कुपर्यन्तं रज्जुं रेखां वा कुर्यात् । तस्मात् तत्र त्रिभुजद्वयं जायते । शुल्वसूत्रेषु विकर्णनस्यास्य प्रमाणं ज्ञातुं भिन्न-भिन्नस्थितिषु पृथक्-पृथङ्नियमाः प्रोक्ताः

---

[1] स्वत्रयोदशविभागात्मके “एलिमेन्ट्स्” इति पुस्तके १.४७।



ISSN : 2320-740X

[redacted]

। अनेन प्रकारेण विकर्णस्य प्रमाणम् अधिगन्तुम् असकृत् द्विकरण्याः आवश्यकता सुतरां भवत्येव । परं $\sqrt{२}$ द्विकरण्याः मानं ज्ञातुं न सुलभम् । यतोहि अस्य अपरिमेय (Irrational Number) संख्या लभ्यते । परञ्च शुल्बसूत्रज्ञैः विद्वद्भिः स्वप्रखरवुद्ध्या अद्भुतरीत्या च अस्य शुद्धमानं पञ्चदाशमिकस्थानपर्यन्तं दत्तं तदर्थं तेषां सूत्रम् :- **"प्रमाणं तृतीयेन वर्धयेत् तच्च चतुर्थेनात्मचतुस्त्रिंशोनेन ।"**[1] अर्थात् $\sqrt{२}$ इत्यस्य मानं प्राप्तुम् एकेन तस्य तृतीयांशं योजयेत् । तेन सह तस्य चतुर्थांशं योजयेत् तथा च तस्मात् तस्य ३४ भागम् ऋणं कुर्यात् । तस्मात् मानमिदं लभ्यते :-

$$\sqrt{२} = १+\frac{१}{३} + \frac{१}{३\times४} - \frac{१}{३\times४\times३४}$$

$\frac{१७}{१२} - \frac{१}{४०८} = \frac{५७७}{४०८}$ = १.४१४२१ इति । आधुनिकगणितेऽपि पूर्वोक्तस्थानपर्यन्तं मानमिदं शुद्धम् अङ्गीक्रियते । अत्यन्तगर्वावहो विषयोऽयं यत् प्रायः २५०० वर्षपूर्वं $\sqrt{२}$ मानं १.४१४२१ स्थानपर्यन्तं नितान्तशुद्धमिति ।

शुल्बसूत्रेषु विकर्णस्य "सविशेष" इति संज्ञा कृता । **"सविशेषः"** (बौ.२.६२) इयं सज्ञा एतदर्थं कृता यतोहि विकर्णे भुजस्य प्रमाणातिरिक्तो विशेषः अपि विद्यते । इत्थं समीकरणपद्धत्या विकर्णविशेषैः निरूपयामः :-

१ × १ वर्गस्य विकर्णः = भुजामानं + विशेषः ।

अतः अस्य

विशेषः = विकर्णः – भुजामानम् ।

उदाहरणार्थं :- विकर्णः $\sqrt{२}$ = १+ ०.४१४२१

विशेषः = $\sqrt{२}$ – १ = ०.४१४२१ इति ।

समकोणत्रिभुजस्य कर्णमानं ज्ञातुं सामान्यसूत्रमिदं शुल्बसूत्रेषु लभ्यते । **"दीर्घचतुरस्रस्याक्षणया रज्जुः पार्श्वमानी तिर्यङ्मानी च यत्पृथग्भूते कुरुतस्तदुभयं करोति ।"**(बौ.शु.सू.१.४८)

अर्थात् दीर्घचतुरसस्रस्य पार्श्वमानीतिर्यङ्गानी भुजाभ्यां पृथक्-पृथक् वर्गौ भवतः । तयोः उपरि कृतः विकर्णवर्गस्य क्षेत्रफलं पार्श्वमानीतिर्यङ्गानीभुजाभ्यां निर्मितस्य वर्गक्षेफलस्य योगतुल्यं भवति ।

<u>तत्रादौ करणीसंकलनव्यवकलने (SURD ADDITION, SUBTRACTION)</u>

<u>करणीसंकलने प्रथमः प्रकारः</u> :-

[1] बौधायनशूल्बसूत्रम्.२.६१।



ISSN : 2320-740X

**योगं करण्योर्महतीं प्रकल्प्य वधस्य मूलं द्विगुणं लघुं च ।**[1]

**योगान्तरे रूपवदेतयोः स्तः ॥** इति

ययोः करण्योः योगान्तरे अपेक्षिते तयोः रूपवदेव (कार्यः क्रमादुक्रमतो..) इत्यनेन योगान्तरे कृत्वा योगफलस्यास्य “महतीकरणी” इति संज्ञां कल्पयेद्गणक इत्यर्थः । तयोः करण्योर्घातस्य मूलं द्विगुणं कृत्वा तस्य गुणनफलस्य “लघुकरणी” इति संज्ञां कल्पयेत् । सम्प्रति तयोः कल्पितलघुमहत्ययोः करण्योः रूपवत्कृते योगान्तरे प्रथमकरण्योः योगान्तरे भवतः । यदि क $\sqrt{\text{अ}}$ , क $\sqrt{\text{ब}}$ करण्योः योगान्तरे कर्तव्ये तदा इदमत्र सूत्रमुपपद्यते :-

$\sqrt{\text{अ}} + \sqrt{\text{ब}} =$ अस्य महतीसंज्ञा ।

$२\sqrt{\sqrt{\text{अ}} \times \sqrt{\text{ब}}} =$ अस्य लघुसंज्ञा ।

अनयोः योगान्तरन्तु “**योगान्तरे रूपवदेतयोः स्तः** ..” इत्यनेन रूपवदेव कार्यः । अतः :-

$\sqrt{\text{अ}} + \sqrt{\text{ब}} \pm २\sqrt{\sqrt{\text{अ}} \times \sqrt{\text{ब}}} =$ प्रथमकरण्योः योगान्तरे ।

द्वितीयः प्रकारः :--

**लघ्व्या हृतायास्तु पदं महत्याः सैकं निरेकं स्वहतं लघुघ्नम् ।**

**योगान्तरे स्तः क्रमशस्तयोः ॥**

अत्रापि पूर्ववदेव करण्याः लघुमहतीसंज्ञे । लघ्व्या करण्या महती भाज्या लब्धेः पदं स्वीकृत्य तदेकत्र सैकमपरत्र निरेकमुभयमपि वर्गितम् लघुकरणीगुणितञ्च क्रमेण करण्योः योगान्तरे भवतः । यथा :-

$\frac{\sqrt{\text{अ}} + \sqrt{\text{ब}}}{२\sqrt{\sqrt{\text{अ}} \times \sqrt{\text{ब}}}} = (\sqrt{\text{लब्धिः}} + १)^{२} \times २\sqrt{\sqrt{\text{अ}} \times \sqrt{\text{ब}}} =$ करण्योः योगः ।

$\frac{\sqrt{\text{अ}} + \sqrt{\text{ब}}}{२\sqrt{\sqrt{\text{अ}} \times \sqrt{\text{ब}}}} = (\sqrt{\text{लब्धिः}} - १)^{२} \times २\sqrt{\sqrt{\text{अ}} \times \sqrt{\text{ब}}} =$ करण्योः अन्तरम्

अत्र लघ्व्या महत्या भागे भिन्नता स्याच्चेत्तदा मूलालाभे यथा- सम्भवमपवर्तो दातव्यः। अत्र करण्योर्मध्ये याङ्कतो लघुः सा लघुकरणी । याङ्कतो महती सा महतीति ज्ञेयम् ॥

अत्र लघ्व्या भाजिताया महत्या मूलं न लभ्यते तदा योगान्तरे कथं कर्तव्ये इत्यत्राह :- “**पृथक्स्थितिः स्याद्यदि नास्ति मूलम्**” इति यदि मूलं न लभ्यते तर्हि पृथक् एव स्थाप्यं तदेव योगान्तरे भवतः । अत्र

[1] भास्करीयबीजगणितम् करणीषड्विधम् १



ISSN : 2320-740X

[redacted]

अपवर्तनेनापि करण्योः योगान्तरे भवतः । आदौ करण्यौ केनचित्समानाङ्केनापवर्तनीये ततस्तन्मूलयोरन्तरयोगौ कृत्वा वर्गौ विधेयौ पुनरिष्टापवर्त्ताङ्केन हृतौ गुणितौ च कार्यौ ततः क्रमशः करण्योः विश्लेषयुती भवेताम्।

अत्रोपपत्तिः :- करणीयोगो नाम अवर्गात्मकयोरङ्कयोर्मूलयोगः यस्य मूलं सः करणीयोगः । एवमेवावर्गात्मकयोरङ्कयोर्मूलान्तरं यस्य मूलं, तत्करण्यन्तरं स्यात्।

अतः :-

$$\sqrt{\text{अ}} \pm \sqrt{\text{ब}} = \sqrt{(\sqrt{\text{अ}} \pm \sqrt{\text{ब}})^{२}}$$ पक्षौ समानौ।

परं $$\sqrt{(\sqrt{\text{अ}} \pm \sqrt{\text{ब}})^{२}} = \sqrt{\text{अ} + \text{ब} \pm २\sqrt{\text{अ}} \times \sqrt{\text{ब}}}$$

$$\sqrt{\text{अ} + \text{ब} \pm \sqrt{४\text{अ} \times \text{ब}}}$$

अत्र $\text{अ} + \text{ब} =$ महतीसंज्ञा, $२\sqrt{\text{अ} \times \text{ब}} =$ लघुः

अत्र यदि $\sqrt{\text{अ}} > \sqrt{\text{ब}}$ तो महान्

$\therefore \sqrt{\text{अ}} - \sqrt{\text{ब}} > ०$ शून्यतो महान्

उभयोर्वर्गे कृते $\text{अ} - २\sqrt{\text{अ}} \times \sqrt{\text{ब}} + \text{ब} > ०$

अत्र प्रत्यक्षतः $\text{अ} + \text{ब} > २\sqrt{\text{अ} \times \text{ब}}$

अतः $\text{अ} + \text{ब}$ अस्य महती संज्ञा

$२\sqrt{\text{अ} \times \text{ब}}$ अस्य लघुसंज्ञा च युक्तियुक्तैव कल्पिता।

अत एव "**योगं करण्योर्महतीं प्रकल्प्य वधस्य मूलं द्विगुणं लघुघ्नं योगान्तरे रूपवदेतयोः स्त**" इति प्रथमः प्रकार उपपन्नः।

द्वितीये तु कल्प्यताम् $(\sqrt{\text{अ}} \pm \sqrt{\text{ब}})$ करणीयोगान्तरमस्ति।

$\therefore \frac{(\sqrt{\text{अ}} \pm \sqrt{\text{ब}})\sqrt{\text{ब}}}{\sqrt{\text{ब}}} =$ करणी योगान्तरं नात्र कश्चिच्चद्दोषः।

$\sqrt{\text{ब}}$ अनेन गुणिते हृते च।



ISSN : 2320-740X

[redacted]

∴ $\sqrt{\text{ब}}\left(\frac{\sqrt{\text{अ}}}{\sqrt{\text{ब}}} \pm \text{१}\right)$ एतदपि करणीयोगान्तरसममेव।

∴ अत्र यदि $\sqrt{\text{अ}}$ महती करणी $\sqrt{\text{ब}}$ लघुकरणी तदा

$\sqrt{\text{ब}}\left(\frac{\sqrt{\text{अ}}}{\sqrt{\text{ब}}} \pm \text{१}\right) =$

$\sqrt{\text{ब}\left(\frac{\sqrt{\text{अ}}}{\sqrt{\text{ब}}} \pm \text{१}\right)^{\text{२}}} =$ अतः **“लघ्व्या हृतायास्तु पदं महत्याः सैकं निरेकं स्वहतं लघुघ्नम्”** इति द्वितीयः प्रकारोऽपि साधूपपन्नः।

पदमित्यनेन वर्गकरणी इव घनकरणी, चतुर्घातकरणी, पञ्चघातकरणीत्यादिष्वपि वोध्यम्।

*****

## प्रत्यक्षप्रमाणम्

✍युवराज घिमिरे
शोधच्छात्रः

विदितमेव सर्वेषां यदस्मिन् भारतवर्षे आस्तिकनास्तिकभेदभिन्नानि बहूनि दर्शनानि विद्यन्ते। तत्र वेदप्रामाण्याभ्युपगन्तृप्रवर्तितानि आस्तिकत्वेन परिगणितानि। तेषु महर्षिगौतमप्रणीतं न्यायदर्शनमन्यतमम्। एतच्च दर्शनं परमकारुणिकेन महामुनिना गौतमेन तापत्रयपराहतानां संसारिणां सन्तापोपशमनाय प्रवर्तितम्। न्यायदर्शनमिदमात्मादितत्त्वप्रतिपादकत्वेन यथा अध्यात्मविद्या तथा संशयप्रयोजनादीनां तत्त्वव्युत्पादनेन लौकिकविद्याऽपि। ‘प्रमाणैरर्थपरीक्षणं न्यायः’ इति भाष्यकारवचनानुसारेण शास्त्रेऽस्मिन् प्रमाणानां प्रामुख्यं वर्तते। तथा च शास्त्रेऽस्मिन् चत्वारि प्रमाणानि स्वीकृतानि। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति। तत्र साक्षात्कारिप्रमाकरणं प्रमाणं प्रत्यक्षमित्यभिधीयते। तद्व्युत्पत्तिस्तु अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। अक्षशब्दः अत्र ज्ञानेन्द्रियपरः। अतः तत्तज्ज्ञानेन्द्रियं प्रति नियतं तत्तत्प्रत्यक्षं भवति। तच्च चाक्षुषादिभेदेन अनेकविधम्। साक्षात्कारश्च इन्द्रियार्थसंयोगः। तत एव प्रमा उत्पद्यते। ततश्च पदार्थाः प्रमीयन्ते। प्रत्यक्षं च द्विविधं निर्विकल्पकसविकल्पकभेदेन। तस्याः साक्षात्कारिण्याः प्रमायाः करणं त्रिविधं भवति। कदाचिदिन्द्रियं, कदाचिदिन्द्रियार्थसम्बन्धः, कदाचिच्च ज्ञानम्। ज्ञानोत्पत्तौ अयमस्ति क्रमः।

प्रत्यक्षेच्छया प्रथममात्मा मनसा संयुज्यते, मनस्तदिन्द्रियेण, इन्द्रियं च पदार्थेन, ततश्च प्रथमं निर्विकल्पकं ज्ञानम्। तच्च इदं किञ्चिदित्याकारकं नामजात्यादियोजनारहितं भवति। तस्य निर्विकल्पकस्य



ISSN : 2320-740X

ज्ञानस्य इन्द्रियमेव करणम् । छिदायाः परशुरिव । यदा च विशिष्य ज्ञातुमुपक्रमते तदा इन्द्रियस्यार्थेन विशेषसम्बन्धे सति विशेषणविशेष्यादिरूपं यज् ज्ञानमुत्पद्यते अयं घटः अयं पटः इत्याकारकं, तदा इन्द्रियार्थसन्निकर्षः करणं भवति । इन्द्रियेणार्थसम्बन्धे पूर्वमुक्तनिर्विकल्पकज्ञानम् इन्द्रियव्यापाररूपतामावहति । तच्च सविकल्पकज्ञानस्य अवान्तरव्यापाररूपम् । अर्थात् आभ्यन्तरव्यापाररूपम् । सविकल्पकज्ञानं तस्य फलं भवति । इन्द्रियमिन्द्रियार्थसन्निकर्षं च करणमुक्त्वा निर्विकल्पकज्ञानस्य करणत्वमुच्यते । तथा हि इन्द्रियार्थसन्निकर्षजन्यपदार्थबोधे तात्त्विकविचारः उत्पद्यते । अर्थात् इन्द्रियगोचरे पदार्थे किं वास्तविकं किमवास्तविकमिति । यद्वास्तविकं तदेव अत्र ग्राह्यम् । यच्चावास्तविकं तदुपेक्षणीयमित्यादिरूपेण पूर्वज्ञातपदार्थे हानोपादेयादिबुद्धयो जायन्ते । तदा निर्विकल्पकज्ञानमेव करणं भवति । तत्र सविकल्पकज्ञानमवान्तरव्यापारो भवति । सविकल्पकज्ञानस्य च फलं तदा हानोपादेयादिबुद्धय एव भवन्ति । अवान्तरव्यापारस्य लक्षणं चैवम् । तज्जन्यत्वे सति तज्जन्यजनकत्वमिति । यथा कुठारदारुसंयोगः आदौ कुठारजन्यो भवति । अर्थात् कुठारः प्रथमं दारुणि स्वं संयुनक्ति । ततश्च छिदा जायते । यच्च छिदा कुठारदारुसंयोगस्य फलम् । तस्मिन् फले प्राथमिकः कुठारदारुसंयोगाद्यवान्तरव्यापारो भवति । स च अवान्तरव्यापारः तज्जन्यः । तेन जन्या या छिदा तस्य जनको भवति ।

अस्मिन् विषये मतभेदोऽपि आचार्याणां दृश्यते । तर्कभाषायां एवं लक्षितम् - सविकल्पकादीनामपि इन्द्रियमेव करणम् । तथा च यावन्ति त्वान्तरालिकानि सन्निकर्षादीनि तानि सर्वाणि अवान्तरव्यापाराः भवन्ति । अर्थात् वस्तुसाक्षात्काराय प्रसृतमिन्द्रियं यावत्पूर्णवस्तुसाक्षात्कारं यद्यदनुभवति, यद्यद्करोति, यद्यज्ज्ञानमुपपादयति तत्तत्सर्वमेवावान्तरव्यापारपदेन व्यपदेष्टुं शक्यते । अत एतेन सिद्ध्यति यत् प्रत्यक्षविषये द्विविधमतं प्रचलितमासीदिति । आद्यं सारं प्रत्यक्षं त्रिविधकरणान्वितम्, द्वितीयं तु एकविधमेव । सङ्क्षेपेण त्रिविधकरणव्यापारादीनां स्वरूपमित्थम्-

| करणम् | अवान्तरव्यापारः | फलम् |
|---|---|---|
| इन्द्रियम् | इन्द्रियार्थसन्निकर्षः | निर्विकल्पकज्ञानम् |
| इन्द्रियार्थसन्निकर्षः | निर्विकल्पकज्ञानम् | सविकल्पकप्रमा |
| निर्विकल्पकज्ञानम् | सविकल्पकप्रमा | हानोपादानोपेक्षाबुद्धयः |

उपर्युक्तदिशा त्रिविधकरणस्वीकरणं विहाय केचन विद्वांसः त्रिविधां प्रत्यक्षप्रमां मन्वानाः अपि न तस्य त्रिविधकरणत्वं मन्वते । स्यान्मतभेदस्याधारः । कारणस्य स्वरूपविषयकमतभेद एव । प्रथममतानुसारेण यस्य व्यापारस्याविलम्बेन फलोत्पत्तिर्जायते तदेव करणम् । यथोक्तम्- 'फलायोगव्यवच्छिन्नं करणम्' तदनुसारं निर्विकल्पकप्रमायाः उत्पत्तौ तु इन्द्रियं करणतामर्हति । न



[redacted]

ISSN : 2320-740X

सविकल्पकप्रमोत्पत्तौ । हानोपादानोपेक्षाबुद्धेरुत्पत्तौ वा । तद्यथा सविकल्पकप्रमाफले स्वीकृते इन्द्रियेण इन्द्रियार्थसन्निकर्षः निर्विकल्पकज्ञानं च कार्यद्वयसम्पादनानन्तरमेव सविकल्पकज्ञानोत्पत्तिर्जायते । इन्द्रियसद्भावे तद्व्यापारसद्भावे वा नोत्पद्यते फलमचिरेणैव । अतः इन्द्रियं न सविकल्पकप्रमायाः करणतामर्हति । ततश्च इन्द्रियार्थसन्निकर्ष एव अस्य करणमिति अवधेयम् । एवमेव हानोपादानादिबुद्धिविषयेऽपि ज्ञेयम् । तदित्थमुपर्युक्तं त्रिविधं करणं प्रत्यक्षप्रमायाः ।

अपरस्मिन् मते प्रतिगतमक्षं प्रत्यक्षम् इति व्युत्पत्तिनयेन इन्द्रियमेव प्रधानतया प्रत्यक्षस्यार्थः । यथोक्तं भाष्ये- अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम् । वृत्तिस्तु सन्निकर्षः । (न्या. भा. १.१.३) अत इन्द्रियमेव त्रिविधायाः प्रत्यक्षप्रमायाः करणं मन्तव्यम् । अस्मिन् मते व्यापारवदसाधारणं कारणं करणलक्षणमभिहितम् । करणफलयोर्मध्यवर्ति यत्किञ्चित्तत्सर्वमेवावान्तरव्यापारत्वेन स्वीकृतं चास्ति । एतेन इन्द्रियसत्तायामविलम्बेन सविकल्पकप्रमाद्यनुत्पत्तिकारणात् इन्द्रियकरणत्व शङ्काऽपि परास्ता । अतस्त्रिविधायाः प्रत्यक्षप्रमायाः इन्द्रियमेव करणं सर्वमन्यदवान्तरव्यापाररूपमेव । तद्यथा-

| फलम्(प्रमा) | अवान्तरव्यापारः | करणम् |
|---|---|---|
| निर्विकल्पकप्रमा | इन्द्रियार्थसन्निकर्षः | इन्द्रियम् |
| सविकल्पकप्रमा | इन्द्रियार्थसन्निकर्षः | निर्विकल्पकज्ञानं इन्द्रियम् |
| हानोपादानोपेक्षाबुद्धिः | इन्द्रियार्थसन्निकर्षः | सविकल्पकज्ञानं इन्द्रियम् |

व्यापारलक्षणं तु- तज्जन्यत्वे सति तज्जन्यजनकत्व'मिति । यदा तु निर्विकल्पप्रमायां जननीयायां इन्द्रियार्थसन्निकर्षः व्यापारो भवति, तत्र तज्जन्यत्वे सति तज्जन्यजनकत्वस्य वर्तमानत्वात् । एवमेव सविकल्पकप्रमायां जननीयायां निर्विकल्पकज्ञानमवान्तरव्यापारो भवति । इन्द्रियार्थसन्निकर्षश्च करणम् । हानोपादानोपेक्षाबुद्धौ तु सविकल्पकज्ञानमवान्तरव्यापारो भवति । निर्विकल्पकज्ञानं करणम् ।

षड्विधः सन्निकर्षः -

प्रत्यक्षे इन्द्रियार्थयोः यः सन्निकर्षः उक्तः । स षड्विधः । संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेष्यविशेषणभावश्चेति ।

संयोगः -

तत्र प्रथमोद्दिष्टस्य संयोगस्य स्पष्टीकरणं तु- इन्द्रियेण द्रव्यग्रहे प्रथमं संयोगः सम्बन्धो भवति, इन्द्रियद्रव्ययोः अयुतसिद्धसम्बन्धाभावात् । अन्तरिन्द्रियेण मनसा द्रव्यग्रहे मन इन्द्रियम् आत्मा च द्रव्यं भवति । अनयोः सन्निकर्षोऽपि संयोग एव भवति ।

संयुक्तसमवायः -

संयुक्तसमवायस्तु चक्षुरिन्द्रियेण घटरूपप्रत्यक्षे जननीये प्रयोजको भवति । यतः चक्षुषा घटसंयोगे जाते, घटे च रूपस्य समवायात् । एवमात्मनि विद्यमानानां सुखादीनां ग्रहे प्रथमं मनः आत्मानं संयुनक्ति,



ISSN : 2320-740X

आत्मनि च सुखादीनि समवेतानि भवन्ति अतः तत्रापि संयुक्तसमवायः सन्निकर्षः भवति ।

संयुक्तसमवेतसमवायः सन्निकर्षः -

अयं सन्निकर्षस्तु द्रव्यसमवेतसमवेतानां गुणत्वादिजातीनां ग्रहजनको भवति ।

समवायसन्निकर्षः -

यत्र च इन्द्रियग्राह्यो विषयः प्रथमत एव स्वाश्रयसमवेतो भवति तत्र प्रथममेव समवायसम्बन्धो जायते । यथा शब्दः आकाशे समवेतो भवति । तस्य श्रोत्रेन्द्रियेण ग्रहे प्रथमत एव समवायसम्बन्धो भवति । तद्गतशब्दत्वग्रहे तु समवेतसमवायसन्निकर्षो भवति । अर्थात् गुणगुणिनोः क्रियाक्रियावतोः नित्यद्रविशेषयोश्च प्रथमत समवाय एव सम्बन्धो भवतीति ज्ञेयम् । समवेतसमवेतग्रहे तु समवेतसमवायसन्निकर्षो भवति ।

विशेषणविशेष्यभावः सन्निकर्षः -

चक्षुषा घटाभावादिग्रहणे विशेष्यविशेषणभावसन्निकर्षः । चक्षुसंयुक्तस्य भूतलस्य घटाभावो विशेषणं भवति । भूतलं च विशेष्यम् । अर्थात् घटाभाववद्भूतलमिति ज्ञानं जायते । अस्मिन् ज्ञाने घटाभावस्य विशेषणत्वं भूतलस्य च विशेष्यत्वं च स्पष्टमेवास्ति । एवमेव मनसा आत्मनि सुखाद्यभावे गृहीतव्येऽपि । सुखाद्यभाववानात्मा इत्याकारकज्ञाने सुखाद्यभावो विशेषणं आत्मा विशेष्यमिति तत्रापि विशेषणविशेष्यभावसन्निकर्षः । या व्यक्तिः येनेन्द्रियेण गृह्यतेति न्यायात् ।

एवं समवायोऽपि विशेष्यविशेषणभावसन्निकर्षेण गृह्यते । न्यायनये समवायस्यापि प्रत्यक्षत्वात् । वैशेषिकास्तु समवायमनुमिन्वन्तति । परं न्यायशास्त्रे समवायप्रत्यक्षता स्वीकृता । यथोदाहृतं तर्कभाषायाम् - "चक्षुः सम्बद्धस्य तन्तोः विशेषणभूतः पटसमवायो गृह्यते, इह तन्तुषु पटसमवाय" इति ।

तर्कभाषायां षट् सन्निकर्षानुपसंहरन् वक्ष्यमाणौ श्लोकौ उपन्यस्तौ -

अक्षजा प्रमितिर्द्वेधा सविकल्पाऽविकल्पिका ।
करणं त्रिविधं तस्याः सन्निकर्षश्च षड्विधः ॥
घटतन्नीलनीलत्वशब्दशब्दत्वजातयः ।
अभावसमवायौ च ग्राह्याः सम्बन्धषट्कतः ॥

अर्थात् इन्द्रियार्थसन्निकर्षजन्यप्रमितिः द्विप्रकारा । एका सविकल्पिका अपरा अविकल्पिका । तस्याः प्रमितेः करणं त्रिप्रकारकम् , सन्निकर्षश्च तस्याः षड्विधो भवति । सम्बन्धषट्कतः घटः तद्गतनीलादिरूपं तद्गता नीलत्वादिजातयः । एवं शब्दः शब्दत्वं च अभावः समवायश्चैते सर्वे पूर्वोक्त षड्विधसन्निकर्षैरेव ग्राह्याः ।

*****



ISSN : 2320-740X

## संस्कृतवर्णमालायां वर्णाः

✍अरुणभट्टः भरणि
आचार्यद्वितीयवर्षम्

भाषा नाम मनुष्यस्य अयाचितम् अनर्घ्यं धनम् । मातुरुत्सङ्गे एव शिशुः भाषाम् अभ्यसितुम् आरभते । सर्वोऽपिलौकिकोवैदिकश्च व्यवहारः विना भाषां दुष्करः इति स्फुटमेव । भाषा एव मुख्यत्वं भजते इह जगति । पशुमानवयोः व्यवछेदिका भाषा एव । व्यक्तवाचः उच्चारणे मानवो हि समर्थः । अस्याः शब्दोच्चारणेन भावाभिव्यक्तिः स्फुटं जायते ।

एवम् उच्चार्यमाणा भाषा वाक्यात्मिका भवति । यतो हि लोके वाक्येनैव अर्थबोधकत्वात्तेनैव अर्थसमाप्तेश्च । यद्यपि वाक्ये पदादीनां विभागो नास्त्येव तथापि व्यवहारस्तु पदसमूहो वाक्यं, पदन्तु वर्णसमूहः इत्येव। अत एव हरिणा उक्तं –

**न वर्णव्यतिरेकेण पदमन्यच्च विद्यते ।**
**वाक्यं वर्णपदाभ्यां च व्यतिरेकं न किञ्चन**[1] ॥ इति ।

अतः वाक्यस्य मूलघटकस्तु वर्ण एव । वर्णव्यत्यये भवन्ति बहवो दोषाः । अतः उक्तं भाष्ये –

**वर्णव्यत्यये चार्थान्तरगमनात् ॥**
**वर्णव्यत्यये चार्थान्तरगमनान्मन्यामहे अर्थवन्तो वर्णा इति । कूपः सूपो यूपः इति**[2]**॥**

इति ।

अतः वर्णविषये अवश्यं यत्नः विधेयः इति, संस्कृतवर्णमालायां विद्यमानाः वर्णाः कति ? ते च के ? इति विषये पाणिनीयशिक्षानुरोधेन अग्रे विचार्यते। **वर्णाः कति ?** संस्कृतभाषायां विद्यमानानां वर्णानां सङ्ख्याविषये
पाणिनीयशिक्षायां गणितं दृश्यते । तद्यथा-

**त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।**
**प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा**[3] ॥

संस्कृते त्रिषष्टिः चतुःषष्टिः वा वर्णाः विद्यन्ते । ते च स्वर-व्यञ्जन-अयोगवाह-यमाः इति चतुर्धा विभक्ताः । स्वरादीनामपि सङ्ख्यादिकं एकत्रीकृतम्-

---

[1] वाक्यपदीयम् १-७२
[2] महाभाष्यम् (हयवरट् सूत्रम्)
[3] पाणिनीयशिक्षा -३



ISSN : 2320-740X

[redacted]

**स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः[1] ।**

**यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥**

**अनुस्वारो विसर्गश्च ≍क≍पौ चापि पराश्रितौ ।**

**दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च[2]॥** इति।

**स्वराः – 21**

स्वयं राजन्ते इति स्वराः[3] इत्यतः अन्यस्यापेक्षाभावेन उच्चारयितुं शक्याः एव वर्णाः स्वराः । व्यञ्जनन्तु आत्मानं स्फुटतया प्रकाशयितुं स्वरम् अवलम्बत एव । एते स्वराः ह्रस्वदीर्घप्लुताश्चेति प्रत्येकं त्रिधा। एकमात्रकः ह्रस्वः, द्विमात्रकः दीर्घः, त्रिमात्रकः प्लुतः, इत्युच्यते। किन्तु दीर्घलृकारः नास्ति। एकार-ऐकार-ओकार-औकाराणां ह्रस्वाः न सन्ति। नाम वेदे, शिष्टैः प्रयुज्यमाने वा एते वर्णाः न श्रूयन्ते। एवं च अ इ उ ऋ एषां वर्णानां प्रत्येकं त्रयो भेदाः । ए ऐ ओ औ इत्येतेषां द्वौ द्वौ भेदौ। प्लुतलृकारस्य शिक्षायां पृथक् ग्रहणात् अत्र एक एव लृकारः | एवम् आहत्य २१ स्वराः भवन्ति।

**व्यञ्जनानि – 25+8=33**

अन्वग् भवति अनुगच्छति इति व्यञ्जनम्[4]। अज्धर्मम् उदात्तत्वादिकम् अनुगच्छतीति व्यञ्जनम्। व्यञ्जनेन सहोच्चार्यमाणस्य स्वरस्य धर्माः व्यञ्जने भासन्ते । अतः व्यञ्जनम् उदात्तादीन् अनुगच्छतीव भाति । वर्गीय-अवर्गीयव्यञ्जनम् इति व्यञ्जनं द्विधम् । क,च,ट,त,प इति पञ्चवर्गाः । प्रतिवर्गं पञ्च वर्णाः । एवं वर्गीयानि पञ्चविंशतिः । य-र-ल-व-श-ष-स-हाश्चेति कमपि वर्गं अप्रविष्टानि अष्टौ। आहत्य त्रयस्त्रिंशत्।

**अयोगवाहाः - 4**

माहेश्वरसूत्राणां वर्णसमाम्नायः इति व्यवहारः । तत्र वर्णसमाम्नाये अनुक्ताः परं पदावयवत्वेन लोके वेदे च ये श्रूयन्ते ते अयोगवाहाः । व्युत्पत्तिस्तु इत्थं- न योगः येषां ते = अयोगाः, वहन्ति इति वाहाः । अयोगाश्च ते वाहाश्च = अयोगवाहाः । अक्षरसमाम्नाये येषां योगः न विद्यते, प्रयोगं वहन्ति ते अयोगवाहाः । ते अनुस्वार-विसर्ग-जिह्वामूलीय-उपध्मानीयाः ।

**१.अनुस्वारः** – स्वरम् अनुप्रयुज्यते इति अनुस्वारः। स्वरात् पर एव अनुस्वराणां प्रयोगः। यथा – अं इं

**२.विसर्गः** - विविधतां सृजति इति विसर्गः। नाम विसर्गः हरिस्त्राता, बालो गच्छति ..एवम् अष्टधा आत्मानं दर्शयति। अतः अन्वर्थसंज्ञा। यथा अः इः....

**३.जिह्वामूलीयः** – कखाभ्यां प्राक् अर्धविसर्गसदृशः जिह्वामूलीयः। बालः करोति ,चैत्रः करोति।

---

[1] पाणिनीयशिक्षा ४

[2] पाणिनीयशिक्षा ५

[3] महाभाष्यम् २.३०

[4] महाभाष्यम् २.३०



ISSN : 2320-740X

**४.उपध्मानीयः** – पफाभ्यां प्राक् अर्धविसर्गसदृशः उपध्मानीयः । शिशुः पिबति ,वृक्षः फलति....

**यमाः – 4**

वर्गेषु आद्यानां चतुर्णां पञ्चमे परे पूर्वसदृशः वर्णः यमः इत्युच्यते । पलिक्क्नी इत्यत्र ककारनकारयोर्मध्ये स्थितः ककारः यमवर्णः । यद्यपि प्रत्येकं वर्गे चत्वारः यमाः इति कृत्वा विंशतिः भवन्ति तथापि पञ्चानामपि
वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थ-वर्णत्वेन चत्वार एव यमवर्णाः ।

**दुःस्पृष्टः -1**

दुःस्पृष्टः द्वयोः स्वरयोर्मध्ये वर्तमानः लकारः । उच्चारणं तु ‘ळ’ भवति । अस्य उच्चारणे जिह्वाताल्वोः कठोरसङ्घर्षः जायते । अतः ळकारः दुःस्पृष्टः । अ इ उ ण् इत्यादिषु माहेश्वरसूत्रेषु ळकारो न पठितः, तथापि श्रूयते ऋग्वेदे यजुर्वेदे च । अग्निमीळे पुरोहितम्[1]... । यद्देवा देवहेळनम्[2]... ।

इत्थं च वर्णाः त्रिषष्टिः । यथा २१ स्वराः, ३३ व्यञ्जनानि, ४ अयोगवाहाः, ४ यमाः, ११ दुःस्पृष्टः इति आहत्य ६३ वर्णाः भवन्ति ।

**64तमः वर्णः**

माहेश्वरसूत्रानुसारेण त्रिषष्टिवर्णेषु एव प्लुतलृकारः अन्तर्भवति इति माहेश्वरसूत्रानन्तर्भूतः ळकारः एव चतुषष्टिवर्णः इति पक्षान्तरम् । नाम प्लुतलृकारेण सह स्वराः द्वाविंशतिः इति । परंतु पाणिनीयशिक्षायां “स्वरा विंशतिरेकश्च” इत्यारभ्य सर्वेषां वर्णानां ळकारस्य च परिगणनं कृत्वा अन्ते “लृकारः प्लुत एव च” इति प्लुतलृकारः पृथगेव परिगणितः । स्वराणां परिगणनप्रसङ्गे प्लुतलृकारस्य अनुक्तत्वात् प्लुतलृकार एव चतुष्षष्टितमः वर्णः इति प्रतिभाति ।

**सारः –**

संस्कृतभाषावर्णमालायां तावत् त्रिषष्टिः चतुषष्टिर्वा वर्णाः सन्ति(६३/६४) । स्वराः एकविंशतिः (२१) । व्यञ्जनानि त्रयस्त्रिंशत् (३३) । अयोगवाहाः चत्वारः (४) । यमाः चत्वारः (४) । ळकारस्य लकारे, प्लुतलृकारस्य लृकारे वा अन्तर्भावे त्रिषष्टिवर्णाः एव । प्लुतलृकारेण सह ळकारस्यापि परिगणनायां चतुष्षष्टिवर्णाः ।

**यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे नहि ।**
**यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि ॥**

**परिशीलितग्रन्थाः-**

१ पाणिनीयशिक्षा

---

[1] ऋग्वेदसंहिता-१.१

[2] यजुरारण्यकम्-२.३



ISSN : 2320-740X

२ महाभाष्यम्

३ पदविवेकः

४ वाक्यपदीयम्

५ ऋग्वेदसंहिता

६ यजुरारण्यकम्

*****

## अयनांशविचारः

✍ **गणेशकृष्णः**
आचार्यद्वितीयवर्षम्

इदं तावत् विदितमेव विश्वेषां विदुषां यत् ज्योतिःशास्त्रे सिद्धान्तस्कन्धः कालपरिभाषाग्रहस्फुटीकरणग्रहणगणितादीन् विधीन् अभिदधातीति । तत्र मुख्यतमो भवत्ययनांशविचारः । यतो हि अयनांशेषु ज्ञातेष्वेव उत्तरदक्षिणभेदभिन्नयोः अयनयोः आरम्भकालस्य परिज्ञानम् । अथ च लग्न-क्रान्तिच्छायादीनां साधनविधयोऽपि अयनांशान् अन्ततेन कर्तुमशक्याः । तस्मात् तत्प्रकरणमुपनिबद्धं पूर्वैराचार्यैः ।

तत्रादौ को नामायनांश इति जिज्ञासायामुच्यते । सृष्ट्यादौ नाडीवृत्तक्रान्तिवृत्तयोः सम्पातबिन्दुः अश्विन्यादौ आसीत् । ततो राशिचक्रस्यारम्भः । किन्तु स सम्पातबिन्दुर्न स्थिरः । तत्र फलादेशाद्युपयोगिषु ग्रहस्फुटेषु अश्विन्यादितो राशिचक्रप्रवृत्तिरिति स्वीकृतम् । अतस्तत्र तस्मादारभ्य राशीनां गणना । किं लग्नसाधनादिषु नाडीक्रान्तिवलययोः सम्पातस्थानादारभ्य राशिगणनायामेव गोलयुक्तिर्युज्यते । तस्मात्तदारभ्यापि राशिगणना प्रवृत्ता । अथ च सम्पातबिन्दोः अयनेन अर्थात् चलनेन तयोरन्तरस्योत्पत्तेः अस्यान्तर अयनांश इति नाम । अयनशब्दस्य चलनार्थकत्वं प्रस्थितमेव । तथा च अश्विन्यादेः निरयणमेषादिरिति सम्पातबिन्दोः सायनमेषादिरिति च व्यवहारः ।

एतदयनांशगतौ मतभेदो वर्तते प्राचामर्वाचीनां च । प्राञ्चस्तावत् अस्यान्दोलनगतिम् ऊरीचक्रुः । सा च यथा – नाडीक्रान्तिवलययोः सम्पातः अश्विन्यादितः पूर्वाभिमुखं भागानां सप्तविंशतिं गत्वा, ततः परावृतस्सन् पुनस्तयैव गत्या अश्विन्यादिं सम्प्राप्य ततोऽपि पश्चिमाभिमुखं भागानां सप्तविंशतिं क्रान्त्वा, ततोऽपि परावृत्य पुनरश्विन्यादिं प्राप्नोति । एवमस्य अष्टोत्तरशतांशैः एकं परिलम्बनं भगणो वा सञ्जायते । इदं हि प्राचां मतम् । अर्वाञ्चस्तु अस्य विलोमगतिम् ऊरीचक्रुः । अनयोः कतरत् साधीय इति ज्ञातुं शतकद्वयं प्रतीक्षणीयमस्माभिः ।



ISSN : 2320-740X

अथास्य साधनविधिः । तत्र च बहवो मतभेदाः दरीदृश्यन्ते । आदावार्षं सूर्यसिद्धान्तमीक्षामहे । तदुक्तिर्यः –

त्रिंशत्कृत्यो युगेभानां चक्रं प्राक् परिलम्बते ।
तद्गुणाद् भूदिनैर्भक्तात् द्युगणाद्यदवाप्यते ॥
तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिदाः । इति

एकस्मिन् महायुगे अयनांशानां षट्शती भगणाः भवन्ति । तद्गुणितः अहर्गणः महायुगीयकुदिनैः भाजनीयः । तदा यद्राराश्यादिकं लभ्यते तस्य भुजः त्रिभिर्गुणितः दशभिः भक्तश्च चेत् अयनांशाः प्राप्यन्ते इति सूर्यसिद्धान्तीयविधिः ।

मुञ्जलोक्तोविधिरन्यः । सः तु ४४४ तमे शकवर्षे शून्यायनांशं स्वीकृत्य ततः प्रतिवर्षं षष्टिविकलामितं तद्गतिमङ्गीकृत्य च इष्टायनांशसाधनविधिं प्रोवाच । अमुमेव विधिमनुसरति गणेशदैवज्ञोऽपि । तथा च तदुक्तिः " वेदाब्ध्यब्ध्यूनः खरसहृतः शकोऽयनांशाः" इति । इष्टशकं ४४४ वर्षेन कृत्वा शेषं षष्ट्या भाजयामः चेत् अयनांशः सिद्ध्यतीति तदाशयः ।

अर्वाचीनेष्वपि लाहरि- रामन् प्रभृतयो भूयांसो विधयो दृष्यन्ते । ब्रह्मगुप्त-लल्ल-श्रीपतिसिद्धान्तेषु अयनांश साधनविधिः नोपदिष्टः । भास्करस्तु गणितविधिमनुक्त्वा वेधेन तज्ज्ञानविधिं प्रादर्शयत् । इत्थं सति महतिमतभेदे, किं ग्राह्यमस्माभिरित्यत्रापि ऐकमत्यं नास्ति ।

अथ च अयनांशेन उत्तर-दक्षिणाख्ययोरयनयोः प्रवृत्तिरपि प्रभाविता भवति । तत्स्थानं पूर्वं कदाचित् धनिष्ठादौ आश्लेषार्धे चासीदिति प्राह मिहिरो यथा -

आश्लेषार्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम् ।
नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु ॥

युक्तञ्चैतत् । यतो हि लगधाचार्यो "वसुत्वष्टा भवोऽजश्च" इत्यादिना धनिष्ठमारभ्य नक्षत्रदेवताः निर्दिशति । "नक्षत्राणि वसव" इत्यादिश्रुतिरपि पूर्वोक्तमर्थं पुष्णाति ।

ततः आचार्यो वराहमिहिरः साम्प्रतिकमयनारम्भस्थानं निर्दिश्यान्ते कथयति "प्रत्यक्षपरीक्षणैर्व्यक्तिः" इति ।

ततो " दूरस्थचिन्हवेधादित्यादिना" श्लोकेन प्रत्यक्षपरीक्षणविधिरपि प्रपञ्चितस्तेन ।

एवं च प्रत्यक्षपरीक्षणे बद्धादरो वर्तते भगवान् वराहमिहिरः । भास्करेण वेधाश्रितः तज्ज्ञानविधिः प्रतिपादित इति पूर्वमुक्त एव । सूर्यसिद्धान्तेऽपि गणितकथनादनन्तरं "स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्वये" इति परीक्षणविधिमाभिधत्ते । एवञ्चास्मिन् विषये प्रत्यक्षपरीक्षणे बद्धादरा दृष्यन्ते भूयांसो मनीषिणः । तस्मादधुनापि येन विधिना प्रत्यक्षसाम्यं सिद्ध्यति, तत्साधितोऽयनांशो ग्राह्यतां याति ।

*****



ISSN : 2320-740X

## अन्यथाख्यातिः

✍नागहर्षिणी. आर्
आचार्य द्वितीयवर्षम्

इह खलु संसारार्णवे प्लवमानानामशेषजनिमतां दुःखजातस्य मिथ्याज्ञानमेव मूलकारणम् । तदुन्मूलनपूर्वकं परमपुरुषार्थभूतनिःश्रेयसस्याधिगमाय तत्त्वदर्शिनो महर्षयः अधिकारिभेदेन नैकानि दर्शनानि तत्त्वनिरूपणपराणि व्यरचयन् । निरसनीयस्य मिथ्याज्ञानस्य याथात्म्यनिर्धारणाय समेऽपि दार्शनिकाः भूयसो विचारान् व्यदधुः । त एव विचाराः 'ख्यातिवाद' इति नाम्ना सम्प्रति विप्रतिपत्तिपौष्कल्येन भारतीयदर्शनेष्वसाधारणपदम् अलङ्कुर्वन्ति । सौगतेषु वैभाषिकसौत्रान्तिकयोगाचाराणां सम्मता आत्मख्यातिः, माध्यमिकानाम् असत्ख्यातिः, मीमांसकेषु प्राभाकराणाम् अख्यातिः, नैयायिकानाम् अन्यथाख्यातिः, वेदान्तिनाम् अनिर्वचनीयख्यातिः इति प्राधान्येन पञ्चधा प्रवहति ख्यातिविचारधारा । तदुक्तम् –

"आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
तथानिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकम्" ॥

"अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते" इति ज्ञानद्वैविध्यं सर्वानुभवसिद्धम् । तत्त्वचिन्तामणौ प्रत्यक्षखण्डान्तर्गतस्य

प्रामाण्यवादस्यान्ते नव्यन्यायप्रवर्तकैः श्रीमद्भिः गङ्गेशोपाध्यायैः प्रमालक्षणं सिद्धान्तितम् उच्यते । 'यत्र यदस्ति तत्र तस्यानुभवः प्रमा । तद्वति तत्प्रकारकानुभवो वा' इत्यादिग्रन्थेन । तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकत्वे सति अनुभवत्वमिति प्रमालक्षणं निर्गलितम् । तत्र सत्यन्तदलं भ्रमेऽतिव्याप्तिवारणाय निवेशितम् । पुरोवर्तिनि शुक्त्यादौ चक्षुषा सन्निकृष्टे सति उत्पद्यमानस्य 'इदं रजतम्' इति भ्रमस्यरजतत्वाभाववन्निष्ठविशेष्यतानिरूपितरजतत्वनिष्ठप्रकारताकत्वमस्ति, न तु रजतत्ववन्निष्ठविशेष्यतानिरूपितरजतत्वनिष्ठप्रकारताकत्वम् । अतः न तत्रातिव्याप्तिः प्रमालक्षणस्येति सत्यन्तदलसार्थक्यमुपपद्यते । अख्यातिवादिनः मीमांसकैकदेशिनः प्राभकरास्तावत् रजतत्वादिप्रकारकाणां सर्वेषां ज्ञानानां रजतत्वादिमन्निष्ठविशेष्यतानिरूपितरजतत्वादिनिष्ठप्रकारताकत्वमेव उररीकुर्वन्ति । तन्मते तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकस्य ज्ञानस्य अप्रसिद्ध्या तत्रातिव्याप्तेः अप्रसक्त्या सत्यन्तदलस्य वैयर्थ्यम् ।

भ्रमात्मकमेकं विशिष्टज्ञानं नास्ति, शुक्त्यादौ 'इदं रजतम्' इत्यादिभ्रमस्थले ज्ञानद्वयं भवति । 'इदम्' इति पुरोवर्तिशुक्त्यादिविषयकं प्रत्यक्षम् । 'रजतम्' इति रजतविषयकस्मरणम् । तत्राद्यस्य रजतत्वप्रकारकत्वं नास्ति । द्वितीयस्य रजतत्वप्रकारकत्वेऽपि रजतत्वाभाववन्निष्ठविशेष्यतानिरूपकत्वं



ISSN : 2320-740X

नास्ति। रजतत्वशून्यस्य शुक्त्यादेः तत्र रजतत्वधर्मितया अभानात्। तत्र स्थले जायमानायाः विसंवादिन्याः रजतार्थिपुरुषप्रवृत्तेस्तु रजतत्वाभाववन्निष्ठ- विशेष्यतानिरूपितरजतत्वनिष्ठप्रकारताकत्वं विद्यते। तथा च तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकत्वरूपं व्यधिकरणप्रकारताकत्वं प्रवृत्तौ प्रसिद्धं ज्ञाने तु नाङ्गीक्रियत इति।

प्रेक्षावदनुभवसिद्धस्य अतस्मिन् तद्बुद्धिरूपस्य अयथार्थानुभवस्य अपलपितुमशक्यत्वात् अवश्यमङ्गीकार्यः। तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकमेकं विशिष्टज्ञानमेव भ्रमः। शुक्तिं दृष्ट्वा जायमानमिदं रजतमिति ज्ञानमयथार्थज्ञानम्। तदेव अप्रमेति भ्रम इति च उच्यते। तदेव च नैययिकमते अन्यथाख्यातिरित्युच्यते। तत्र पुरोवर्तिनि रजतत्वस्य असत्वेऽपि उपनयसन्निकर्षेण तत्र तस्य भानम्। तस्य रजतत्वप्रकारकत्वादेव तदुत्तरं रजतार्थिनः तत्र प्रवृत्तिरुपपद्यते। तत्र ज्ञानद्वयमिति तु न स्वीकर्तुं शक्यं, ज्ञानद्वयस्याननुभवादिति नैयायिकानामाशयः। अत एव ते अन्यथाख्यातिवादिन इत्युच्यन्ते। जानाति-इच्छति-यतते इति न्यायेन प्रवृत्तित्वावच्छिन्नं प्रति पुरोवर्तिधर्मिकेष्टतावच्छेदकरजतत्वादिप्रकारकज्ञानं कारणमिति सामान्यकार्यकारणभावः संवादिप्रवृत्तिस्थले अन्वयव्यतिरेकाभ्यां निर्णीतः। पुरोवर्तिनि 'इदं रजतम्' इत्याकारके विशिष्टज्ञाने सति तत्र रजतत्वप्रकारकप्रवृत्युदयात् तद्विरहे तदभावात्।

**<u>अन्यथाख्यातिसामग्रीनिरूपणम् -</u>**

ननु विशिष्टज्ञानस्य प्रवर्तकत्वोपगमे विसंवादिप्रवृत्तेरनुपपत्तिः तत्कारणस्य शुक्तिधर्मिकस्य रजतत्वप्रकारकस्य विशिष्टज्ञानस्य सामग्रीविरहेण तत्रोत्पत्यसम्भवादिति चेत्।

न। संस्कारेन्द्रियाभ्यां धर्मधर्मिणौ तत्तेदमंशौ अवगहमानं 'सोऽयं देवदत्तः' इत्यादिप्रत्यभिज्ञानमिव संस्कारेन्द्रियाभ्यां रजतत्वेदमंशौ अवगाहमानम् 'इदं रजतम्' इति एकं विशिष्टप्रत्यक्षमपि उत्पत्तुमर्हति।

**<u>अन्यथाख्यातौ प्रत्यक्षप्रमाणोपन्यासः -</u>**

अन्यथाख्यातिसाधने प्रत्यक्षप्रमाणमुपलभ्यते। तथाहि – शुक्तौ 'इदं रजतम्' इति प्रतीत्युदयानन्तरम् 'इदं रजततया जानामि' इत्यनुव्यवसायो जायते। तेन च पुरोवर्तिविशेष्यकरजतत्वप्रकारकज्ञानं विषयीक्रियते। तदेव ज्ञानं पुरोवर्तिनं शुक्त्यादिकम् अन्यथा-रजतत्वादिना अवगाहमानम् अन्यथाख्यातिरित्यभिधीयते। इत्थम् अनुव्यवसायसाक्षिकमेव अन्यस्य अन्यथाभानम्। यो व्यवसायो हि येन प्रकारविशेष्यभावेन यान् विषयान् अवगाहते, तानेव विषयान् तदुपरक्तं तमेव प्रकारविशेष्यभावं तदुपरक्तं तमेव व्यवसायञ्च अवगाहते अनुव्यवसायः। 'अयं घटः' इति व्यवसायोत्तरं जायमानः अनुव्यवसायः घटत्वप्रकारकव्यवसायाऽविशेष्यान् पटादीन् न घटत्वप्रकारकज्ञानविशेष्यत्वेन अवगाहते। नापि घटत्वाऽविषयकं 'अयं पट' इति ज्ञानं घटत्वविषयकत्वेन अवगाहते। अनुव्यवसायस्य



ISSN : 2320-740X

[redacted]

भ्रमत्वे कदाचित् घटज्ञानोत्तरं 'पटं जानामि' इत्यनुव्यवसायप्रसङ्गः । तथा च भ्रमात्मकस्य विशिष्टज्ञानस्यानुपगमे 'इदं रजततया जानामि' इत्यनुव्यवसायः नोपपद्येत ।

**<u>अनुमानेन अन्यथाख्यातिसाधनम्</u>** –

प्रवृत्तिविशिष्टज्ञानयोः सामान्यकार्यकारणभावम् अवलम्ब्य विसंवादिप्रवृत्तिकारणतया अन्यथाख्यातिः साधयितुं शक्यते । अनुमानप्रयोगस्तु – "विसंवादिप्रवृत्तिः विशिष्टज्ञानसाध्या प्रवृत्तित्वात् सत्यप्रवृत्तिवत्" इति । तदर्थस्तु – शुक्तिविशेष्यकरजतत्वप्रकारकप्रवृत्तिः स्वप्रकारतासमानाधिकरणप्रकारतानिरूपित स्वविशेष्यतासमानाधिकरणविशेष्यताकत्व स्वसाध्यत्वोभयसम्बन्धेन ज्ञानविशिष्टा प्रवृत्तित्वात् रजतविशेष्यकरजतत्वप्रकारकप्रवृत्तिवत् इति । प्रवृत्तिं प्रति तत्समानप्रकारविशेष्यकस्य ज्ञानस्य कारणतायाः क्लृप्तताया अनुभूयमानायाः शुक्तिविशेष्यकरजतत्वप्रकारकप्रवृत्तेः शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानमन्तरानुपपद्यमानतया तज्ज्ञानोपगमेन अन्यथाख्यातिसिद्धिः निष्प्रत्यूहैव ।

*****

## युवजनेभ्यःस्वामीविवेकानन्दानां सन्देशः

✍ **नागपतिः हेगडे**
आचार्यद्वितीयवर्षम्

लोके सदुपदेशस्य सन्मार्गप्रवर्तकत्वात् असदुपदेशस्य दुर्मार्गप्रवर्तकत्वात् उपदेश एव सेव्यः । असदुपदेशस्तु त्याज्यः । इति सार्वकालिकोऽयं नियमः । पुनश्च सदुपदेशस्य चिरस्थायित्त्वञ्च सर्वानुभवसिद्धम् । इदमेवार्थं द्रढयितुं प्रवृत्तं सुभाषितमेकमाकर्ण्यते ।

" सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिः शपथेनापि जले लिखितमक्षरम् ॥ "

तथा च विवेकचूडामणौ भगवान् शङ्कराचार्यः -

" अर्थस्य निश्चयो दृष्टो वा विचारेण हितोक्तितः ।
न स्नानेन न दानेन प्राणायामशतेन वा ॥ "

इति स्नानदानप्राणायामादीनां नास्ति कार्याकार्यविवेकोऽत्पादकत्त्वम् । तदस्ति केवलस्य हितोपदेशस्य इति जुघोष । इत्थञ्च एतेन सदुपदेशस्य सर्वजनोपकारकत्त्वं सर्वजनप्रबोधकत्वञ्च सकलैरभ्युपगतम् इति तु असन्दिग्धम् । अत एव भारते उपदेग्रन्थानां राशिः पर्वत इव राराजते । तेषु उपदेशकोटिषु अपि आधुनिक


ISSN : 2320-740X

ऋषिप्रवरस्य स्वामिविवेकानन्दस्य उपदेशानां सिंहगर्जितोपमत्त्वात् अनुत्साहवतामपि उत्साहोऽत्पादनेन कार्योन्मुखविधायकत्त्वाच्च सर्वातिशायीश्रेष्ठत्त्वं वरीवर्ति।

विवेकानन्दवर्याणां सन्देशाः सर्वजनोद्देशे प्रवृत्ता अपि बहुत्र तेषां युवजनोद्देश्यत इव दरीदृश्यन्ते । अत एव सः यूनः प्रति इत्थं उदघोषयत् " आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् " ॥ इतीयं वेदवाणि नवतारुण्यवतां यूनामेव भविष्यज्जीवनस्य उदारसङ्कल्पस्य क्रियान्वयनसामर्थ्यमावहति । न तु जराजर्जरितकायानाम् । सद्यो विकसितस्य अनाघ्रातस्य अस्पृष्टस्य कुसुमस्यैव भगवच्चरणतलालङ्करणयोग्यता न तु म्लायमानस्य । अतः हे युवानः समयोऽयं समागतः सेवानुकूलः । उत्तिष्ठत कार्यं कुरुत । इति ।

पुनश्च देशहिताय प्राणत्यागेऽपि अविचलमनसां सिंहोपमानां यूनां सहस्रमपेक्षे। ये च दरिद्रेषु दयां बुभुक्षितेभ्यः अन्नम् अज्ञेभ्यः ज्ञानञ्च वितरितुं प्राणान् पणीकृत्य शाम्नेयुः । अहं काङ्क्षे तादृशान् पुरुषान् ये च विस्फुलिङ्गोपमाः मतिमन्तः मृत्युवक्त्रनिवेषाभीरवः बाहुमात्रसहाया अपि समुद्रतरणोऽत्सुकाः उत्कटाविचलदेशाभिमानिनः भूत्वा देशनिर्माणे अमग्नोऽद्यमाः भवेयुः । एतादृशानां यौवतशतं लब्ध्वा समग्रमपि देशं विचिचलिषामि । इत्येवं युवकेषु यौवनस्य त्यागस्य उत्साहस्य च प्राधान्यं प्रतिपाद्य तेषु चारित्र्यस्यापि अनिवार्यतां निरूपयति ।

परिशुद्धचारित्र्यसम्पादनाय अनवरतं सत्कार्येषु आत्मानं नियोजयत । मनसि सदापि सदेव चिन्तयत । अभ्यासस्य उत्तम चारित्र्यनिर्मापकत्त्वात् सदेव शरणङ्गच्छत । ततः तेनैव चारित्र्यं परिशुच्यते । तस्मात् अविचला सङ्कल्पशक्तिश्च जागर्ति । सकलापि विद्या करतलामलकीव भवति । एवं चारित्र्यस्य प्राधान्यं प्रख्याय दुर्बलतायाः निन्दां धैर्यस्य प्रशंसाञ्च प्रख्याति । तथा हि शक्तिर्हि जीवनं दौर्बल्यं मरणोपमम् । अतः हे युवानः भवत्सु प्रत्येकोऽपि पुरुषः सिंहोपमः स्यात् । सर्वस्यापि विजेयता त्यागसज्जता अमितसद्भावत्वञ्च श्रद्धावत्त्वञ्च भवेत् । इत्याह ।

एवं च विवेकानन्दस्य सन्देशेषु दौर्बल्यस्य निन्दा धैर्यस्य स्तुतिः प्राचीनपरम्परायां परमा श्रद्धा देशप्रेम देशस्य दुरिस्थतौ खेदः चारित्र्यशिक्षणादीनाम् अनिवार्यता युवशक्तौ अविचलः विश्वासश्च भूयोभूयः उपलक्ष्यते । एतादृशानां तेषां अगणितभावतरङ्गविलसितोपदेशवारिधौ निमज्य कूटान्तःकरणाः वयमपि धन्याः भवेम ।

*****



ISSN : 2320-740X

## जीवानां विकासक्रमः

✍ राजेश् हेगडे
आचार्यद्वितीयवर्षम्

श्रीमद्भागवतपुराणे जीवानां विकासक्रमः परमलक्ष्यञ्च इत्थमुपवर्ण्यते ।

जीवाः श्रेष्ठाः ह्यजीवानां ततः प्राणभृतः शुभे ।
ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः ॥ (श्री.म.भा.म.पु - ३ स्क.२९अ.२८ श्लोक ।)

जगतीतले अचेतनेभ्यः मृत्पाषाणादिभ्यः सचेतनाः वृक्षादयः श्रेष्ठाः । सचेतनेषु श्वासोच्छ्वासवन्तो जङ्गमाः श्रेष्ठाः । श्वासोच्छ्वासवत्सु जीवेषु सचित्ताः समनस्काः जीवाः उत्तमाः भवन्ति । समनस्केषु जीवेषु पुनः इन्द्रियद्वारा उपरसादिज्ञानवन्तः जीवाः प्रवराः भवन्ति ।

तत्रापि स्पर्शवेदिभ्यः प्रवराः रसवेदिनः ।
तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः ॥ ( श्री.म.भा.म.पु – ३ स्क. २९ अ. २९ श्लोक)

इन्द्रियवत्सु जीवेषु पुनः स्पर्शवेदिभ्योऽपि रसज्ञाः मीनादयः प्रवराः भवन्ति । स्पर्शरसवेदिषु भृङ्गादयः स्पर्शरसगन्धवेदिनः श्रेष्ठाः । गन्धविद्भ्यः शब्दविदः श्रेष्ठाः ।

रूपभेदविदस्तत्र ततश्चोभयतोदतः ।
तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ॥ ( श्री.म.भा.म.पु - ३.स्क.२९ अ.३०श्लो)

शब्दविद्भ्यः जीवेभ्यः रूपविदः काकादयः श्रेष्ठाः । रूपविदपेक्षया उभयतोदत [उभयतो दत्ताः येषां ते] उत्तराधरदन्तयुक्ताः कीटविशेषाः श्रेष्ठाः । तेभ्यः अपादेभ्यः बहुपादयुक्ताः शरभादयः श्रेष्ठाः । ततः चतुष्पादगवादयः श्रेष्ठाः । ततः द्विपादयुक्तमनुष्याः श्रेष्ठाः ।

ततो वर्णश्च चत्वारस्तेषां ब्राह्मण उत्तमः ।
ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥ (श्री.म.भा.म.पु - ३.स्क.२९अ.३१श्लो.)

मनुष्याः चतुर्विधाः भवन्ति । यतो हि चत्वारो वर्णाः वर्तन्ते । ब्राह्मण-क्षत्रिय-शूद्र-वैश्य इति । तेषां वर्णानां मध्ये ब्राह्मणः उत्तमः । ब्राह्मणेष्वपि जातिः ब्राह्मणापेक्षया वेदाध्यायी विप्रः महान् भवति । ततः वेदार्थवित् महान् ।

अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान् स्वकर्मकृत् ।
मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः ॥ (श्री.म.भा.म.पु - ३ स्क.२९अ.३२श्लो)



ISSN : 2320-740X

अर्थज्ञानवतः अपेक्षया सर्वसन्देहनिवारकः ब्राह्मणः श्रेयान् । तत्र श्रेष्ठः द्विविधो ब्राह्मणः भवति । तत्र स्वधर्मानुष्ठानशून्यात् ब्राह्मणात् स्वधर्मानुष्ठानरतः श्रेष्ठः । स इन्द्रसमः श्रेष्ठः । ततः यः धर्माचरणे फलाकाङ्क्षारहितः सः निष्कामः श्रेष्ठः ।

तस्मान्मय्यर्पिता शेषक्रियार्थात्मा निरन्तरः ।
मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः ।
तपस्यामि परं भूतमकर्तः समदर्शनात् ॥ (श्री.म.भा.म.पु – ३ स्क.२९अ.३३श्लो)

निष्कामकर्मणोऽपि ब्राह्मणात् भगवति अर्पितानि सकलानि कर्माणि कर्मफलानि च अर्थाः देहगेहादयः मनोबुद्धिचित्ताहङ्काराः येन सः श्रेष्ठः भवति । भगवति न्यस्तात्मरक्षाभारात् प्रयोजककर्तरि क्रियाफलप्रदे संन्यस्तकर्मणः तस्मात् सर्वक्रियाप्रवर्तकेऽन्तर्यामिणि मध्येवानुसंहितक्रिया कर्त्तृत्वात् । अत एव स्वस्मिन् कर्तृत्वादिभिन्नरहितात् वासुदेव एव सर्वं करोति कारयति च । नाहं स्वातन्त्र्येण किञ्चित्करोमीति ज्ञानवत इत्यर्थः । कृत्स्नं जगद् ब्रह्मात्मकमिति ज्ञानवत उत्कृष्टं जीवनं पारयामि ।

*****

## स्नानपदार्थ विचारः

✍ **टि. के. नरसिंहन्**
आचार्यद्वितीयवर्षम्

**यथाऽहनि तथाप्रातः नित्यं स्नायादनातुरः ।**
**स्नातोप्रधिकारी भवति दैवे पैत्रे च कर्मणि ॥**

इत्यादि विधिना प्रतिपादितः स्नानपदार्थः कः इति प्रतिपादनार्थं प्रवृत्तः कश्चन् ग्रन्थकर्ता । तस्यायमाशयः – स्नानं नाम किम् ? न तावत् बहिरङ्गजलसंयोगः स्नानं ? यतोहि जलपानसमयेऽपि बहिरङ्जलसंयोगस्य सत्त्वात् "अयं स्नाति" इति प्रयोगपत्तिः । न तावत् च यावद्बहिरङ्गजलसंयोगः स्नानम् । यद्यपि पूर्वोक्तस्थले तथा व्यवहारः वारयितुं शक्यते । तथापि यदा प्रथमक्षणे मुखजलसंयोगः , द्वितीयक्षणे हस्तजलसंयोगः , इत्यादिक्रमेण यावद्बहिरङ्गेन जलस्य संयोगः जातः तदानीं अपि स्नाति इति व्यवहारः स्यात् । न चेष्टापत्तिः । तथा प्रामाणिकव्यवहारस्य अदृष्टत्वात् ।

उच्यते – एकदा स्वीयबहिः सर्वाङ्गेण जलसंयोगः स्नानम् । तस्यायमर्थः एकक्षणावच्छिनस्वीयसकलबहिरङ्गानु योगिकजलप्रतियोगिक संयोगः स्नानम् ।

दलप्रयोजनानि –



ISSN : 2320-740X

१. संयोगः एकक्षणावच्छिन्नत्वदलस्य प्रयोजनम् – यत्र प्रातः एकाङ्गजलसंयोगः इत्यादिक्रमेण यत्र सर्वाङ्गे जलसंयोगः जातः तदत्र अन्तिमजलसंयोगसमये “अयं स्नाति” इति व्यवहारः स्यात् अतः तद्वारणाय एकक्षणावच्छिन्नत्वमिति विशेषणं दातव्यम् । तथा सति तत्र तदानीं संयोगे एकक्षणावच्छिन्नत्वं नास्ति इति नातिव्याप्तिः। ननु जलव्यक्तीनाम् अनेकत्वात् तेषां स्नाधात्वर्थत्वे महद्गौरवं भवति । अतः जलसंयोगकूटस्यैव स्नाधात्वर्थत्वं स्वीकर्त्तव्यम् । एवं च पूर्वोक्तस्थले जलसंयोगकूटाभावकारणसंभवात् एव अतिव्याप्तिवारणसंभवात् एकक्षणावच्छिन्नत्वं इति विशेषणं व्यर्थं इति चेत् न । तत्र एकक्षणावच्छिन्नत्वं नाम एकक्षणावच्छीन्नोत्पत्तिकत्वम् इत्यर्थः । अन्यथाऽविद्यमानक्रमोत्पन्नसंयोगव्यक्तीः आदाय स्नाति इति व्यवहारः स्यात् । अतः तद्विशेषणमावश्यकम् ।

२. स्वीयत्वदलस्य प्रयोजनम् – यत्र एकपुरुषेण जलसहसंयोगः वर्तते तत्र अन्यपुरुषं उद्दिश्य अयं स्नाति इति व्यवहारापत्तिः । अतः तद्विशेषणम् ,अन्यदीयपुरुषाङ्गे तत् नास्ति इति न तद्व्यवहारापत्तिः।

३. साकल्यविशेषणस्य सार्थक्यम् - तादृशसंयोगकूटपदेन कतिपयकूटमादय पुनः अतिव्याप्तिः। अतः बहिरङ्गे साकल्यं विशेषणं दत्तम्।

अत्रेयं शङ्का - साकल्यविशेषणे दत्ते सति कूटपदं व्यर्थम्।

यतोहि क्रमोत्पन्नजलसंयोगव्यक्तिनाम् बहिरङ्गत्वं व्यापकत्वाभावात् । इति चेत् मैवम् – तथापि पूर्वोक्तदोषः तदवस्थःएव। व्यापकत्वाश्रय संयोगव्यक्तीनां अनेकत्वात् एकस्यैव संयोगस्य स्नाधात्वर्थत्वं वा उत् अन्यस्य संयोगस्य इति विनिगमनाविरहेण कूटस्यैव अगत्या व्यापकत्वं वक्तव्यं भवति इति कूटपदनिवेशः। अत्र जलसंयोगः “ प्रतियोगिकत्वानियोगिकत्वान्यतरसंबन्धेन जलविशिष्टसंयोगः ग्राह्यः। तेन अङ्गमात्र क्रियाजन्यसंयोगः , जलमात्रक्रियाजन्यसंयोगेऽपि च अव्याप्तिः। अङ्गे बहिष्ट्वं विशेषणम् – यदि अङ्गे बहिष्ट्वं इति विशेषणं नास्ति तथासति असंभवः। तत्र अङ्गत्वस्य संयोग व्याप्यत्वविरहात् अङ्गत्वं च चर्मान्तर्गतं सूक्ष्माङ्गेऽपि अस्ति। तत्र जल संयोगः नस्ति इति असंभवः।अतः बहिष्ट्व विशेषणं तथासति सूक्ष्माङ्गानां बहिष्ट्व विरहात् बहिरङ्गत्वस्य च जलसंयोग कूट व्याप्यत्वात् नासंभवः। इति संक्षेपः।

*****



ISSN : 2320-740X

## श्रीमद्भगवद्गीता एवं कोरान्सरिफयोः केचन समधर्माः

✍अमिर् बाग्
आचार्यप्रथमवर्षम्

अस्माकं भारतीयानां धर्मग्रन्थः भवति श्रीमद्भगवद्गीता । तया सह कोरान्सरीफयोः धर्मसिद्धान्तगतसमाना कुत्रचित् परिदृश्यते। उभयग्रन्थेभ्यः कांश्चन अंशान् विचारयितुं इच्छामि।

गीतायां ज्ञानकर्मयोगयोः विषये भगवता श्रीकृष्णेन उपदेशः कृतः । एतेषु कर्मयोगः अन्यतमः । एतस्य प्रयोजनं जगतितले विद्यमानान् लोकान् कर्म प्रति मनुष्यस्य श्रद्धां जागरयितुं एषो योगः प्रवर्तेतः । गीतायां पञ्चमाध्याये द्वितीयः श्लोकः भवति –

**संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।**
**तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते॥** इति।

अर्थात्- निष्फलकर्मत्याग एव कर्मयोगः मोक्षप्रदानकारकः भवति, किन्तु एतयोः द्वयोः अपेक्षया कर्मयोगः उत्कृष्टतरो वर्तते। सुतरां द्रष्टुं शक्नुमः यत् भगवतः श्रीकृष्णस्य मते कर्मयोगः श्रेयस्करः इति अन्येन श्लोकेन वर्णितम् अस्ति यथा-

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुभोर्माते सङ्गोऽस्त्वकर्मणि॥**इति।

अर्थात् –कर्मे तव अधिकारः अस्ति परन्तु कर्मफले अधिकारः न करणीयः। कर्म प्रेरणायाः निमित्तं फललाभस्य आकाङ्क्षा मुख्योद्देश्यः आदौ न मङ्गलम्।

एतादृशभावाधारेण सहितं 'कोरान् सरीफ्' इत्यस्य प्रवचनम् अनेकेषु स्थलेषु समावलोक्यते। अत्र स्वयं आल्लाह मनुष्येण कर्म प्रति श्रद्धाशीलेन भाव्यम् इत्येवम् उपदेशं दत्तवान् अस्ति । तस्य मते मर्मनिरतमनुष्यः एव श्रेष्ठ इति। मनुष्यः कर्मसु मर्मतत्परः स्यात्।

किन्तु मनुष्येण कृतस्य कर्मणः फलाफलदाता स्वयम् आल्लाह इति कथयति। स एव उपदेशः गीतायामपि –

**न हि कल्याणकृत् कश्चित् दुर्गतिं तात् गच्छति।** इति।

अर्थात् –ये जनाः शुभकर्मणः अनुष्ठानं कुर्वन्ति ते जनाः दुर्गतेः सम्मुखाः न भवन्ति।

एष एव प्रतिध्वनिः 'कोरान्सरीफ्' मध्ये श्रूयते। "कोरान्" इत्यस्य सुरा (३९)(१०) आयत्तः ज्ञायते। ये जनाः लोके मङ्गलकार्येषु व्रतिनो भवन्ति तेषां सदा कल्याणं भवत्येव।

अन्यत्र सुरा एवम् आयत् (6-८) मध्ये कथितः - अणुमात्रमपि सत्कार्य करोति चेत् सुफलं प्राप्नोति।



ISSN : 2320-740X

अणुमात्रमपि कुकार्यं करोति चेदपि कुफलं तु प्राप्नोति एव कदाचित् परोक्षेण प्रत्यक्षेण वा अनुभूयते एव।

'कोरान्सरीफ्' इत्यस्मिन् सुरा २ आयत् २२२ इत्यत्र आल्लह् वदति –

कश्चन जनः उत्तमकार्यं कृत्वा आल्लाहस्य समीपे सम्पूर्णमात्मसमर्पणं करोति। **"अविनाशि तु तद्विद्धि येन कर्ममिदं ततम्"** पुनश्च, **"न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः"** इत्यादि श्लोकेषु आत्मा अविनाशि भवति, तदेव कोरान्सरीफे अपि कथितम्। यदा मनुष्यस्य मरणं भवति तदा शरीरस्य विलयः जायते परन्तु आत्मनः न।

यत्र धर्मेषु सत्यस्य व्यभिचारो अस्ति पुनः धर्महेत्वभासः अवलोक्यते तदा महान् दोषैव भवति। आगच्छन्तु वयं परस्परं श्रद्धाशीलाः भवामः। एषः अन्यं पुनश्च अन्यः एनं ज्ञातुं प्रचेष्टामः। ज्ञानस्य लोकेन अज्ञानस्य तिरोधानं कुर्मः। अतः अस्माकं समवेतप्रार्थना एषा एव भवति –

**"असतो मा सद्गमय, तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतङ्गमय॥"** इति।

*****

## एकवाक्यत्वम्

✍ **वाणी मञ्जुनाथ हेगडे**
आचार्प्रथमवर्षम्

पदगतं वाक्यगतं क्वचित् प्रकरणगतं च एकवाक्यत्वं शास्त्रेषु दरीदृश्यते। "तत्प्रयोज्यविषयतया साक्षात्परम्परया वा निरूपिता या विषयता तत्प्रयोजकत्वमेव पदनिष्ठं तदेकवाक्यत्वम्। तथा हि – 'धवखदिरौ' इति शब्दश्रवणेन धवखदिरौभयनिष्ठविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारताकबोधो जायते। धवपदजन्यधवोपस्थितिवशात् धवः शाब्दबोधे भासते। एवं खदिरपदजन्यखदिरोपस्थितिवशात् खदिरः शाब्दबोधे भासते। द्विवचनप्रत्ययजन्य द्वित्वोपस्थितिवशात् द्वित्वं शाब्दबोधे भासते। अतः शाब्दबोधीयधवनिष्ठविशेष्यतायाः धवखदिरौ इत्येतादृशवाक्यघटकीभूतधवपदनिष्ठप्रयोजकतानिरूपितप्रयोज्यत्वमस्ति। खदिरनिष्ठशाब्दबोधीयविशेष्यतायाः निरुक्तवाक्यघटकखदिरपदनिष्ठप्रयोजकतानिरूपिताप्रयोज्यत्वमस्ति। किं च शाब्दबोधे द्वित्वस्य धवखदिरोभयस्याऽपि प्रकारत्वात् धवनिष्ठविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारतानिरूपितत्वं खदिरनिष्ठविशेष्यतायां वर्तते। तथा च धवपदप्रयोज्या या शाब्दबोधीया धवनिष्ठा विशेष्यता परम्परया तन्निरूपिता या शाब्दबोधीया खदिरनिष्ठविशेष्यता तत्प्रयोजकत्वं खदिरपदे विद्यते। तस्मात् खदिरपदस्य धवपदेन एकवाक्यता उपपद्यते।



ISSN : 2320-740X

'अयमेति पुत्र राज्ञः पुरुषोपसार्यताम्' इत्यत्र राजपदपुरुषपदयोः ईदृश एकवाक्यता न भवति । वाक्यगतं एकवाक्यत्वं च विशिष्टैकार्थप्रतिपादकत्वं, तदुत्थाप्याकांक्षानिवर्तकत्वतन्निवर्तनीयाकांक्षोत्थापकत्वान्यतरवत्वं वा । प्रतिज्ञाहेतुवाक्ययोः एकवाक्यत्वम् इत्थं सम्भवति । तथा हि- "पर्वतो वह्निमान्" इति प्रतिज्ञावाक्यात् 'पर्वतः वह्निमद्भिन्नः' इति बोधः भवति । 'धूमात्' इति हेतुवाक्यात् 'धूमज्ञानज्ञाप्यत्वं' इति बोधः भवति । तथा च प्रतिज्ञाहेतुवाक्यसमुदायात् 'पर्वतः धूमज्ञानज्ञाप्यवह्निमद्भिन्नः' इति विशिष्टार्थबोधः भवति । इत्थं च विशिष्टकार्थप्रातिपादिकत्वेकवाक्यत्वं प्रतिज्ञाहेतुवाक्ययोः भवति इति समन्वयः । एवमेव 'पर्वतो वह्निमान्' इति प्रतिज्ञावाक्येन जनिता या आकांक्षा 'कुतो वह्निमान्' इत्याकारिका ज्ञापकज्ञानविषयिणी आकांक्षा, तन्निवर्तकत्वं' 'धूमात्' इति हेतुवाक्यस्य अस्ति । एवं धूमात् इति हेतुवाक्येन निवर्तनीया या आकांक्षा 'कुतो वह्निमान्' इत्याकारिका ज्ञापकज्ञानविषयिणी आकांक्षा । तदुत्थापकत्वं 'पर्वतो वह्निमान्' इति प्रतिज्ञाया अस्ति इति प्रतिज्ञाहेत्वोः एकवाक्यत्वम् । क्वचित् प्रतिज्ञानिगमनयोः एकवाक्यता संभवति । परन्तु उदाहरणादिवाक्यानां एकवाक्यत्वं तु न संभवति ।

प्रकरणगतम् एकवाक्यत्वं च "साकांक्षत्वे सति एकार्थप्रतिपत्तिपरत्वम्" । तदेव जैमिनिसूत्रेऽपि उक्तम् 'अर्थैक्यादेकं वाक्यं साकांक्षां चेद्विभागे स्यादिति' । साकांक्षकत्वे सति एकार्थप्रतिपत्तितात्पर्येण उच्चारितत्वम् एकवाक्यत्वम् इत्यर्थः । प्रत्यक्षग्रन्थानुमानग्रन्थयोः एकवाक्यत्वं सम्भवति । इत्थम् - प्रत्यक्षग्रन्थश्रवणात् 'किमस्य उपजीवकम्' इत्याकारिका उपजीवकविषयिणी आकांक्षा उदेति । तन्निवर्तकत्वं अनुमानग्रन्थस्य अस्ति । यतो हि अनुमानग्रन्थश्रवणेन अनुमानविषयकं ज्ञानं जायते । अनेन ज्ञानेन 'प्रत्यक्षोपजीवकं किम्' इति आकांक्षा निवर्तते । इत्थञ्च प्रत्यक्षग्रन्थस्य अनुमानग्रन्थेन या आकांक्षा निवर्तनीया उपजीव्यज्ञानविषयिणी आकांक्षा तदुत्थापकत्वं प्रत्यक्षे अस्ति इत्यतः प्रत्यक्षानुमानयोः साकांक्षत्वम् अस्तीति एकवाक्यत्वं उपपद्यते ।

साकाङ्क्षत्वे सति एकार्थप्रतिपत्तितात्पर्येण उच्चारितत्वम् एकवाक्यत्वमिति । केवल एकार्थप्रतिपत्तितात्पर्येण उच्चारितत्वं एकवाक्यत्वमिति यदि उच्यते तर्हि 'घटोऽस्ति कलशोऽस्ति' इति वाक्ययोः मध्ये , घटोऽस्ति इति वाक्यं सत्ताश्रयं घटं प्रतिपादयति । एवं कलशोऽस्तीत्यपि वाक्यं सत्ताश्रयं घटमेव बोधयतीति एकार्थप्रतिपत्तितात्पर्येण उच्चरितत्वमस्तीति अतिव्याप्तिः । अतः तद्वारणाय साकाङ्क्षत्वम् इति निवेशनीयम् । साकङ्क्षत्वं च "तदुत्थाप्य आकाङ्क्षा निवर्तकत्वतन्निवर्तनीय आकाङ्क्षा उत्थाप्यकत्व अन्यतरत्वम् इति । तादृश साकाङ्क्षत्वदलनिवेशे तु, घटोऽस्ति इत्यनन्तरं कुत्रास्ति? इति आकाङ्क्षा स्यात् कदाचित् । तन्निवर्तकत्वं कलशोऽस्ति इति वाक्यस्य नास्ति । एवमेव तन्निवर्तनीय आकाङ्क्षा उत्थापकत्वं घटोऽस्ति इति वाक्यस्य नास्ति । अतः एतादृशसाकाङ्क्षत्वं नास्तीति



ISSN : 2320-740X

[redacted]

तादृशवाक्यद्वयोः एकवाक्यत्वं नास्ति इति नातिव्याप्तिः । केवल साकाङ्क्षत्वमेव एकवाक्यत्वमित्युच्यते चेत्, भूतलं घटवत्, कम्बुग्रीवादिमान् इति वाक्यस्य च एकवाक्यतापत्तिः ।

'भूतलं घटवत्' इति श्रवणानन्तरं' को घटः? इति आकाङ्क्षा जायते । तदा कम्बुग्रीवादिमान् इत्युक्तम् । 'भूतलं घटवत्' इति वाक्येन, उत्थाप्या या आकाङ्क्षा 'को घटः?' इत्याकाङ्क्षा तन्निवर्तकत्वं कम्बुग्रीवादिमान् इति वाक्यस्य अस्ति । कम्बुग्रीवादिमान् इति उत्तरवाक्यनिवर्तनीया या आकाङ्क्षा 'को घटः?' इत्याकाङ्क्षा तदुत्थापकत्वं 'भूतल घटवत्' इति वाक्यस्य अस्ति इत्यतः एकवाक्यतापत्तिः । तद्वारणाय एकार्थप्रतिपत्तिपरत्वमिति दलं निवेशनीयम् । तन्निवेशे तु 'भूतलं घटवत्' 'कम्बुग्रीवादिमान्' इति वाक्ययोः एकार्थप्रतिपत्तिपरत्वाभावात् नातिव्याप्तिः ।

यतः कम्बुग्रीवादिमान् इति वाक्यं कम्बुग्रीवादिमन्तं प्रतिपादयति । परन्तु अत्र आशङ्का - अर्थैक्यत्वात् एव एकार्थप्रतिपादकत्वं भवतु इति । यतः घटरूपः एकः अर्थः गृह्यते तथा च तत्प्रतिपादकत्वं द्वयोः अपि वाक्ययोः अस्तीति फलति । अतः एकवाक्यतापतिः अस्त्येव । अतः निरुक्तस्थले अतिव्याप्तिः न वार्यते खलु इति चेत् , साकाङ्क्षत्वे सति एकार्थप्रतिपत्तिपरत्वं इति द्वाभ्यां दलाभ्यां परस्परसहकारेणविशिष्टैकार्थप्रतिपादकत्वमित्यर्थः स्वीक्रियते । एवं सति 'भूतलं घटवत्' इति वाक्यात् अर्थप्रतिपत्तिः जननीयायां 'कम्बुग्रीवादिमान्' इति वाक्यस्य आवश्यकता नास्ति । 'कम्बुग्रीवादिमान्' इति वाक्यं विनापि 'भूतलं घटवत्' इति वाक्यं स्वार्थप्रतिपत्तिं जनयत्येव । एवं कम्बुग्रीवादिमानिति वाक्यमपि 'भूतलं घटवत्' इति वाक्यं विनापि स्वार्थप्रतिपत्तिं जनयत्येव । अतः परस्परसहकारेण एकार्थप्रतिपत्तिपरत्वं नास्ति इति एकवाक्यतावारणम् । विशिष्टैकार्थप्रतिपत्तिप्रयोजकत्वप्रकारकाभिप्रायविषयत्वम् एकवाक्यत्वम् इति दलद्वयसमुदितार्थः । प्रकृते च प्रत्यक्षपरिच्छेदानुमानपरिच्छेदयोः मिलित्वा विशिष्टैकार्थविषयकशाब्दबोधजनकत्वेऽपि प्रत्यक्षानुमान-उपमानशब्दचत्वारिप्रमाणानीत्यप्रामाण्यशङ्कनास्कन्दितनिश्चयं प्रति परिच्छेदचतुष्टयस्यैव कथञ्चिदुपयोगित्वम् अस्ति । प्रत्यक्षानुमानपरिच्छेदौ एकार्थप्रतिपत्तिप्रयोजकौ भवेताम् इत्यभिप्रायेण मणिकारेण प्रत्यक्षग्रन्थ-अनुमानग्रन्थौ निरूपितौ । अतः तादृशप्रतिपत्तिप्रयोजकत्वप्रकारकाभिप्रायविषयत्वरूपमेकवाक्यत्वं प्रत्यक्षानिगमनयोः भवति ।

*****



[redacted]

ISSN : 2320-740X

## विभिन्नाचार्याणां मते काव्यलक्षणानि ( सङ्ग्रहः)

✍मोहितजोशी

शिक्षाशास्त्रि ‘ ब ’ विभागः

१. तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि। मम्मटः ( काव्यप्रकाशः)

२. रमणीयार्थप्रतिपादकः शब्दः काव्यम्। जगन्नाथः (रसगङ्गाधरः)

३. वाक्यं रसात्मकं काव्यम्। - विश्वनाथः (साहित्यदर्पणम्)

४. शब्दार्थौ सहितौ काव्यम्। - भामहः (काव्यालङ्कारः)

५. शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली। - दण्डी (काव्यादर्शः)

६. शब्दार्थौ काव्यम्। - रुद्रटः (काव्यालङ्कारः)

७. मृदुललितपदाढ्यंगूढशब्दार्थहीनं जनपदसुबोध्यं युक्तिमन्वृत्ययोग्यम्।
बहुकृतरसमार्गं सन्धिसन्धानयुक्तं भवति जगति योग्यं नाटकं प्रेक्षकाणाम् ॥ - भरतमुनिः ( नाट्यशास्त्रम् )

८. शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ॥ - कुन्तकः ( वक्रोक्तिजीवितम् )

९. सङ्क्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
काव्यं स्फुरदलङ्कारं गुणवद् दोषवर्जितम् ॥ - अग्निपुराणम्

१०. “ काव्यस्यायमलङ्कारैः किं मिथ्यागुणितैर्गुणैः।
यस्य जीवितमौचित्यं विचिन्त्यपि न दृश्यते ॥
अलङ्कारास्त्वलङ्कारा गुणा स्वगुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम् ” - क्षेमेन्द्रः (औचित्यविचारचर्चा )

११. “ काव्यं ग्राह्यमलङ्कारात् ” ॥ - काव्यालङ्कारसूत्राणि (वामनः)

१२. “ शब्दार्थौ काव्यम् ” ॥ काव्यालङ्कारः ( उद्भटः )

१३. “ काव्यस्यात्मा ध्वनिः ”।
“ सहृदयहृदयाह्लादिशब्दार्थमयत्येवमेव काव्यलक्षणम् ” ॥
ध्वन्यालोकः ( आनन्दवर्धनाचार्यः)

१४. “ विभावादिसयोगात्मा रसाभिव्यक्त्यव्यभिचारी कविव्यापारः काव्यम् ” व्यक्तिविवेकः (महिमभट्टः)

१५. “ निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्
रसान्वितं कविः कुर्वन्कीर्तिप्रीतिं च विन्दति ” ॥ सरस्वतीकण्ठाभरणम् (भोजदेवः)

१६. “ काव्यं विशिष्टशब्दार्थसाहित्यसदलङ्कृति ” ॥ कविकण्ठाभरणम्



ISSN : 2320-740X

१७. " गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ ।
गद्यपद्योभयमयं काव्यं काव्यविदो विदुः " ॥ प्रतापरुद्रीयम् (विद्यानाथः)

१८. " शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ काव्यम् " ॥ काव्यानुशासनम् (वाग्भट्टः)

१९. " गुणवदलङ्कृतं वाक्यमेव काव्यम् "॥ काव्यमीमांसायाम् (राजशेखरः)

२०. " साधुशब्दार्थसन्दर्भगुणालङ्कारभूषितम् ।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये " ॥ वाग्भटालङ्कारकः (वाग्भट्टः)

२१. " अदोषौ सगुणौ साऽलङ्कारौ च शब्दार्थौ काव्यम् "॥ काव्यानुशासनम् (हेमचन्द्रः)

२२. " काव्यं रसादिमव्यं श्रुतं सुखविषेशक्रत् " ॥ (शौद्धोदनिनुसारम् )

२३. " रसाऽलङ्कारयुक्तं सुखविषेशसाधनं काव्यम् "॥ अलङ्कारशेखर (केशवमिश्रः)

२४. " शब्दाऽर्थवपुस्तावत् काव्यम् " ॥ एकावली (विद्याधरः)

२५. " तत्र निर्दोषशब्दार्थगुणवत्ते सति स्फुटम् ।

२६. गद्यादिबन्धरुपत्वं काव्यसामान्यलक्षणम् " ॥ साहित्यसारः (अच्युतराजः)

२७. " सगुणालङ्कृती काव्यं पदार्थौ दोषवर्जितौ " ॥ साहित्यरत्नाकर: (धर्मसुरि )

२८. गुणालङ्कारसंयुक्तौ शब्दार्थौ रसभावुगौ ।
नित्यदोषविनिर्मुक्तौ काव्यमित्यभिधीयते "॥ अलङ्कारचन्द्रिका (न्यायवागीश)

*****

## संस्कृतभाषायाः महत्वम्

✍श्रीवल्ली . बि
शास्त्रिद्वितीवर्षम्

माता मातृराज्यं च मानवानां परमप्रधाने भवतः । मातुः समीपे मातृराज्ये वा मानवेन यादृशं लालनं लभ्यते तादृशं स्वर्गेऽपि न लभ्यते । अत एव रामायणे उक्तमस्ति -

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥

अस्माकं जन्मभूमिः भारतदेशः । अस्य देशस्य संस्कृतिः अतिप्राचीना अस्ति । जन्मभूमेः संरक्षणार्थं संस्कृतेः रक्षणं आवश्यकंम् । अस्माकं देशः संस्कृत्या अतीव समृद्धः अस्ति । धर्मार्थकाममोक्षाः इति चतुर्षु पुरुषार्थेषु प्रतिष्ठिता भवति । धर्मानुसारं अर्थकामौ अनुभूय मोक्षम् आप्नुयात् इति ।

एतादृशस्य समृद्धसंस्कृतेः संरक्षणार्थं संस्कृतभाषा एव प्रथमे स्थाने अस्ति । सनातनभारतस्य संस्कृतेः वाहिनी संस्कृतभाषा भवति । संस्कृतभाषा देवभाषा इति सर्वे जानन्ति एव । इतिहासपुराणादयः,



ISSN : 2320-740X

आदिकविवाल्मीकिमुनिना रचितं रामायणं, व्यासमुनिरचितं महाभारतम्, जगत्प्रसिद्धा भगवद्गीता, वेदाः, काव्यनाटकादीनि संस्कृतभाषयैव रचिताः सन्ति।

अष्टादश पुराणानि , अष्टादश उपपुराणानि व्यासमहर्षिणा रचितानि।

* भगवद्गीता लोकप्रसिद्धा नीतिबोधका अस्ति। सनातनधर्मस्य सारसर्वस्वं भगवद्गीतायाम् अन्तर्निहितम्।
* प्रपञ्चे अतीवपुरातग्रन्थः नाम चत्वारो वेदाः । ऋग्वेदः , यजुर्वेदः , सामवेदः अथर्ववेदः चेति । तथैव वेदस्य षडङ्गानि सन्ति। ते च:-

  शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा।
  कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ॥

* शिक्षा, कल्पः, निरुक्तं च वेदस्य अर्थज्ञानार्थं उपयुज्यते।
* व्याकरणं शब्दोत्पत्तिः इत्यादिविषये अत्यन्तोपयोगी। व्याकरणं विना सम्यक्तया संस्कृतेन व्यवहर्तुं न शक्यते। अतः सर्व शास्त्रोपकारकं व्याकरणं इत्युच्यते।
* छन्दः अपि प्रसिद्धम् एव। छन्दांसि विना न किमपि संस्कृतसाहित्यं रचयितुं शक्यते न शोभते च।
* त्रिस्कन्दात्मकं ज्यौतिषशास्त्रम्। सिद्धान्तः,संहिता, होरा चेति। सिद्धान्ते गणितादिविषयाः अन्तर्भवन्ति । संहितया तु वृष्टि-वास्तुशिल्प-प्रदेशादि विषये ज्ञातुं शक्यते। फलचिन्तनं तु होराशास्त्रे क्रियते। एवमेव प्रकृतेः परिरक्षणं कथमिति भाषायामस्यां विद्यमानेन आम्नायादिना अवगन्तुं शक्नुमः । रविचन्द्रयोः आगमनं, भूमेः परिभ्रमणं तथा च अस्यां पृथिव्यां जायमानानामुपरिग्रहाणां प्रभावः इत्येतत्सर्वमपि ज्यौतिषशास्त्राध्ययनात् साधितमभूत्। तदर्थमेव प्राज्ञाः वदन्ति " **प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ "** इति।
* एवमेव आयुर्वेदः अपि वेदस्य उपाङ्गं वर्तते । वेदे विद्यमानान् विषयान् क्रोडीकृत्य आयुर्वेदशास्त्रं प्रवर्तितमस्ति । अस्माकं पूर्वजाः कीदृशमाविष्कारं वैद्यशास्त्रविषये कृतवन्तः इत्येतत् सुश्रुतसंहिताध्ययनात् स्पष्टीभविष्यति । शस्त्रचिकित्सायाः विषयमपि तस्मादेव अवगच्छामः । चिकित्सापद्धति विषये सुश्रुतसंहिता, अष्टाङ्गहृदम्, चरकसंहिता , भैषज्यरत्नावली इत्यदयः अनेके ग्रन्थाः उपलभ्यन्ते।
* लोके काव्यानि बहूनि वर्तन्ते। तत्र गद्यं, पद्यं, चम्पू इति त्रिधा। काव्येषु पञ्च महाकाव्यानि प्रसिद्धानि। तत्र कालिदासस्य कुमारसम्भवम्, रघुवंशम् इति काव्यद्वयम्। भारविमहाकवेः किरातार्जुनीयम्, माघस्य शिशुपालवधं (माघकाव्यम्) , श्रीहर्षमहाकवेः नैषधीयचरिम् इत्येतानि पञ्च महाकाव्यानि।



ISSN : 2320-740X

[redacted]

* तथा च नाटकानि बहूनि वर्तन्ते । तत्र कालिदासस्य "अभिज्ञानशाकुन्तलम्" इति नाटकं जगत्प्रसिद्धमस्ति। इदं नाटकं लोकेषु विद्यमानेषु अन्यास्वपि भाषासु अनूदितं वर्तते।

संस्कृतभाषा सुभाषितानां आगरः अस्ति। " सम्यक् भाषितं " सुभाषितम्। मानवस्य जीवने श्रेष्ठत्वं प्राप्तुं सुभाषितानि अतीव महत्वपूर्णानि भवन्ति। सुभाषितस्य वैशिष्ट्यम् एवं वर्णयन्ति –

द्राक्षाम्लानमुखी जाता शर्करा चाश्मतां गता।
सुभाषितरसं दृष्ट्वा सुधा भीता दिवङ्गता॥ इति।

अस्यां भाषायाम् एव ज्ञानविज्ञानयोः विधिः सुरक्षिताऽस्ति । संस्कृतभाषा क्लिष्टा नैव, **"विद्यया अमृतमश्नुते"** इति ध्येयवाक्यं स्मृत्वा, आलस्यं त्यक्त्वा, दृढचित्तस्सन् यः पुरो गच्छति सः विजयी भविष्यति।

"वसुधैव कुटुम्बकम्, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, लोकाः समस्ताः सुखिनो भवन्तु" इत्यादयः भारतीयसंस्कृतेः महिमानम् उद्घोषयन्ति।

एवमेव ज्ञायते यत् **"सर्वभाषाजननी भवति संस्कृत भाषा"।** संस्कृतं विना भारतीयसंस्कृतिं ज्ञातुं न शक्नुमः। अतः ज्ञानिनः वदन्ति **"भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती"** इति।

*****

## शरीरमाद्यं खलु धर्मसाधनम्

✍ **एम्. महेशकुमारः**
शास्त्रिप्रथमवर्षम्

**"शरीरमाद्यं खलु धर्मसाधनं"** इति कालिदासीयवचनानुगुणं शरीररक्षणम् अत्यावश्यकम् । तेन दीर्घायुः लभ्यते । तच्च दीर्घायुः आरोग्याधीनम् । **"जीवेम शरदः शतम्"** इत्यादिश्रुतिवाक्यानुसारम् अस्माकं पूर्वजाः न्यूनातिन्यूनंशतवर्षाणि जीवन्ति स्म इति ज्ञायते। आरोग्यमेव सुखजीवनस्य मूलं कारणम्। जीवने सुखशान्त्यादीनां प्राप्तिः आरोग्यसंरक्षेणेनैव साध्या। रोगणां निवारणापेक्षया प्रतिबन्ध एव वरम् इति मन्यन्ते स्म अस्माकं पूर्वजाः मुनयः । एकदा देवभिषजौ अश्विनीकुमारौ भुवमागत्य **"कः अरुक्?"** इति आयुर्वेदविज्ञानिनं वाग्भटं अप्रच्छताम्। तदा वाग्भटः **"हितभुक् मितभुक् ऋतभुक् अरुक् भवति"** इत्युत्तरं ददौ । एतैः वचनैः आहारस्वीकारविषये नियमाः अत्यावश्यकाः इति ज्ञायते । प्रकृते **चरकसुश्रुतवाग्भटैः** तेषाम् ग्रन्थे आहारस्वीकारसम्बध्दाः उक्ताः केचन श्लोकाः अर्थसहितं सङ्गृहीताः सन्ति।

**धर्मार्थकाममोक्षाणाम् आरोग्यं मूलमुत्तमम्।**
**रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च ॥१॥** - चरकसंहिता



[redacted]

ISSN : 2320-740X

**अर्थः** –सर्वेषां मानवानां धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां प्राप्तये आरोग्यमेव मूलं कारणम्। यतः रोगाः कीर्तेः जीवनस्य च अपहर्तारः भवन्ति।

**न तक्रसेवी व्यतथे कदाचित्**

**न तक्रदग्धाः प्रभवन्ति रोगाः।**

**यथा सुराणाममृतं हिताय**

**तथा नराणां भुवि तक्रमाहुः ॥२॥** - चरकसंहिता

**अर्थः** – यः तक्रं सेवते सः कदापि आरोग्यविषये व्यथां न करोति (निश्चिन्तः भवति)। किमर्थमिति चेत् तक्रेण दग्धाः रोगाः पुनः न प्रभवन्ति। यथा देवलोके देवानां अमृतं हिताय भवति तथैव भूलोके नृणां कृते तक्रं हिताय भवति।

**अत्यम्बुपानात् विषमाशनाच्च**

**दिवा च सुप्तेः निशि जागराच्च।**

**संरोधनान्मूत्रपुरीषयोश्च**

**षड्भिः निदानैः प्रभवन्ति रोगाः ॥३॥** - अष्टाङ्गहृदयम्

**अर्थः** – अधिकजलपानात्, अधिक-अपथ्यकरभोजनात् , दिने शयनात्, रात्रौ जागरणात्, मलस्य मूत्रस्य च प्रतिरोधात्, इत्येवं षड्भिः मूलकारणैः रोगाः सम्भवन्ति।

**विनापि भोजनैर्व्याधिः पथ्येनैव निवर्तते।**

**न हि पथ्यविहीनानां भेषजानां शतैरपि ॥४॥** - चरकसंहिता

**अर्थः** –औषधैः विनापि केवलं पथ्येनैव रोगाः निवर्तन्ते। पथ्यम् अकुर्वतां जनानां शताधिकैरपि औषधैः अपि रोगाः न निवर्तन्ते।

**निवृत्तः सर्वमद्येभ्यो नरो यश्च जितेन्द्रियः।**

**शरीरमानसैर्धीमान् विकारैः न स युज्यते ॥५॥** - चरकसंहिता

**अर्थः** – यः पूर्णतया मद्यसेवनात् विमुक्तः भवति, इन्द्रियनिग्रहवान् भवति । सः बुद्धिमान् नरः दैहिकमानसिकविकारैः रोगैः युक्तः न भवति।

**नाभोजनेन कायाग्निर्दीप्यते नातिभोजनात्।**

**यथा निरिन्धनो वह्निरल्पो वातीन्धनावृतः ॥६॥** - चरकसंहिता

**अर्थः** – यथा निरिन्धनः (विना इन्धनेन) अल्पो वह्निः न ज्वलति, अथवा अतीन्धनावृतः अग्निः न ज्वलति, तथैव अस्माकं जठरे विद्यमानः जठराग्निः अभोजनेन न दीप्यते एवमेव अतिभोजनेन अपि न दीप्यते।

**हिताशी स्यात् मिताशी स्यात्**

**कालभोजी जितेन्द्रियः।**



ISSN : 2320-740X

**पश्यन् रोगान् बहून् कष्टान्**

**बुध्दिमान् विषमाशनात् ॥७॥** - चरकसंहिता

**अर्थः –** यः धीमान् सः अपथ्यभोजनात् उत्पद्यमानान् रोगान् तथैव तेभ्यः जायमानानि बहूनि कष्टानि च पश्यन् (ज्ञात्वा) हितं भोजनं कुर्यात् । मितं भोजनं कुर्यात् । काले भोजनं कुर्यात्। इन्द्रियनिग्रही च स्यात् ।

**अनात्मवन्तः पशुवद्भुञ्जतेयेऽप्रमाणतः ।**

**रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥८॥** - सुश्रुतसंहिता

**अर्थः –** विवेचनशून्याः मानवाः पशुवत् अमितं भोजनं कुर्वन्ति । ते रोगसमूहस्य मूलकारणम् अजीर्णं प्राप्नुवन्ति ।

**न रागान्नाप्यविज्ञानाद् आहारानुपयोजयेत् ।**

**परीक्ष्य हितमश्नीयाद् देहो ह्याहारसम्भवः ॥९॥** - चरकसंहिता

**अर्थः –** अत्याशायाः अज्ञानाद् वा कदापि आहाराणाम् उपयोगं न कुर्यात्। आहारं परीक्ष्य हितकरं भोजनं कुर्यात्। यतः अयं देहः आहारात् उत्पन्नः ।

- **चरकः -** प्रायः क्रि.श. द्वितीयशतकम्। एषः कुशानवंशस्य कनिष्कराजस्य आस्थाने आसीत्। चरकः आयुर्वेदे, खगोलशास्त्रे तत्वशास्त्रे च परिणतः आसीत् । एतस्य कृतिः **चरकसंहिता** । अत्र पञ्चशताधिक –औषधीनां विवरणं वर्तते।

- **सुश्रुतः –** प्रायः क्रि.श. चतुर्थशतकम् । एतस्य कृतिः **सुश्रुतसंहिता ।** अत्र **प्लास्टिक् शस्त्रचिकित्सारीत्या शस्त्रचिकित्साविधानं, शताधिकशस्त्रचिकित्सासाधनानि, ११२० रोगाणां नामनिर्देशनम् , एवमेव तेषां निवारणौषधं, प्रसूतिविज्ञानं, बालाहारविज्ञानम्** इत्यादविषये उक्तं वर्तते । सुश्रुतः काशी विश्वविद्यानिलये प्राध्यापकः आसीत् ।

- **वाग्भटः –**प्रायः क्रि.श. सप्तमशतकम्। सिन्धुप्रदेशे वाग्भटस्य जननम् । एतस्य ग्रन्थः **अष्टाङ्गसंग्रहः ।**

*****



ISSN : 2320-740X

## सुभाषितम्

✍ **मनोजः**
प्राक्शास्त्रिप्रथमवर्षम्

भाषासु मुख्या मधुरा दिव्या सुन्दरा सुचारु च संस्कृतभाषा अस्ति। तत्र काव्यं मधुरं, तत्राऽपि सुभाषितं मधुरतरं वर्तते।

सुभाषितं नाम सुन्दरं भाषितम्, सुष्ठु भाषितम्, शोभनं भाषितम् । एतानि सुभाषितानि सार्वकालिकमौल्यानि प्रतिपादयन्ति । अनुभवयुक्तानि एतानि अस्माकं जीवने मार्गदर्शनं कुर्वन्ति । संस्कृतसाहित्ये तावत् शताधिकसुभाषितग्रन्थाः विराजन्ते । तेषु सुभाषितसुधानिधिः सुभाषितरत्नभाण्डागारः, नीतिशतकम् इत्यादयः प्रसिद्धाः । अत्र केषाञ्चन सुभाषितानां विवरणे प्रयत्नः कृतः ।

सुभाषितस्य महिमा एवं वर्तते।

द्राक्षा म्लानमुखी जाता शर्करा चाश्मताङ्गता।
सुभाषितरसस्याग्रे सुधा भीता दिवङ्गता ॥

सुभाषितरसस्य अग्रे द्राक्षा म्लानमुखी जाता, शर्करा च पाषाणत्वं गता । साक्षात् सुधा (अमृतम्) स्वर्गं गता।

मानवजीवने विद्यायाः महत्वं सुभाषितकारः एवं अभिप्रैति –

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते नहि धनं विद्या विहीनः पशुः ॥
विद्वत्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

अत्र सुभाषितकारः विद्वत्त्वं तथा च नृपत्वं कदापि समत्वं न अवाप्नोति इति प्रतिपादयति। राजा स्वदेशे एव पूज्यते, परन्तु विद्वान् सर्वत्र पूज्यते। अतः विद्वत्त्वं सर्वदा श्रेष्ठतां भजते।

साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥

अत्र सुभाषितकारः मानवजीवने साहित्यादिकलानां महत्वं वर्णयति। साहित्यसङ्गीतकलाविहीनः पुच्छविषाणहीनः साक्षात् पशुः। तत्र तृणं न खादन्नपि जीवमानः इति तु पशूनां परमं भागधेयम् अस्ति।



ISSN : 2320-740X

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः ।
परोपकारः पुण्याय पापाय परपीडनम् ॥

महाभारते व्यासमहर्षिः धर्माधर्मविषये एवं उक्तवान् – यत् ग्रन्थकोटिभिः उक्तं तत् तेन श्लोकार्धेन उच्यते परोपकारः पुण्याय पापाय परपीडनम् इति ।

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥

उद्यमशीलतायाः विषये सुभाषितकारस्य अभिप्रायः एवं वर्तते – कार्याणि उद्यमेन एव सिद्ध्यन्ति, मनोरथैः न सिद्ध्यन्ति । यथा सुप्तस्य सिंहस्य मुखे मृगाः न प्रविशन्ति ।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन हि मूर्खाणां निद्रया कलहेन वा ॥

अत्र बुद्धिमतां तथा मूर्खाणां स्वभावः निरूपितः । धीमतां कालः काव्यशास्त्रविनोदेन गच्छति । परन्तु मूर्खाणां कालः निद्रया, व्यसनेन कलहेन वा गच्छति ।

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥

अत्र धनस्य त्रिस्रः अवस्थाः वर्णिताः । वित्तस्य दानं भोगः नाशः चेति तिस्रः गतयः भवन्ति । यः मानवः न ददाति स्वतः न भोगं करोति तस्य वित्तस्य तृतीया गतिः भवति । अतः दानं भोगो वा करणीयः इत्यर्थः ।

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥

मानवेन प्रतिदिनम् आत्मावलोकनं करणीयम् । यथा प्रत्यहं मनुष्येण किमहं पशुभिः समानः अथवा सत्पुरुषैः समानः इति पर्यवेक्षणीयम् ।

*****



ISSN : 2320-740X

# हिन्दी विभाग



[redacted]

ISSN : 2320-740X

# हिन्दी की विश्वव्यापकता

✍डॉ.राजेश कुमार शुक्ल
सहायक आचार्य हिन्दी (संविदागत)

हिन्दी भाषा को भारत की भले ही संवैधानिक राजभाषा घोषित किया गया हो, लेकिन ‘होनहार बिरवान के होत चीकने पात’ की कहावत को चरितार्थ करती हुई यह अन्तर्राष्ट्रीय भाषा की ओर उन्मुख है । क्योंकि भारतेतर राष्ट्र के विविध विश्वविद्यालयों में पठन पाठन के रूप में,वहॉ के प्रवासी एवं अप्रवासी भारतीयों के मध्य बोलचाल और संपर्क भाषा के रूप में यह अपना परचम लहरा रही है तथा वहॉ के नागरिकों को हिन्दी प्रेमी बना रही है । डॉ.तिवारी का कथन है कि “हिन्दी के अनेक रचनाकार अब रूसी, जापानी, चीनी आदि भाषाओं में अनूदित हो रहे हैं, हिन्दी का चेहरा अब अन्तर्राष्ट्रीय हो गया है । उसका एक विश्व रूप निर्मित हो रहा है । “[1]आधुनिक सूचना प्रौद्योगिकी, मीडिया, प्रेस, रेडियों, टेलीविजन, विज्ञापन, फिल्म, सैटेलाइट चैनलों के माध्यम से हिन्दी सुदूर राष्ट्र में बैठे हुए लोगों का कंठहार बन गई है। व्यावसायिक स्तर पर इसने अपना स्थान बना लिया है। प्रो.विजय कुलश्रेष्ठ का कथन है कि “वैश्वीकरण के नाम पर विस्तारित बाजारवाद ने हिन्दी की देवनागरी लिपि प्रयोग परक वैज्ञानिकता को आधार दिया है तथा संस्कृत एवं हिन्दी को कम्प्यूटर के लिए सर्वाधिक सहज भाषा के रूप में स्वीकार किया गया है। तभी अमेरिका ने पाँच सौ करोड़ डालर व्यय करने और दक्षिण एशियाई भाषाओं के साथ सर्वाधिक स्तर पर हिन्दी के अध्ययन की तत्परता दिखाई है क्योंकि भारतीय लोक तंत्र से अधिक दूर दृष्टि रखने वाले लोकतंत्री अमेरिका को हिन्दी कहीं अधिक अर्थकारी दिखाई देती है ।”[2] अतः हिन्दी प्रत्येक क्षेत्र में अपना प्रभुत्व स्थापित कर रही है।

हिन्दी की विश्वव्यापकता पर विचार करने से पूर्व हिन्दी शब्द के विशिष्ट व्यावहारिक अर्थ पर ध्यान देना होगा, क्योंकि हिन्दी शब्द का एक अर्थ है-’हिन्दुओं की भाषा और दूसरा अर्थ है-हिन्दुस्तान की भाषा । इसलिए यह हिन्दुस्तान में निवास करने वाले सभी धर्म, जाति सम्प्रदाय के नागरिकों की भाषा है और यदि डॉ. रामविलास शर्मा के कथन पर ध्यान दिया जाय कि “हिन्दी साहित्य हिन्दी जाति का साहित्य है । हिन्दी जाति का मतलब हिन्दू जाति नहीं है। इसमें हिन्दू भी हैं, मुसलमान भी। दलित और स्त्रियॉ भी ।’[3] तो यह समस्त मानव जाति से सम्बद्ध है । इस विशिष्ट व्यापक अर्थ में इसके अन्तर्गत हिन्दू, मुस्लिम, सिक्ख, ईसाई आदि सभी जातियों के लोग आ जाते हैं । इस प्रकार यह विश्व की सभी जातियों, धर्मों एवं

---

[1]हिन्दी का गद्य-साहित्य, लेखक- डॉ.रामचन्द्र तिवारी, पृष्ठ-908, प्रकाशक-विश्वविद्यालय प्रकाशन, चौक, वाराणसी, सप्तम संस्करण-पुनर्मुद्रण-2011ई.

[2] सूचना प्रौद्योगिकी और हिन्दी,(लेख)-प्रो.विजय कुलश्रेष्ठ, पृष्ठ-38, मासिक’मधुमती’,वर्ष 51, अंक-9-10 सितम्वर अक्टूबर-2011, प्रकाशक :सचिव, राजस्थान साहित्य अकादमी, सेक्टर-4, हिरण मगरी, उदयपुर (राजस्थान)-313002

[3] हिन्दी आलोचना बीसवीं शताब्दी, लेखक-डॉ.रेवतीरमण, पृष्ठ-22, प्रकाशक-अभिव्यक्ति प्रकाशन,बी-31 गोविन्दपुर कालोनी इलाहाबाद



ISSN : 2320-740X

सम्प्रदायों की भाषा बन जाती है। 'निज भाषा उन्नति अहै सब उन्नति को मूल' का सन्देश तो भारतेन्दु का था किन्तु विश्व भाषा की कामना हमें मैथिली शरण गुप्त के भारत भारती की निम्नलिखित पंक्तियों में देखने को मिलती है – मानस भवन में आर्यगण जिस की उतारे आरती।

भगवान सारे विश्व में गूँजे हमारी भारती ॥

आज मैथिलीशरण गुप्त की कामना साकार हो गई है। हिन्दी ने सारे विश्व में अपनी पहचान बना ली है। मल्टीनेशनल कम्पनियों,विज्ञापनों, शिक्षण संस्थाओं एवं अन्तर्राष्ट्रीय सम्मेलनों में इसका तीव्र गति से प्रचार- प्रसार हो रहा है। सूचना प्रौद्योगिकी एवं उन्नत संचार व्यवस्था ने अखिल विश्व को संकुचित कर दिया है। साहित्य के साथ-साथ, दूरदर्शन, कम्प्यूटर, मोबाईल, इंटरनेट, ए.टी.एम.आदि यान्त्रिक माध्यमों से हिन्दी अपने शब्दभण्डार को बढ़ाती हुई निरन्तर समृद्ध हो रही है। डॉ.कैलाश नाथ पाण्डेय का विचार है कि-"किसी भी भाषा की समृद्धता उसके शब्दों पर आधारित होती है। जो भाषा अपनी शब्द राशि दूसरी भाषाओं से आत्मसात करके अनुदिन बढ़ाती जाती है, वही कालान्तर में धनी भाषा कही जाने लगती है।" [1] हिन्दी में दूसरी भाषाओं के शब्दों को सहजरूप में आत्मसात् करने की प्रवृत्ति सर्वाधिक है। यही विशेषता हिन्दी को वैश्विक परिदृश्य पर दृढ़ता प्रदान करती है तथा बोलने वालों की संख्या की दृष्टि से आज हिन्दी विश्व की पहली भाषा के रूप में अपना कदम बढ़ा रही है।

अब वह दिन दूर नहीं जब हिन्दी अन्तराष्ट्रीय क्षितिज पर पंख फड़फड़ा कर उड़ेगी और राष्ट्र भाषा की सीमा को लांघ कर अन्तर्राष्ट्रीय भाषा के रूप में अपना गौरव बढ़ायेगी। बहुत पहले गणेश शंकर विद्यार्थी ने कहा था कि – "एक दिन हिन्दी एशिया नहीं, विश्व की पंचायत में महत्त्वपूर्ण भूमिका अदा करेगी। "उक्त कथन आज वास्तविकता के सन्निकट है। क्योंकि "जब कोई राष्ट्रभाषा अपनी विशिष्ट अर्थक्षमता के कारण विभिन्न राष्ट्रों के मध्य विचार विनिमय, पत्राचार अथवा सांस्कृतिक आदान-प्रदान का माध्यम बनती है तब वह अन्तर्राष्ट्रीय भाषा के नाम से जानी जाती है।"[2] हिन्दी वास्तव में अन्तर्राष्ट्रीय भाषा के सर्वथा योग्य है एवं वह होकर रहेगी और जिस तरह हिन्दी की वैश्विक स्थिति सुदृढ़ हो रही है वह अनेक राष्ट्रों के विविध विश्वविद्यालयों तथा विभिन्न संस्थाओं द्वारा दिन-दूनी रात-चौगुनी बढ़ रही है उसका प्रचार-प्रसार हो रहा है उसे कोई रोक नहीं पायेगा।

हिन्दी भाषा को वैश्विक परिदृश्य पर स्थान दिलाने में उन प्रवासी भारतीयों का विशिष्ट स्थान है जो शताब्दियों पूर्व या वर्तमान में नौकरी, व्यापार, अध्ययन अध्यापन आदि के उद्देश्य से अमेरिका, कनाडा, थाइलैण्ड, मलेशिया, सिंगापुर, बर्मा, ब्रिटेन, मारीशॅस, फिजी, सूरीनाम, गियाना, ट्रिनीडाड, तंजानिया आदि देशों में जाकर रहने लगे। ये प्रवासी भारतीय अपने साथ कई कालजयी रचनाएँ-रामचरितमानस,

[1] भाषा विज्ञान का अनुशीलन, लेखक-डॉ.कैलाशनाथ पाण्डेय, पृष्ठ-310, प्रकाशक : जनप्रकाशन औद्योगिक उत्पादन, सहकारी समिति लि.रौजा-गाजीपुर

[2] भाषा विज्ञान का अनुशीलन, लेखक-डॉ.कैलाशनाथ पाण्डेय, पृष्ठ-42,



ISSN : 2320-740X

